# गोपाल-देशिक-श्राद्ध-प्रयोगः①

gopAla-deshikaH

# Table of Contents


ॐ 2

०१ प्रतिज्ञादि 3

उपवीत-नियमः 3

०२ पूर्वेद्युः 4

प्राक्सिद्धता 4

निमन्त्रणम् 4

०३ होमात् प्राक् 6

श्राद्धदिने सिद्धता 6

पुनर्-निमन्त्रणम् 6

पाक-स्नपनादि 6

माध्याह्निकादि 7

पाद्यादि 7

औपसनाग्नि-सिद्धता 7

अनुज्ञा 8

सङ्कल्पः 9

०४ होमः 11

पूर्वाङ्गम् 11

अग्निप्रतिष्ठा 11

पात्रसादनादि 11

आज्य-निर्वापादि 12

दर्वी-संस्कारः 13

परिधि-स्थापनादि 13

आघारः 14

आज्यभागौ 14

आवाहनम् 14

वैश्वदेवम् 14

पैतृकम् 15

वैष्णवम् 16

अन्नाहुतयः 17

आज्याहुतयः 19

स्विष्टकृत् 20

अहविष्यहोमः 20

लेपकार्यम् 20

उत्तराङ्गम् 21

परिधिप्रहरणम् 21

संस्रावः 21

प्रायश्चित्ताहुतयः 21

व्याहृतिहोमाः 22

पूर्णाहुति-प्राणायामौ 23

परिषेचनम्, प्रणीताविमोकः 23

उपस्थानानि 23

## ०५ भोजनम् 26

आसनम् 26

पाद-प्रक्षालनम् 26

मण्डले 26

प्रक्षालनम् 27

आसन-दानम् 28

अर्चनम् 29

पात्रस्थापनम् 31

परिवेषणम् 31

अर्घ्यम् 36

प्रदक्षिणीकरणम् 36

ब्रह्म-भावनम् 36

अभिमर्शः 37

कर्त्रा हुतशिष्टान्नस्य जपः 37

देव-पात्रे 38

समष्टिदत्तम् 40

परिषेचनादि 41

शुश्रूषा-नियमाः 43

श्रावणम् 44
तृप्ति-प्रश्नाः 44
प्रकिर-दानम् 46
अथवा विकिरदानम् 46
उत्तरापोशनं 47
रोचनम् 48
निवेदित-तुलसी-मिश्र-ताम्बूल-दक्षिणाश् च 48
स्वधा-वाचनादि 49
उपस्थानम् 50
आशीर्वचनम् 54
धन्यता 55
०६ पिण्डप्रदानविधिः 61
दर्भासन-कल्पनम् 61
मार्जनम् 61
पिण्ड-स्थापनम् 61
अर्चनादि 62
तिलोदकम् 63
तर्पणम् 63
परिषेचनम् 64
पात्र-वर्तनम् 64
प्राशनम् 64
पिण्ड-दानानि 64
०७ उत्तरकर्म 66
०८ अभिश्रवणमन्त्राः 67
01 सहस्रशीर्षा पुरुषः - अनुष्टुप् 77
02 पुरुष एवेदम् - अनुष्टुप् 85
03 एतावानस्य महिमातो - अनुष्टुप् 92
04 त्रिपादूर्ध्व उदैत्पुरुषः - अनुष्टुप् 99
05 तस्माद्विराळजायत विराजो - अनुष्टुप् 108
06 यत्पुरुषेण हविषा - अनुष्टुप् 116
07 सप्तास्यासन् परिधयः 123

08 तं यज्ञम् - अनुष्टुप् 130
09 तस्माद्यज्ञात्सर्वहुतः सम्भृतम् - अनुष्टुप् 138
10 तस्माद्यज्ञात्सर्वहुत ऋचः - अनुष्टुप् 148
11 तस्मादश्वा अजायन्त - अनुष्टुप् 155
12 यत्पुरुषं व्यदधुः - अनुष्टुप् 161
13 ब्राह्मणोऽस्य मुखमासीद्बाहू - अनुष्टुप् 168
14 चन्द्रमा मनसो - अनुष्टुप् 175
15 नाभ्याम् - अनुष्टुप् 182
पुरुषस्तुतिः, यज्ञस्तुतिः 189
16 यज्ञेन यज्ञमयजन्त - त्रिष्टुप् 193
उत्तरनारायणानुवाकः 202
नारायण-सूक्तम् 202
विष्णु-गायत्री 210
विष्णु-सूक्तम् 210
राक्षोघ्नमन्त्रौ 268
आह्वानम् 269
युद्धप्रार्थना 269
उपासकसौभाग्यम् 270
प्रतिज्ञा 270
किरणकीर्तिः 271
प्रतिज्ञानुवर्तनम् 271
रक्षोहाग्निध्यानम् 271
महापितृयज्ञे हौत्रमन्त्राः 285
English translation: 298
१२. सोमभक्ष-मन्त्राः 420
१३. एकविंशतिरात्रः 426
परिचयः 426
फलम् 426
ग्रहविचारः 428
फलम् 428
१४. संवत्सरसत्र-मन्त्राः 429

ग्रहप्रामुख्यम् 429
स्तोमाः 431
ग्रहा ऽतिग्राह्याश् च 431
सौर्योऽतिग्राह्यः 432
सप्तत्वम् 432
उत्तर-पक्ष-ग्रहाः 433
विश्वकर्मणो ग्रहः 433
आदित्य-ग्रहः 434
ग्रहणक्रमः 434
उक्थ्यम् 435
काठके (नाचिकेताग्नि-ध्यानम्) 436
नाचिकेतोपाख्यानम् 440
नाचिकेताग्नि-प्रयोगविधिः 444
त्रिसुपर्णमन्त्राः 451
48 451
49 452
50 464
२१. अन्नसूक्तम् 472
०९ निमन्त्रितैर् जपाः 478
१. दोग्ध्री जपः - 478
२. नियोगानन्तरं निषङ्गिणी 479
३. परिवेषणकाले ब्रह्मोद्यम् 488
द्यव्य् अश्वावी 489
परिहाराः 489
सूर्यचन्द्राग्नि-भूमयः 490
Appendix - +Dyugangā द्युगङ्गा 493
Goals ध्येयानि 493
संस्कृतानुवादः 493
Contribution दानम् 494

# ॐ①

Source: TW1

श्रीगोपालदेशिकैरनुगृहीतः श्राद्धप्रयोगः

▼ *मूल-प्रस्तुतिः*

त्रय्य्-अन्त-सूरि-सिद्धान्त-
दुग्ध-सिन्धु-सुधाकरम् ।
आत्रेय-गोत्र-पद्मार्कं
श्री-गोपाल-गुरुं भजे ॥

---

1. https://archive.org/details/Vaishvadeva/prayogamAlA/page/n132/mode/1up

# ०१ प्रतिज्ञादि①

तात्पर्य-दर्शनं गृह्य-
प्रयोग-व्याकृतिं पुनः ।
सुधी-विलोचनं वैद्य-
नाथीयाख्य-निबन्धनम् ॥

प्रयोग-दर्पणं चापि
समीक्ष्य श्राद्ध-कर्मणः ।
पुंसां सुखेन बोधार्थं
प्रयोगोऽत्र विलिख्यते ॥

▼ ***अवधेयम् (द्रष्टुं नोद्यम्)***

अवधेयम् - अस्मिन् प्रयोगे पितृश्राद्धरीतिः प्रदर्शिता । मातुश्श्राद्धे - संकल्पे, वरणे, अर्चनादौ, अन्नजपे, दत्तकरणे तत्रतत्र वक्तव्यप्रकारः विद्वत्पुरोहितमुखादवगन्तव्यः । एवं मातामहादिश्राद्धे अन्यार्थे क्रियमाणे च ॥

## उपवीत-नियमः②

> प्राणायामाचमनयोर् अग्नेश्चैव मुखे तथा ।
> आघारयोस् तत्-समिधोः स्विष्टकृद्-याज्यभागयोः ॥
> प्रायश्चित्त-स्तोत्र-सूक्त-जपेषु परिवेषणे ।
> हुतशिष्टान्नतो ऽन्यस्याभिश्रवण-नमस्ययोः ॥
> प्रदक्षिणानुव्रजन-विसर्ग-स्वागतेषु च ।
> सौमनस्य-प्रार्थनयोः स्वस्ति-वाचनके तथा ॥
> विप्राणां दक्षिणादाने पिण्डाघ्राणे तथैव च ।
> प्रत्युत्थाने चोपवीतम् एतेष्व् अन्यत्र नैव तत् ॥

# ०२ पूर्वेद्युः①

## प्राक्सिद्धता②

पित्रोः प्रत्याब्दिकश्राद्धदिनात्पूर्वं
त्रिंशद्दिनेषु पञ्चदशसु वा,
अत्यन्ताशक्तौ त्रिषु दिनेषु वा
परान्नं क्षौरं च वर्जयित्वा,
श्राद्धदिनात् पूर्वदिने
दन्तधावन-तैलाभ्यञ्जनादि वर्जयित्वा
मध्याह्न एव वस्त्रशोधनादि कृत्वा,
आतपे शुष्कीकृत्य,
श्राद्धप्रदेशं गोमयादिना उपलिप्य,
तत्र भोजनादि वर्जयित्वा,
रात्रौ सायम्-औपासनं कृत्वा,
कृतसायम्-आशान् श्वित्रादि-दोष-रहितान् यथोक्त-गुण-सम्पन्नान् निमन्त्रयेत् ।

## निमन्त्रणम्②

शीलवृत्तादि-गुण-सम्पन्नानां शारीरक-बन्धूनाम्, अन्येषां च समवाये
दूरस्थान् अपि अन्यान् एव गुणवतो निमन्त्रयेत् ।
अन्यस्य निर्गुणत्वे
सगुणं बन्धुं निमन्त्रयेत्;
उभयोः निर्गुणत्वे बन्धुम् एव निमन्त्रयेत् ॥

[[103]]

तत्-प्रकारः - प्रथमं **उपवीती** - देवार्थे ब्राह्मणान् पादाव् उपसंगृह्य,

> श्वः श्राद्धं भविता,
> तत्र आहवनीयार्थे
> भवद्भिः प्रसादः करणीयः

इति देवार्थे द्वौ एकं वा निमन्त्र्य,

> अक्रोधनैः शौचपरैः
> सततं ब्रह्मचारिभिः ।

> भवितव्यं भवद्भिश्च
> मया च श्राद्धकारिणा ॥

इत्यादिना

> इतः प्रभृति
> अध्वगमन+आयास--औषधादि-भक्षण--प्रतिग्रह+अध्ययन-
> भारवहन--असम्भाष्य-सम्भाषण--
> परहिंसा-कलहादि-वर्जन--पुरस्-सरं
> ब्रह्मचर्य-शौचादि-युक्तैः भवद्भिर् भवितव्यम् ॥

इति निमन्त्रित-नियमांश् च आवेद्य - 'अविघ्नेयं रजनी यदि, तथास्तु' ॥ इति प्रत्युक्तः

**प्राचीनावीती**,
एवमेव पित्रर्थे, पितामहार्थे, प्रपितामहार्थे, च त्रीन्,
सर्वार्थे एकं वा निमन्त्र्य,

**उपवीती**, विष्ण्वर्थे च एकं निमन्त्र्य,

स्वयमशक्तौ शिष्यादिमुखेन वा निमन्त्र्य,

तैः साकं रात्रौ उक्त-नियम-विशिष्टः स्थित्वा,

# ०३ होमात् प्राक्①

## श्राद्धदिने सिद्धता②

श्वः दन्त-धावनं वर्जयित्वा,
नद्यां स्नात्वा, सन्ध्यादि कृत्वा,
श्राद्ध-देशं महा-नसादि च गोमयेन +उपलिप्य,
सौवर्णरजतताम्रादीनि मृन्मयानि वा भाण्डानि सम्पाद्य,
शुद्धोदकेन मृन्मयानि, अन्यानि च यथायथं संशोध्य,
श्राद्धप्रदेशे सोपकरणे तिलान् प्रकीर्य,
श्राद्धोपकरणानि अभ्युक्षणेन सम्प्रोक्ष्य

निमन्त्रित-ब्राह्मणान् गृहम् आनीय,
सुप्रक्षालित-पाणिपादान् आचान्तान् आसनेषु +उपवेश्य,
गन्धपुष्पाक्षतादिभिर् अभ्यर्च्य,

[[104]]

## पुनर्-निमन्त्रणम्②

पादोपसङ्ग्रहणपूर्वकं
"गोत्रस्य शर्मणः पित्रादेः अद्य श्राद्धं भविष्यति..."
इत्यादि-विशेष-युक्तं पूर्ववत् निमन्त्रयेत् ।

निमन्त्रिताश् च ब्राह्मणाः निमन्त्रणानन्तरं 'आ ब्रह्मन्' इति दोग्ध्रीं,
मध्याह्ने 'भवता क्षणः कर्तव्यः' इति नियोगानन्तरं
'नमस्सहमानाय, नमो दुन्दुभ्याय च' इति निषङ्गिणीं,
परिवेषणकाले ‘किँऽस्विदासीत्' इति ब्रह्मोद्यं च जपेयुः॥

[[106]]

## पाक-स्नपनादि②

अथ शास्त्रोक्तप्रकारेण विहितपदार्थानां पाकं कुर्यात् ।
अथ द्वादशघटिकाभ्य ऊर्ध्वं
निमन्त्रित-ब्राह्मणेभ्यः ताम्रेण पात्रेण
प्रत्येकं तैलं मधूकान्यदुद्वर्तनं, स्नानं, स्नानीयं, दन्तधावनकाष्ठं च दत्वा,
अभ्यङ्गनिषिद्ध-तिथिषु आमलकं दत्वा,

तस्यापि निषेधे यथोचितं स्नानीयं दत्वा,
आत्म-पुत्र-शिष्यादि-मुखेन वा स्वयं वा अभ्यज्य,
स्नापयित्वा,
स्वयं च स्नात्वा,
कौपीनं परिधानं उत्तरीयं च धृत्वा,
तान् अपि धारयित्वा,

## माध्याह्निकादि②

धृतोर्ध्वपुण्ड्रः कृत-माध्याह्निक-सन्ध्यः,
अकृत-वस्त्र-निष्पीडनः,
भगवद्-आराधनं कृत्वा,
श्राद्धार्थात् अन्येनान्नेन वैश्वदेवं
चतुरो यज्ञांश् च पचनाग्नौ कृत्वा,
अ-कृत-ब्रह्म-यज्ञश् चेत् - तम् अपि कृत्वा,

श्राद्धोपयुक्त-पदार्थान् समीपतो निधाय,
स्नातान् आहूय आगतान् -

## पाद्यादि②

**उपवीती** - प्रत्येकं प्रत्युत्थाय "स्वामिनः! स्वागतम्" इति उक्त्वा,

> स्वामिनः!
> मार्ग-गति-मन-उपहति-शुद्ध्य्-अर्थम् इदं पाद्यं,
> इदम् आचमनीयम्

[[107]]

इति दत्वा,
अनन्त-गरुडादिभ्योऽन्यत् निवेद्य,
तेभ्यो अनिवेदितं भगवन्-मात्र-निवेदितं हविः,
तन्-मात्र-समर्पितं पाद्य-गन्ध-पुष्पादिकं च परिकल्प्य,

## औपसनाग्नि-सिद्धता②

कृत-प्रातर्-औपासनश् चेत्
आत्म-समिद्-आरोपणे लौकिकाग्नौ उपावरुह्य,
अ-कृत-प्रातर्-होमश् चेत्,

तम् अपि यथावत् कृत्वा,
द्विर् आचम्य,

# अनुज्ञा②

**प्राचीनावीती**,

> ओं
> समस्त-सम्पत्-समवाप्ति-हेतवः
> समुत्थितापत्-कुल-धूम-केतवः ।
> अपार-संसार-समुद्र-सेतवः
> पुनन्तु मां ब्राह्मण-पाद-पांसवः ॥

**उपवीती**, – ‘देवेभ्यो नमः’;
**प्राचीनावीती**, ‘पितृ-पितामह-प्रपितामहेभ्यो नमः’;

**उपवीती**, ‘विष्णवे नमः’ (इति तिलाक्षतैः यथार्हम् अभ्यर्च्य)

**प्राचीनावीती**,

> स्वामिनः!
> अस्मिन् दिवसे ... गोत्रं.. शर्माणं (मम) पितरम् उद्दिश्य
> प्रत्याब्दिक-श्राद्धं कर्तु-कामो ऽस्मि।
>
> > एतद्-देशकालयोः,
> > अस्मिन् गेहे वर्तमानानां पक्वापक्वानां पदार्थानां श्राद्धार्हता,
> > अस्या भूमेः, अस्य क्षेत्रस्य गया-तुल्यता,
> > मम च पितुः श्राद्धकरणे अधिकार-सम्पद् अस्तु
>
> इति भवन्तो महान्तोऽनुगृह्णन्तु

(इति प्रार्थ्य)

"तथास्तु; अधिकारसम्पदस्तु" - इत्यनुगृहीतः,

**उपवीती** -

> श्राद्धभूमिं गयां ध्यात्वा
> ध्यात्वा देवं गदाधरम् ।

**प्राचीनावीती** -

> वस्वादींश् च पितॄन् ध्यात्वा
> ततः श्राद्धं प्रवर्तये ॥

इत्युच्चार्य

"प्रवर्तय" इत्यनुज्ञातः

[[108]]

## सङ्कल्पः②

**उपवीती** - दर्भेष्वासीनः, दर्भान् धारयमाणः,
त्रिः प्राणान् आयम्य,
गुरु-परम्पराम् अनुसन्धाय
इष्टदेवतां च प्रणम्य ध्यात्वा,

**प्राचीनावीती**

> हरिर् ओं, तत्, श्रीगोविन्द ....
> अस्यां पुण्यतिथौ 1
> ... गोत्रस्य .. शर्मणः मम पितुः श्राद्धं करिष्ये

इति संकल्प्य ("कुरुष्व" - इत् अनुज्ञातः) -

> कृतञ्च करिष्यामि भगवन्
> नित्येन भगवत्-प्रीत्-अर्थेन
> महा-विभूति-चातुरात्म्य-भगवद्-वासुदेव-पादारविन्दार्चनेन
> पितुः श्राद्धेन
> भगवत्-कर्मणा भगवन्तं वासुदेवम् अर्चयिष्यामि ।

> भगवतो बलेन, भगवतो वीर्येण, भगवतस् तेजसा भगवतः कर्मणा भगवतः कर्म करिष्यामि, भगवतो वासुदेवस्य ।

इति मन्त्रम् अनुसन्धाय,

देवताभ्यः पितृभ्यश्च
महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै
नित्यम् एव नमो नमः ॥

इति श्लोकं (त्रिः) सङ्कीर्त्य सात्त्विकत्यागं कुर्यात् ।

> भगवान् एव स्वनियाम्य-स्वरूप-स्थिति-प्रवृत्ति-स्वशेषतैकरसेन मया
> स्वकीयैश् चोपकरणैः स्वाराधनैक-प्रयोजनाय
> परमपुरुषः सर्वशेषी स्व-शेष-भूतम् इदं पितुः प्रत्याब्दिकश्राद्धाख्यं कर्म
> स्वस्मै स्वप्रीतये स्वयमेव कारयति ।

[[109]]

---

1. आवाहन-अर्घ्य-संकल्प-
पिण्डान्न-त्याग-तर्पणे ।
अक्षय्यासनयोः, पाद्ये,
गोत्रं नाम च कीर्तयेत् ॥

# ०४ होमः①

## पूर्वाङ्गम्②

### अग्निप्रतिष्ठा③

अग्निप्रतिष्ठा

> प्राचीः पूर्वम् उदक्-सँस्थं
> दक्षिणारम्भम् आलिखेत् ।
> अथोदीचीः पुरःसँस्थं
> पश्चिमारम्भम् आलिखेत् ॥

अवाक्-करोऽभ्युक्ष्य,
तृणं निर्ऋत्यां निरस्य,
अप उपस्पृश्य,

व्याहृतीभिः अग्निं प्रतिष्ठाप्य,
उत्सृज्यते ऽवोक्षण-तोयशेषं प्राक्तोयम्।
अन्यत् निदधाति,
उदग् वा ।

ये पार्थिवासः पि॒तरो॒ ये अ॒न्तरि॑क्षे॒
ये दि॒वि ये वा मृता॑ बभू॒वुः ।
ते अ॒स्मिन् य॒ज्ञे सम॑वयन्ताम् ॥

इति सव्यानामिकाङ्गुष्ठाभ्यां दक्षिणतो भुवं स्पृष्ट्वा,

अग्निम् इद्ध्वा, परिसमूह्य,
अग्निं प्राग्-आदि +अप्रदक्षिणं परिस्तृणाति -
दक्षिणाग्रैः पित्र्येषु; दक्षिणान् अधरान्; उत्तरान् उत्तरान्,
उत्तरेणाग्निं प्राग्-अग्रान् दर्भान् संस्तीर्य।

### पात्रसादनादि③

एकैकशः पात्राणि प्रयुनक्ति -
दर्वीम्, आज्य-स्थालीं, वैकङ्कतीं प्रोक्षणीं, प्रणीतीम्,

इध्मम्, उपस्तरणार्थ-दर्वीं, बर्हिश् च।
दक्षिणम् इध्मम्, उत्तरं बर्हिः, हविःपात्रम्, अ-हविः-पात्रं*(=??)* च प्रयुज्य,
समौ अच्छिन्नाग्रौ दर्भौ प्रादेश--मात्रौ पवित्री-कुरुते;
तृणं काष्ठं वा अन्तर्धाय छिनत्ति ।

अप उपस्पृश्य, पवित्री-कृत्य, पात्राणि संस्पृश्य,

प्रोक्षणीम् आदाय, अपरेणाग्निं निधाय,
पवित्रान्तर्हितायाम् अप आनीय,
उत्तान-पाण्योर् अङ्गुष्ठोपकनिष्ठिकाभ्यां त्रिर् उत्पूय,

उत्तानानि पात्राणि त्रिः प्रोक्ष्य,
विस्रस्येध्मम् अपि,

अपरेणाग्निं पवित्रान्तर्हिते प्रणीतिपात्रे अप आनीय,
पूर्ववत् त्रिरुत्पूय,
समं प्राणैर् हृत्वा,
उत्तरेणाग्निम् अन्येषु दर्भेषु सादयित्वा,

# आज्य-निर्वापादि③

पवित्रम् आदाय,
आज्य-स्थाल्यां निधाय,
दर्भैः प्रच्छाद्य,
ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य,
आज्यं विलीनम् अपि विलाप्य,

[[110]]

अपरेणाग्निं पवित्रान्तर्हितायां आज्य-स्थाल्याम् आज्यं निरुप्य,
उदीचोऽङ्गारान् निरूह्य,
परिस्तरण-पात्र-सादनयोर् मध्ये तेष्व् अधिश्रित्य,

एकेन तृणेन ज्वलता अवद्योत्य,
बहिर् निरस्य,

द्वे दर्भाग्रे तृणं काष्ठं वा +अन्तर्धाय प्रच्छिद्य,
अप उपस्पृश्य,
प्रक्षाल्य,
*(आज्ये)* प्रत्यस्य,

अधोमुखाभ्यां ज्वलद्भ्यां तृणाभ्यां त्रिः पर्यग्नि कृत्वा,

निरूढाग्निश्_(=??)_ चेत् तत्रैव निक्षिप्य -
नो चेद् अन्यत्र निक्षिप्य,
_(आज्यपात्रम्)_ उदग् उद्वास्य,
अङ्गारान् अग्नौ प्रत्यूह्य,
दर्भास्तृते पश्चिमे निधाय,
उदग्-अग्राभ्यां पवित्राभ्यां पुनर्-आहारं प्रागारम्भं प्रागपवर्गं त्रिर् उत्पूय,

पवित्र-ग्रन्थिं विस्रस्य,
अप उपस्पृश्य,
प्राग्-अग्रम् अग्नौ प्रहरति ।

## दर्वी-संस्कारः③

येन जुहोति, तद् अग्नौ प्रतितप्य, जुहूम्

"वाचं प्राणम्" इति
जुहूम् अग्रैर् अन्तरतो ऽभ्याकारं_(=पुनः पुनः)_ प्राचीं,
मध्यैर् बाह्यतः प्रतीचीम्,
मूलैर् दण्डम् ५

इत्य्-आदि-प्रकारेण प्रत्येकं संमृज्य,
पुनः प्रतितप्य,
प्रोक्ष्य, निधाय,
दर्भान् अद्भिः संस्पृश्य
अग्नौ प्रहरति ।

## परिधि-स्थापनादि③

परिधीन् परिदधाति -
स्थविष्ठो मध्यमः,
अणीयान् द्राघीयान्_(=दीर्घतरः)_ दक्षिणार्ध्यः,
अणिष्ठो ह्रसिष्ठ उत्तरार्ध्यः -
एवं परिस्तरणान्तः सर्वान् परिधीन् परिधाय -

**उपवीती** -
द्वे आघारसमिधौ मध्यमं परिधिम् उपस्पृश्य

दक्षिणम् उत्तरम् अग्नौ आदधाति ।

**प्राचीनावीती** - परिध्यन्तः परिस्तरणोपरि तूष्णीं समन्तम् अप्रदक्षिणं परिषिच्य,
इध्ममाज्येनाभ्यज्य [[ध्म??]],

> अस्मिन् मम पितुः प्रत्याब्दिक-श्राद्ध-होम-कर्मणि
> ब्रह्मन्! इध्मम् आधास्ये ।

इति ब्राह्मणम् अनुज्ञाप्य,
दक्षिणहस्तेन सर्वाणि +इध्म-काष्ठानि युगपत् अग्नावाधाय -

## आघारः③

**उपवीती** - इतर-दर्व्या आज्यम् आदाय,
उत्तरं परिधि-सन्धिम् अन्ववसृत्य,
'प्रजापतिं' मनसा ध्यायन्न्
आघारम् आघारयति - 'प्रजापतय इदं न मम' ।

दक्षिणं परिधिसन्धिम् अन्ववसृत्य
'इन्द्रं' मनसा ध्यायन्न्
आघारम् आघारयति - 'इन्द्रायेदं न - मम'
इति उद्देशत्यागं कृत्वा,

[[111]]

## आज्यभागौ③

'ओम् अ॒ग्नये॒ स्वाहा॑" इति उत्तरार्ध-पूर्वार्धे (अग्नय इदं न मम) इति,
'ओं सोमा॑य॒ स्वाहा॑' इति दक्षिणपूर्वार्धे (सोमाय इदं न मम) इति,

'ओम् अ॒ग्नये॒ स्वाहा॑' (अग्नय इदं न मम) इति,
'ओं भूर्भुव॒स्सुव॒स्स्वाहा॑' (प्रजापतय इदं न मम) इति च मध्ये जुहोति ।

सर्वत्र दर्वीं मध्यमानामिकाङ्गुष्ठैरेव धृत्वा
देवतीर्थेन जुहोति ॥*(5)*

## आवाहनम्②

## वैश्वदेवम्③

उत्थाय स-यव-हस्तः,
‘विश्वान् देवान् आवाहयिष्ये' इति वैश्वदेविक-ब्राह्मणान् आपृच्छ्य,
‘आवाहय' इत्यनुज्ञातः -

अग्नेर् उतरत्तः,
युग्मेषु दर्भेषु प्राङ्मुखः

वि॑श्वदेवाश् **शृणुते॒मँ॑** ह॑वं मे
ये॑ अन्त॑रिक्षे य उप द्य॑वि **ष्ठ॑** ।
ये॑ अग्नि-जिह्वा॑ उत॑ वा य॑जत्रा
**आस॑द्यास्मि॑न्** बर्हि॑षि **मादयध्वम्** ॥

> आगच्छन्तु महाभागा
> विश्वेदेवा महाबलाः ।
> ये अत्र विहिताश् श्राद्धे
> सावधाना भवन्तु ते ॥

इति मन्त्राभ्यां

> ... गोत्रस्य .... शर्मणः पितुः
> प्रत्याब्दिकश्राद्धे पुरूरवार्द्रव-संज्ञकान्
> विश्वाख्य-दक्ष-प्रजापति-दुहितुर् उत्पन्नान् देवान् आवाहयामि

इत्यावाह्य

"(उक्तानां) विश्वेषां देवानां सयवम् इदमासनम्"
इति ऋजु-दर्भ-द्वयं साक्षतं दत्वा,

देवतीर्थेन यवोदकम् उत्सिञ्चति 1

[[112]]

# पैतृकम्③

**प्राचीनावीती** -
अग्नेर् दक्षिणतस् त्रिभिः (सप्तभिर्वा) दर्भैः कृतं
भुग्नं दक्षिणाग्रं निधाय,

सतिल-हस्तः
"पितृ-पितामह-प्रपितामहान् आवाहयिष्ये'

(इति पूर्ववद् आपृच्छ्य)
'आवाहय' (इत्य् अनुज्ञातः)

आयां॑त पितरस् सो॒म्या
ग॑म्भी॒रैः प॒थिभिः॑ पू॒र्व्यैः ।
प्र॒जाम् अ॒स्मभ्यं॑ ददतो*(=ददत + उ)* र॒यिञ् च॑
दीर्घायु॒त्वं च॑ श॒तशा॑रदं च ॥

> ... गोत्रस्य ....शर्मणः पितुः प्रत्याब्दिकश्राद्धे
> ... गोत्रान् .... शर्मणः वसु-रुद्रादित्य-स्वरूपान्
> अस्मत्-पितृ-पितामह-प्रपितामहान् आवाहयामि'

इति तिलैः पितृतीर्थेन आवाह्य,

स॒कृ॒दा॒च्छि॒न्नं ब॒र्हिर् ऊर्णा॑-मृदु ।
स्यो॒नं पि॒तृभ्यं॑स् त्वा भराम्य् अ॒हम् ।
अ॒स्मिन् सीं॑दन्तु मे पि॒तरं॑स् सो॒म्याः ।
पि॒ता॒म॒हाः प्रपिं॑तामहाश् चानु॒गैस् स॒ह ॥33॥

इति सतिलं भुग्नं दक्षिणाग्रं पितृतीर्थेनैव,

> .. गोत्राणां .... शर्मणां ... वसुरुद्रादित्यस्वरूपाणाम् अस्मत्-पितृ-पितामह-
> प्रपितामहानां स-तिलम् इदम् आसनम्

इति दत्वा

ऊर्जं॒ वहं॑न्तीर् अ॒मृतं॑ घृ॒तं
पयः॑ की॒लालं॑ परि॒स्रुं॑तम्।
स्व॒धा स्थं॑ त॒र्पयं॑त मे पि॒तॄन् ॥३४॥

इति पितृतीर्थेन2 तिलोदकं उत्सिञ्चेत् ॥

[[113]]

# वैष्णवम्③

३. **उपवीती** - विष्ण्व्-अर्थब्राह्मणम् अपि पूर्ववत् आपृच्छ्य,
अनुज्ञातः

*(बहु-देवता-सङ्ग्रहात्)* सह॑स्र*(~अनन्त)*शीर्षा **पु॑रुषः**।
सहस्राक्षः॑ सह॑स्रपात् ।
स॑ *(वक्ष्यमाणां विराजं)* भू॒मिं विश्व॒तो **वृत्वा**॑ ।
**अ॒त्यतिष्ठद् दशाङ्गु॒ल॒म्** । १

*(मुख-मूर्ध्नोर् अन्तरं दशाङ्गुलम्, वाचिक+अव्यक्त-कल्पनयोश् चेति केचित्।)*

> … गोत्रस्य …… शर्मणः पितुः प्रत्याब्दिकश्राद्धे
> श्राद्ध-संरक्षकं श्रीविष्णुम् आवाहयामि

इति आवाह्य,

> पुरु॑ष ए॒वेदँ सर्वं॑म् । यद्भू॒तं यच्च॒ भव्यं॑म् । उ॒तामृ॑त॒त्वस्येशा॑नः । यदन्ने॑नाति॒रोह॑ति ॥
> [[TODO:परिष्कार्यम्??]]

"विष्णोर् इदम् आसनम्",
इति ऋजु-दर्भ-द्वयं साक्षतं पूर्ववत् दत्वा,

यवोदकं उत्सिच्य,

# अन्नाहुतयः②

**प्राचीनावीती** -
"उद्ध्रियताम्, अग्नौ च क्रियताम्" इति ब्राह्मणान् आपृच्छ्य,
"काममुद्ध्रियतां, काम् अमग्नौ च क्रियताम्" इति विसृष्टः,

हविः-पात्रे भगवन्-निवेदिताद् अलवणात्
पक्वापक्वात् सर्वस्मात् किञ्चित् किञ्चिद् उद्धृत्य,

अ-हविः-पात्रे सलवणात् व्यञ्जनादिकात् किञ्चित् किञ्चित् उद्धृत्य

अग्नेर् उत्तरतः प्रतिष्ठितम् अभिघार्य,
सौकर्यार्थं पुरतो वा निधाय,
दर्व्याम् उपस्तीर्य हविषः,
द्विर् अवदाय (3 वत्सानां त्रिर् अवदाय),
पुनर् अभिघार्य,
अवदानान्य् एकीकृत्य

> ‘यन्मे पद्यतां’ .. शर्मणे अस्मत्पित्रे स्वाहा

इत्यादि-क्रमेण षड् आहुतीः
वामेन हविःपात्रं स्पृशन्
कृष्णायां मध्ये वा हुत्वा,
प्रत्येकं उद्देशत्यागं कृत्वा ॥

तत्प्रकारः,

[[114]]

यन् मे॑ मा॒ता प्रलु॑लोभ॒ चर॒त्य् अन॑नुव्रता,
तन् मे॒ रेत॑ः पि॒ता वृ॑ङ्क्ताम्*(=आच्छिद्य स्वीकरोतु)*।
आ॒भुर्*(←आभवतीति)* अ॒न्यो *(बलेर् दूरम्)* ऽव॑पद्यताम्।*(र५)*
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

> … शर्मणे अस्मत्पित्रे स्वाहा ॥ (पित्र इदं न मम)

यास् तिष्ठ॑न्ति॒, या धाव॑न्ति॒,
या आ॑र्द्रो॒घ्नीः*(=कूलादिघ्नीः)* परि॑त॒स्थुषी॑ः ।
अ॒द्भिर् विश्व॑स्य भ॒र्त्रीभि॑र्
अ॒न्तर् अ॒न्यं पि॒तुर् द॑धे॒, *(र५)*
ऽमुष्मै॒*(←नामनिर्देशः)* स्वाहा॑ ।

> … शर्मणे अस्मत्पित्रे स्वाहा ॥ (पित्र इदं न मम)

यन् मे॑ पिताम॒ही प्रलु॑लोभ॒ चर॒त्य् अन॑नुव्रता,
तन् मे॒ रेत॑ः पिताम॒हो वृ॑ङ्क्ताम्*(=आच्छिद्य स्वीकरोतु)*।
आ॒भुर्*(←आभवतीति)* अ॒न्यो *(बलेर् दूरम्)* ऽव॑पद्यताम्।
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

> … शर्मणे अस्मत् पितामहाय स्वाहा ॥ (पितामहाय इदं न मम)

अ॒न्तर् द॑धे॒ पर्व॑तैर्
अ॒न्तर् मह्या॑ पृथि॒व्या ।
आ॒भिर् दि॒ग्भिर् अ॑न॒न्ताभि॑र्
अ॒न्तर् अ॒न्यं पि॑ताम॒हाद् द॑धे॒
ऽमुष्मै॒ स्वाहा॑ ।

> … शर्मणे अस्मत् पितामहाय स्वाहा ॥ (पितामहाय इदं न मम)

यन् मे॑ प्रपिताम॒ही प्रलु॑लोभ॒ चर॒त्य् अन॑नुव्रता,
तन् म॒ रेतः॑ प्रपिताम॒हो वृ॑ङ्क्ताम्*(=आच्छिद्य स्वीकरोतु)*।
आ॒भुर्*(←आभवतीति)* अ॒न्यो *(बलेर् दूरम्)* ऽव॑पद्यताम्।
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

> ... शर्मणे अस्मत्प्रपितामहाय स्वाहा ॥ (प्रपितामहाय इदं न मम)

अ॒न्तर्द॑ध ऋ॒तुभि॑र्
अहोरा॒त्रैश् च॑ *(काल)*स॒न्धिभिः॑ ।
अ॒र्ध॒मा॒सैश् च॒ मासै॑श् च+
अ॒न्तर् अ॒न्यं प्र॑पिताम॒हाद् द॑धे॒
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

> ... शर्मणे अस्मत्प्रपितामहाय स्वाहा ॥ (प्रपितामहाय इदं न मम)

[[115]]

पूर्ववद् उपस्तीर्य,
द्विर् अवदाय,
अभिघार्य दर्वीम् अनुत्सृजन्न् -

**उपवीती**, हविः प्रत्यभिघार्य,
**प्राचीनावीती** - सकृद् अभिघार्य

ये चे॒ह पि॒तरो॒ ये च॒ नेह॒
याँश् च॑ वि॒द्म याँ उ॑ च॒ न प्र॑ वि॒द्म ।
अग्ने॒ तान् वेत्थ॒ यदि॒
ते जा॑तवेद॒स् तया॑ प्र॒त्तँ*(→प्रत्तया = प्रदत्तया)* स्व॒धया॑ मदन्तु॒
स्वाहा॑ ।

इति हुत्वा, 'ज्ञाताज्ञातपितृभ्य इदं न मम',

## आज्याहुतयः②

आज्याहुतयः

'स्वाहा पित्रे' इत्यादि षडाज्याहुतीर् जुहोति ॥
पञ्चानां पिता देवता, अन्तिमस्य कव्यवाहनोऽग्निः ॥

तत्-प्रकारः -

१. स्वाहा॑ पि॒त्रे । (पित्र इदं न मम)
२. पि॒त्रे स्वाहा॑ । (पित्र इदं न मम)
३. स्वाहा॑ पि॒त्रे । (पित्र इदं न मम )
४. पित्रे॒ स्वाहा॑ । (पित्र इदं न मम )
५. स्व॒धा स्वाहा॑ । (पितृभ्य इदं न मम)
६. अ॒ग्नये॑ कव्य॒वाह॑नाय स्व॒धा स्वाहा॑ । (अग्नये कव्यवाहनाय इदं न मम)

# स्विष्टकृत्②

**उपवीती** -
दर्व्याम् उपस्तीर्य
प्रधानाहुत्य्-अधिकम् उत्तरार्धात् सकृत् अवदाय (पञ्चावत्ती चेत् द्विरवदाय),
द्विर् अभिघार्य,
'अ॒ग्नये॑ स्विष्ट॒कृते॒ स्वाहा॑' इत्य्
असंसक्तम् इतराभिर् आहुतिभिर् उत्तर-पूर्वस्यां जुहोति ।
(अग्नये स्विष्टकृत इदं न मम) ।

[[116]]

# अहविष्यहोमः②

**प्राचीनावीती**
दर्व्याम् उपस्तीर्य,
अहविष्यं सकृत् अवदाय,
अभिघार्य,
उत्तर-भस्मनि अग्नौ ‘स्वाहा’कारेण जुहोति; (हुतदेवताभ्य इदं न मम) ।

# लेपकार्यम्②

आज्य-स्थालीम् उत्तरतः, प्रधान-दर्वीं दक्षिणत, इतरन् मध्ये कृत्वा,
उत्तरतः पूर्वास्तीर्णे पात्र-सादनार्थं बर्हिः सर्वम् आदाय,
प्रधान-दर्व्याम् अग्रम् - इतरस्यां मध्यम् - आज्यस्थाल्यां मूलम्
एवं त्रिर् अक्त्वा,

तृणम् एकं प्रज्ञातं *(पार्श्वतो??)* निधाय,

प्रधान-दर्व्यां दक्षिणोत्तराभ्यां पाणिभ्यां मूलं निधाय,
सव्यं निरस्य,
दक्षिणं तिर्यञ्चं धारयित्वा,

अग्रम् उद्यम्य प्रहृत्य,
मध्यम् उद्यम्य प्रहृत्य,
मूलम् उद्यम्य प्रहृत्य,
तृणं प्रहृत्य,

तर्जन्या अग्निं त्रिर् निर्दिश्य,
अग्निम् अञ्जलिना अभिमन्त्र्य,
दक्षिण-हस्तेन भूमिं स्पृष्ट्वा

# उत्तराङ्गम्②

# परिधिप्रहरणम्③

मध्यमं परिधिं प्रहृत्य,
इतरौ पाणिभ्याम् आदाय
उत्तरार्धस्याग्रम् अङ्गारेषु +उपोहति,
दक्षिणम् उपरि कृत्वा प्रहरति ।

# संस्रावः③

दक्षिण-वाम-हस्ताभ्यां प्रधानाप्रधान-दर्वीभ्याम् आज्यम् आदाय
प्रधानोत्तरया दर्व्या सँस्रावं जुहोति । ('स्वाहा') वसुभ्यो रुद्रेभ्य आदित्येभ्यः सँस्रावभागेभ्य इदं न मम ।

# प्रायश्चित्ताहुतयः③

**उपवीति** – प्राणान् आयम्य

> … अस्मिन् मम पितुः (प्रत्याब्दिक) श्राद्ध-होम-कर्मणि
> मन्त्र-तन्त्र-देवता-विपर्यास-न्यूनातिरेक-स्वराक्षर-भ्रंष-प्रायश्चित्तार्थं
> सर्वप्रायश्चित्ताहुतीर् होष्यामि,
> प्राणायामञ्च करिष्ये

इति सङ्कल्प्य

▼ *मूल-प्रस्तुतिः*

ओं" भू"र् भु"वस् सु"वस् स्वा"हा ॥
(प्रजा"पतय इदं" न" म"म) ॥१॥

अ"नाज्ञातयँ् य"द् आ"ज्ञातम् ।
यज्ञ"स्य **क्रिय"ते** मि"थु ।
अ"ग्ने त"दस्य **कल्पय** ।
त्वँ" हि" **वे"त्थ** यथातथ"म् । पु"रुषसम्मितो यज्ञः" ।
यज्ञ७" पु"रुषसम्मितः ।
अ"ग्ने त"दस्य **कल्पय** ।
त्वँ" हि" **वे"त्थ** यथातथ"म् । य"त्पाकत्रा" म"नसा दीन"दक्षा न" ।
यज्ञ"स्य मन्व"ते म"र्तासः ।
अग्नि"ष्ट"द्धो"ता क्रतु-वि"द् **विजान"न्** ।
य"जिष्ठो देवाँ" ऋतुशो" **यजाति** ॥115॥ त्व"न् नो अग्ने व"रुणस्य विद्वा"न्
देव"स्य हे"डो" *(=क्रोधो )* ऽव यासिसीष्ठाः *(=यक्षीष्ठाः)* ।
य"जिष्ठो *(हविर्)*व"ह्नितमश् शो"शुचानो *(=देदीप्यमानः)*
वि"श्वा द्वे"षाँसि प्र" मुमुग्ध्य् अस्म"त् ।

*(अग्नीवरुणाभ्याम् इदं न मम)* स" त्व"न् नो अग्ने ऽवमो" *(=मूलभूतो)* **भव**+ऊती" *(त्या)*
*("अग्निरवमो देवतानां विष्णुः परमः" इति ब्राह्मणम्)*
ने"दिष्ठो *(=अन्तिकतमो)* अस्या" उष"सो व्युष्टौ *(=व्युष्टायाम्)* ।
**अ"व यक्ष्व** नो व"रुणँ, **र"राणो**
**वीहि"** *(=खाद)* मृडीकँ" *(=सुखयितारं [हविः])* सुह"वो न **एधि** ।

*(अग्नीवरुणाभ्याम् इदं न मम)*

# व्याहृतिहोमाः③

▼ ***मूल-प्रस्तुतिः***

(ओं") भू"स् स्वा"हा ॥ (अग्न"य +इदं" न" म"म)

(ओं") भु"वस् स्वा"हा ॥ (वाय"व +इदं" न" म"म)

(ओं") सु"वस् स्वा"हा ॥
(सू"र्याय +इदं" न" म"म)

(ओं) भू"र् भु"वस् सु"व स्स्वा"हा ॥
(प्रजा"पतय +इदं" न" म"म)

## पूर्णाहुति-प्राणायामौ③

> ओं विष्ण॑वे॒ स्वाहा॑ ॥ (विष्णव इदं न मम) ॥११॥

इति पूर्णाहुतिः

प्राणायामः ।

[[118]]

## परिषेचनम्, प्रणीताविमोकः③

**प्राचीनावीती**,
तूष्णीम् अप्रदक्षिणं परिषेचनं, प्रणीतावोक्षणम् ।

प्रणीतिपात्रं पश्चान् निधाय,
प्रणीतासु अपः अविच्छिन्नधारया आनीय,
‘प्राच्यां' इत्यादिक्रमेण (प्राच्यां, दक्षिणायां, प्रतीच्याम्, उदीच्याम्, ऊर्ध्वायां, भूमौ)
प्रतिदिशं सकृत् व्युत्सिच्य,

स॒मु॒द्रं व॒ः प्रहि॑णोमि॒
स्वां॑ योनि॒म् अपि॑ गच्छत ।
अच्छि॑द्रः प्र॒जया॑ भूयास॒ं
मा परा॑ सेचि॒ मत् पयः॑ ॥ (9)

आत्मानं प्रोक्षयेत् ॥

## उपस्थानानि③

**उपवीती** - ब्रह्मोद्वासनम्।
"अग्ने नयेति" उपस्थानम् ।

अ॑ग्ने **न॑य** सुप॑था **राये॑** अस्मा॑न्
वि॑श्वानि देव वयु॑नानि*(=ज्ञानानि)* विद्वा॑न् ।
**युयोध्य्***(=अपनय)* अ॒स्मज्-जुहुराण॑म्*(=कुटिलकारि)* ए॑नो
भू॑यिष्ठान् ते **न॑म-उक्तिवँ॒ विधेम** ॥

(अग्नये नमः)

▼ *मूल-प्रस्तुतिः*

मन्त्रहीनं क्रियाहीनं
भक्तिहीनं हुताशन ।
यद्धुतं तु मया देव
परिपूर्णं तदस्तु ते ॥

▼ *मूल-प्रस्तुतिः*

प्रायश्चित्तान्य् अशेषाणि
तपः कर्मात्मकानि वै ।
यानि तेषाम् अशेषाणां
कृष्णानुस्मरणं परम् ॥

(कृष्ण कृष्ण कृष्ण॥)

इत्युक्त्वा, प्रणम्य अभिवाद्य,

**प्राचीनावीती** -

> पिता पितामहश् चैव
> तथैव प्रपितामहः ।
> मम तृप्तिं प्रयान्त्व् अद्य
> होमाप्यायित-मूर्तयः ॥

> स्वामिनः! अद्यानुष्ठिते मम पितुः (प्रत्याब्दिक)-श्राद्ध-होम-कर्मणि
> मन्त्रलोपे क्रियालोपे द्रव्यलोपे नियमलोपे सत्य् अपि
> सर्वं यथाशास्त्रानुष्ठितं भूयाद् इति भवन्तो ऽनुगृह्णन्तु

इति प्रार्थना ।
"तथाऽस्तु" इति प्रतिवचनम् ॥

[[119]]

---

1. सर्वं देवतीर्थेन देवोपचारं दद्यात् ।

2. पित्रुपचारं सर्वं पितृतीर्थेन कुर्यात्

3.

> 'हविषो मध्यात्, अङ्गुष्ठ-पर्व-मात्रम् अवदानं
> तिरश्चीनम् अवद्यति*(=कर्तयति)* ।
> पूर्वात्, द्वितीयम् अनूचीनं चतुर्-अवत्तिनः*(=अवदातारः)* पश्चार्धात्,
> तृतीयं पञ्चावत्तिनः'

इति प्रकारेण वदाय

# ०५ भोजनम्①

## आसनम्②

**उपवीती** –

वैश्वदेविकहस्ते जलं दत्वा

> .... गोत्रस्य .... शर्मणः पितुः श्राद्धे
> पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानाम् इदम् आसनम्

इति सयवम् ऋजु-दर्भ-द्वयं दक्षिण-पार्श्वे दत्वा,
पुनरपो दत्वा,

> .... गोत्रस्य.... शर्मणः पितुः प्रत्याब्दिकश्राद्धे
> विश्वदेवार्थे भवता क्षणः कर्तव्यः

इति दक्षिणेन दक्षिण-हस्तं निर्-अङ्गुष्ठं गृहीत्वा
ऋजु-दर्भ-द्वयं दत्वा निमन्त्र्य,
"ओं तथा" इति प्रत्युक्ते,
'प्राप्नोतु भवान्' इति वदेत् -
'प्राप्नवानि' इति प्रतिवचनम् ।

**प्राचीनावीती** -
एवं पित्रादीन् भुग्न-दर्भ-दान-पुरस्सरं वृणुयात् ॥

## पाद-प्रक्षालनम्②

## मण्डले③

गृह-द्वार-समीपतो भवनस्य अग्रतः
संमार्जितायां गोमयेनोपलिप्तायां भूमौ
गोमय-सहित-गोमूत्रेण
+उत्तरे देवानां पाद-प्रक्षालनार्थं
चतुर्-अश्रं वितस्ति-प्रमाणं उदक्-प्लव-मण्डलं कृत्वा,

मध्ये षड्-अङ्गुलम् अन्तरालं विहाय,
दक्षिणे पितॄणां पाद-प्रक्षालनार्थे

वर्तुलं वितस्ति-प्रमाणं दक्षिणाप्लव-मण्डलं कृत्वा,

दर्भैः साक्षतैः सतिलैश् च क्रमेण,
मण्डलयोः परिस्तरणं कुर्यात् ।

देवतार्थं सर्वम् **उपवीती** -
पित्र्यं सर्वं **प्राचीनावीती** कुर्यात् ।

## प्रक्षालनम्③

उत्तरे साक्षतान् पूर्वाग्रान् युग्मान् कुशान् बहून्,
दक्षिणे सतिलान् दक्षिणग्रान् भुग्नान्
आसनार्थं नाम-गोत्रोच्चारण-पूर्वकं विन्यस्य,

उत्तरे सपुष्पगन्धैः अक्षतैरभ्यर्च्य,
दक्षिणे गन्ध-तिलैर् अभ्यर्च्य,

दैविक-ब्राह्मणं मण्डल-समीपत उपवेश्य,
आदित्याभिमुखम् आसने उपविश्य,
गो-घृत-मिश्र-गोमयेन पाद-पृष्ठम् अनुलिप्य,

शं᳚ नो देवी᳚रभि᳚ष्टय
आ᳚पो भवन्तु पीत᳚ये ।
शं᳚ यो᳚र्*(=[अ]मिश्रणाय)* अभि᳚ स्रवन्तु नः ॥ ०४॥

इति मन्त्रेण,
स-पुष्पाक्षत--स-दर्भाग्राभिर् अद्भिः

[[120]]

> 1 'विश्वे देवाः !
> इदं वः पाद्यं स्वाहा'

इति देवानां पाद्यं समर्प्य,

> ओं
> समस्त-सम्पत्-समवाप्ति-हेतवः
> समुत्थितापत्-कुल-धूम-केतवः ।
> अपार-संसार-समुद्र-सेतवः
> पुनन्तु मां ब्राह्मण-पाद-पांसवः ॥

इति पादौ गुल्फ-पर्यन्तं मण्डले प्रक्षालयेत्।

कराव् अपि कूर्पर-पर्यन्तं क्षालयित्वा
हस्तौ प्रक्षाल्य,

**प्राचीनावीती** -
दक्षिणे पित्रर्थं ब्राह्मणं पूर्ववत् उपवेश्य,
गोमयेन अनुलिप्य

शन् नों दे॒वीर् अ॒भिष्ट॑ये ।
आपों भवन्तु पी॒तयें ।
शयॅ्योर् अ॒भि स्र॑वन्तु नः ।

इति मन्त्रेण,
स-तिल-पुष्पादर्भाग्र*(नञ् विवक्षितम्??)*-गन्धाभिर् अद्भिः पूर्ववत्

> गोत्रादियुक्तस्य श्राद्धे .... गोत्राः .... शर्मणः
> .... रूपाः
> पितृपितामहप्रपितामहाः इदं वः पाद्यं
> स्वधा

इति पितृतीर्थेन समर्प्य
पूर्ववत् प्रक्षाल्य,

उपवीति विश्वे देववत्
विष्णोर् अपि कुर्यात्।

पित्र्यं सर्वम् उपचारम्
आसीनः, सव्यं जान्व् आच्य (आसन-व्यतिरिक्ते),
मन्त्रान्ते स्वधा-शब्दम् अपि +उक्त्वा कुर्यात् ।

दैवं सर्वम्
आसीनः, दक्षिणं जान्व् आच्य *(आसन-व्यतिरिक्ते)*
स्वाहान्तं कुर्यात् ।

आचमनात् पूर्वम् अनर्हत्वात्
नात्र पादोदक-ग्रहणम् ॥

## आसन-दानम्②

पादौ प्रक्षाल्य,
मण्डलोत्तरे आचम्य
तान् अपि आचामय्य

[[121]]

**प्राचीनावीती**

अप॑हता॒ असु॑रा॒ रक्षाँ॑सि
पिशा॒चा ये क्षय॑न्ति पृथि॒वीम् अनु॑ ।
अ॒न्यत्रेतो॑ गच्छन्तु॒ यत्रैषां॑ गत॒ं मन॑ः ॥ उ॒द् ईरताम् अ॒वर उ॒त् प॒रास
उ॒न् मध्यमाः॒ पित॒रः सोमिया॒सः
अ॒सुं य॒ ईयु॒र् अवृका॒ ऋतज्ञा॒स्
ते॒ नो अवन्तु पित॒रो ह॒वेषु

इति भुक्ति-देशे तिलान् सिकतांश्च प्रकीर्य -

**उपवीती** - वैश्वदेविकहस्ते जलं दत्वा,

> .. गोत्रस्य ... शर्मणः .... पितुः श्राद्धे
> पुरूरवाद्रसंज्ञकानां विश्वेषां देवानां भोजनस्थाने
> इदम् आसनम्

इति +आसनार्थं सयवम् ऋजु-दर्भ-द्वयं दत्वा,

आसनं सव्येन अभिमृश्य
दक्षिणेन ब्राह्मण-जानु +अवलम्ब्य
'आस्यताम्' इत्युक्त्वा उपवेशयेत् ।

(देवान् प्राङ्मुखान्,
पितॄन् उदङ्मुखान् प्राग्-अपवर्गान्
*(पश्चान्मुखान्?)* दक्षिणापवर्गान् वा +उपवेशयेत्, आचारात् ॥)

# अर्चनम्②

अ॒र्चत प्र॒+अर्चत *(नराः)*
प्रि॒यमेधासो *(=प्रियमेध-सम्बद्धाः)* अ॒र्चत ।
अ॒र्चन्तु पुत्रका॒ उत॒
पु॒रं न॒ धृष्णु॒ *(=धर्षणशीलः)* +अर्चत ॥

इति मन्त्रेण ‘इदं वो अर्चनं’

(देवानां दक्षिणपादे, सव्यपादे,
दक्षिणजानुनि, सव्यजानुनि,
दक्षिणांसे, सव्यांसे,
मूर्ध्नि च, क्रमेण अर्चयेत् ।)

> गन्धद्वारां दुराधर्षां नित्यपुंष्टां करीषिणीम् ।
> ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

[[122]]

> ... गोत्रस्य ... शर्मणः पितुः प्रत्याब्दिकश्राद्धे पुरूरवार्द्रव-संज्ञक-विश्वेदेवाः !
> यथा-भागशः अमी वः सकुङ्कुम-कर्पूरागरु-चम्पक-पद्मक-मिश्रा गन्धाः

इति दद्यात् ।

(देवब्राह्मणोपचारं सर्वम् उदङ्मुखः कुर्यात् ।
पित्र्यं दक्षिणामुखः कुर्यात् ।)

ओषधयः प्रतिमोदध्वम्
एनं पुष्पावतीः सुपिप्पलाः ।
अयं वो गर्भ ऋत्वियः
प्रत्नँ सधस्थम् आसदत् ॥

इति मन्त्रेण
पूर्ववत् ‘इमानि पुष्पाणि, श्रीतुलसीदलानि च’ इति दद्यात् ॥

धूर् *(=धूर्स्स्थ हिंसको ऽग्निः)* असि ।

*('एष वै धुर्योग्निः' (तै.ब्रा. 3.2.4) इति ब्राह्मणम्)*

धूर्व *(=नाशय)* धूर्वन्तम् *(=हिंसकं)*।
धूर्व *(=नाशय)* तं यो ऽस्मान् धूर्वति।
तन् धूर्व यवँ वयन् धूर्वामः । त्वन् देवानामसि ।

घ्राण-तृप्त्य्-अर्थम् अयं वो धूपः ।

**उद्दीप्यस्व** जातवेदो
**ऽपघ्नन्** निर्ऋतिं मम ।
पशूँश्च मह्यम् **आवह**
जीवनञ् च दिशो दिश ॥

‘अवलोकनार्थम् अयं वो दीपः'

यु॒वा सुवा॑साः प॑रिवीत *(यूप)* **आ॑गात्**
स॑ उ **श्रे॑यान् भवति** जा॑यमानः ।
तं॑ धी॑रासः कव॑य **उ॑न्नयन्ति**
स्वाध्यो३॑ *(=सु+आ+धियः)* म॑नसा देवय॑न्तः *(=देवकामाः)* ॥

आच्छादनार्थम् इदं वस्त्रं
(अभावे यज्ञोपवीतं, दर्भान् वा)
पवित्रार्थम् इमौ दर्भौ ।
‘शेषोपचारार्थे इमे अक्षताः' इति पूर्ववद् अर्चयेत् ॥

**प्राचीनावीती** -
(एवमेव पितॄणाम् आसनार्थे भुग्न-दर्भान्,
मूर्ध्नि, सव्यांसे, दक्षिणांसे च
सव्यजानुनि, दक्षिणजानुनि,
सव्यपादे, दक्षिणपादे च
तिलैर् अर्चनम् । )

[[123]]

गन्धंद्वा॒राम् इत्यादि सर्वं पूर्ववत्॥

**उपवीती** -

विश्वेदेववत् विष्णोर् अर्चनम्।

## पात्रस्थापनम्②

आचम्य,
घृत-मिश्रेण गोमयेन, प्रणवेन चतुर्-अश्र-मण्डलं कृत्वा,
पात्रेषु जलं निस्राव्य,
हस्तेन संमृज्य,
पुनः प्रक्षाल्य,
'इदं भोजन-पात्रासनम्' इति दर्भान् निधाय,

मण्डलेषु देवादि-क्रमेण पात्राणि, उपपात्राणि च निधाय
(प्रधानपात्रे उपपात्रम् आज्य-पात्रादिकं च न निक्षिपेत्)

## परिवेषणम्②

पात्रेषु आज्यम् उपस्तीर्य,
प्रथमं हुत-शिष्टम् अन्नं पितृपात्रे **प्राचीनावीती** -
देवतीर्थेन परिविष्य,

(ततः क्रमेण सर्वत्र +**उपवीत्य्** एव
देवानाम् उदङ्मुखः, पितॄणां दक्षिणामुखः)

पितॄन् ध्यायन्,
अन्न-पायस-सूपापूप-क्रमेण दर्व्य्-आदि-द्वारा स-पवित्र-हस्ताभ्यां परिविष्य,

**उपवीति** -

'रक्षोघ्नमन्त्रपठनं करिष्ये' इति सङ्कल्प्य,

▼ ***भास्करोक्त-विनियोगः***

तैत्तिरीयारण्यकम् ॥
अथ द्वितीयः प्रपाठकः ॥
अथ स्वाध्यायब्राह्मणं काठकशेषमारभ्यते ।
उक्तं च -

> स्वाध्यायब्राह्मणं काण्डं
> काठके पठितो विधिः ।

इति ।

ऋषिर्ब्रह्मा स्वयम्भूर् नाम ।
तत्र “स्वाध्यायोऽध्येतव्यः” इत्यादौ यज्ञोपवीतविधानार्थो ऽयम् अनुवाकः[दः] ।
एतेनैव सिद्धे “निवीतं मनुष्याणां” इत्यादि-विधानं
तद्-भ्रेषे श्रौतप्रायश्चित्तार्थम् ।

▼ ***मूल-प्रस्तुतिः***

स॒ह वै दे॒वाना॒ञ् चासु॑राणाञ् च य॒ज्ञौ प्रत॑ताव् आस्तावँ॒,
"व॒यँ स्व॒र्गल्ँ लो॒कम् एं॑ष्यामो, व॒यम् एं॑ष्याम॒" इति।

▼ ***भट्टभास्कर-टीका***

1सह वा इति ॥ सह वै यज्ञौ प्रततौ आरब्धौ आस्तां देवानामसुराणां च वयं स्वर्गं लोकं स्वामित्वेन एष्याम इति कृत्वा । यदा देवानां प्रवृत्तिरासीत् तदा असुराणामपि वयं स्वर्गं लोकमेष्याम इत्यासीत् । एवमन्योन्याभिभवेनैव यज्ञौ युगपदास्ताम् ।

▼ *मूल-प्रस्तुतिः*

ते ऽसु॑रास् स॒न्नह्य॒ सह॑सै॒वाच॑रन्।
ब्रह्म॒चर्ये॑ण॒ तप॑सैव दे॒वाः।

▼ *भट्टभास्कर-टीका*

तत्र तेऽसुराः सन्नह्य कतोत्साहाः कृतसन्नाहाः सहसा भुजबलमात्रेणैव आचरन् यागमारब्धवन्तः । ते देवास् तु ब्रह्मचर्यात्मना तपसा इत्थम्भूता एव यथोक्तं यज्ञमाचरन् । ब्रह्म व्रतं शास्त्रीयो नियमः यज्ञोपवीतीत्यादि, तस्य चरणं ब्रह्मचर्यम् । 'गदमदचरयमश्चानुपसर्गे' इति यत् ।

▼ *मूल-प्रस्तुतिः*

तेऽसु॑रा अमुह्यँ॒स्, ते न प्राजा॑नँ॒स्, ते परा॑ऽभव॒न्, ते न स्व॒र्गल्ँ लो॒कमा॑य॒न्।

▼ *भट्टभास्कर-टीका*

ततस् ते असुरा अयथोक्तमाचरन्तो अमुह्यन् वैचित्यमगमन् । मुह वैचित्ये । ततो न किञ्चित् कर्तव्याकर्तव्यम् अजानन् ।
ततश्चैव ते पराभवन् विनष्टा अभवन्, प्रारब्धकर्मफलालाभो विनाशः । ततस् ते स्वर्गं लोकं नायन्न गताः । अय गतौ ॥

▼ *मूल-प्रस्तुतिः*

प्रसृ॑तेन॒ वै य॒ज्ञेन॑ दे॒वास् स्व॒र्गल्ँ लो॒कम् आ॑य॒न्।
अप्रसृ॑ते॒नासु॑रा॒न् परा॑भावय॒न्।

▼ *भट्टभास्कर-टीका*

2अथ कीदृशः पुनस्स यज्ञः येन देवास्स्वर्गं लोकमायन् यद्रहिताश्चासुराः पराभवन् ? अत्राह - प्रसृतेनेति ॥ प्रसृतेन प्रकृष्टसरणेन प्रशस्तगमनेन यज्ञेन इष्ट्वा देवाः स्वर्गं लोकं गताः, नप्रसृतेन प्रसृतविपरीतेन यज्ञेनेष्टवतोऽसुरान् पराभावयन् । नप्रसृतमप्रसृतं नलोपाभावश्छान्दसः । असुराः पराभूता इत्यर्थः ॥

▼ *मूल-प्रस्तुतिः*

प्रसृ॑तो ह॒ वै य॑ज्ञोपवी॒तिनो॑ य॒ज्ञो,
ऽप्र॑सृतो ऽनु॑पवी॒तिनः।
यत्किञ् च॑ ब्राह्म॒णो य॑ज्ञोपवी॒त्य् अधी॑ते॒
यज॑त ए॒व तत्।
तस्मा॑द् यज्ञोपवी॒त्य् ए॑वाधी॑यीत
या॒जये॒द् यजे॑त वा।

▼ *भट्टभास्कर-टीका*

3कः पुनस्तर्हि प्रसृतो यज्ञ इत्याह - यज्ञोपवीतिनो यज्ञः प्रसृतः प्रसृतगुणकः । यज्ञोपवीतस्य लक्षणमिदानीमेव वक्ष्यते । अनुपवीतिनो ऽयज्ञोपवीतिनः यज्ञोपवीतिविपरीतस्य यो यज्ञः सोऽप्रसृतः प्रसृतगुणरहितः । 'देवलक्ष्ममेव तत् कुरुते' इति श्रुतेर् यज्ञोपवीतस्य यज्ञसाधनत्वात् तद्वतो यज्ञः प्रसृतः, इतरस्साधनवैकल्येन अयज्ञत्वादप्रसृतः ।

तस्माद् यत्किञ्च ब्राह्मणो यज्ञोपवीतवान् अधीते अध्ययनेनार्थमवबुध्यते तत्तेन यजते एव, न केवलमयमधीते नार्थं जानाति, अपितु यजत एव ।
तस्माद्यज्ञोपवीत्येव अध्ययनं यजनं याजनं च कुर्याद् यज्ञस्य प्रसृत्यै प्रसृतगुणकत्वाय ॥

▼ *मूल-प्रस्तुतिः*

य॒ज्ञस्य॒ प्रसृ॑त्या॒
अजि॑नव्ँ॒ वासो॑ वा
दक्षिण॒त उ॑प॒वीय॒
दक्षि॑णं बा॒हुम् उद्-ध॑र॒ते,
ऽव॑ धत्ते स॒व्यम्
इति॑ यज्ञोपवी॒तम् ए॒तद् ए॒व।

▼ *भट्टभास्कर-टीका*

4अथ कथं नाम यज्ञः प्रसृतस्स्यादिति - अजिनं वासो वेति द्रव्यविधिः । अथ यज्ञोपवीतस्य लक्षणमाह - दक्षिणत उपवीय देहस्यदक्षिणमर्धमुपवीय उपच्छाद्य । व्येञ् संरवणे, ल्यपि सम्प्रसारणे 'हलः' इति दीर्घः ।
स च न सर्वात्मना उपच्छाद्यः, अपि तु प्रागन्तावीतं दक्षिणमर्धं कृत्वा दक्षिणं बाहुमुद्धरते उपरि करोति सव्यम् अवधत्ते अधस्तात्करोति स्थापयति इत्येतद् यज्ञोपवीतं यज्ञसाधनमुपवीतं देवसम्बन्धीत्यर्थः ।

▼ *मूल-प्रस्तुतिः*

विप॑रीतं प्राचीनावी॒तँ
सव्ँ॒वीतं॑ मानु॒षम् । 1 ।

▼ *भट्टभास्कर-टीका*

एतदेव विपरीतं प्राचीनावीतं यथा सव्यत उपवीय सव्यं बाहुमुद्धरते अवधत्ते दक्षिणमिति । सञ्ज्ञेयं 'प्राचीनावीती निर्वपति' इत्याद्यर्थम् । अन्वर्था चेयं सञ्ज्ञा, प्राचीनस्य उपवीतस्य आवीतम् आवेष्टनरूपं विपरीतात्मकत्वादिति । तेन पित्र्यमुक्तं भवति दैवविपरीतत्वात्पित्र्यस्य । संवीतं समं वीतम् अंसद्वयावलम्बनेन वीतं संवीतम् । उभावपि बाहू यत्राधः क्रियते तत्

संवीतं मानुषं मनुष्याणां स्वं भवति ॥
इत्यारण्यके द्वितीये प्रथमोनुवाकः ॥

[[124]]

▼ *मूल-प्रस्तुतिः*

---

रक्षाँसि ह वा पुरोऽनुवाके तपोग्रम् अतिष्ठन्त।
तान् प्रजापतिर् वरेणोपामन्त्रयत।
तानि वरम् अवृणीत - "आदित्यो नो योद्धा" इति।
तान् प्रजापतिर् अब्रवीद् - "योधयध्वमि"ति।
तस्माद् उत्तिष्ठन्तँ ह वा तानि रक्षाँस्यादित्ययँ योधयन्ति यावदस्तमन्वगात्।

▼ *भट्टभास्कर-टीका*

---

अथ स्वाध्यायात्प्राग्भावित्वादादावेव सन्ध्योपासनविधिं तावदाह - रक्षांसीति ॥ पुरोऽनुवाके पूर्वस्मिन्काले । अनु पश्चादुच्यत इत्यनुवाकः । इत्थं पूर्वमासीदिति यस्सर्वदाऽनूच्यते स कालः पुरोऽनुवाकः, पुराकल्प इति यावत् । तत्र रक्षांसि हवा हवार्थं युद्धार्थं 'सुपां सुलुक्' इति चतुर्थ्या आकारः । यद्वा - हवेति निपातसमुदायः प्रसिद्ध्यर्थः । वैशब्दसमानार्थो वा हवाशब्दः । तपो ऽग्रं श्रेष्ठं तीव्रम् अतिष्ठन्त आस्थितवन्तः । आस्थाने तिष्ठतिर्वर्तते । व्यत्ययेनात्मनेपदम् । यद्वा - 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम् । तीव्र तपः प्रकाशितवन्तः । अन्तर्भावितण्यर्थोऽयम् । तपसश्च अनुष्ठेयत्वेनाज्ञीप्स्यमानत्वात् 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' इति चतुर्थ्यभावः । अन्य आह - पुरोऽनुवाकः प्रातरनुवाकः । तेन चाग्निष्टोमो लक्ष्यते - यज्ञे वर्तमानास्तपः कृतवन्त इति । अपर आह - पूर्वस्यां दिश्यनूच्यमाने देशे पुरोऽनुवाके कुरुक्षेत्रे इति । अथ तान् तानि रक्षांसि । लिङ्गव्यत्ययः । यद्वा - शेर्लोपेऽपि नुम् प्रवर्तते । प्रजापतिर् वरेण देयेन उपामन्त्रयत वरं वृणीध्वमिति रहस्युपच्छन्दितवान् । अथ तानि वरमवृणीत अवृणत । वर्णव्यत्ययेन ईकारः । वचनव्यत्ययो वा । वरमाह - आदियो नो ऽस्मान् योद्धै योधयेत्, वयं च तं योधयेम इति । प्रजापतिश् च अब्रवीद् योधयध्वमिति । युधेर्लेटि शपो लुकि 'छन्दस्युभयथा' इति तिङ आर्धधातुकत्वाद्गुणः । टेरेत्वे 'वैतोऽन्यत्र' इत्य् ऐकारे कृते संहितायामायादेशे 'लोपश्शाकल्यस्य' इति लोपः । ण्यन्तादेव वा लेटि पूर्ववदार्धधातुकत्वेन णिलोपः । 'बुधयुधनश' इति परस्मैपदं व्यत्ययेन न प्रवर्तते । यो मन्यते 'अस्तु' इत्यध्याहारेण आदित्योऽस्माकं योद्धाऽस्त्विति, तस्यापि संहितायां गुणाभावाय यतितव्यमिति नाश्वासः । यस्मादेवं वरमलभन्त तस्माद्वरबलेन उत्तिष्ठन्तं - उर्ध्वकर्मत्वेन परस्मैपदं - उद्यन्तमादित्यं तानि रक्षांसि योधयन्ति । हवेति व्याख्यातम् ।

यावदस्तमन्वगाद् यावति कालेऽस्तं गच्छति तदाऽपीत्यर्थः । अस्तं यन्तं च योधयन्तीत्युक्तं भवति । छान्दसो लुङ् ॥

# अर्घ्यम्④

▼ *मूल-प्रस्तुतिः*

तानिं ह॒ वा ए॒तानि॒ रक्षाँसि
गायत्रि॒याऽभिंमन्त्रिते॒नाम्भंसा शाम्यन्ति।

▼ *भट्टभास्कर-टीका*

2इदानीं तेषां रक्षसां शान्तिं विदधाति - तानि तथा युध्यमानानि रक्षांस्य् एतानि गायत्र्या सावित्र्या अभिमन्त्रितेनाम्भसा ऊर्द्ध्वं विक्षिप्तेन शाम्यन्ति । तस्मात्तथा कुर्यादिति विधिः ।

▼ *मूल-प्रस्तुतिः*

तदुं ह॒ वा ए॒ते ब्रंह्मवा॒दिनः॑ पूर्वाभिं॒मुखाः स॒न्ध्यायां॑ङ्
गायत्रि॒या ऽभिंमन्त्रिता॒ आपं ऊ॒र्ध्वं विक्षिंपन्ति।
ता ए॒ता आपों व॒ज्रीभू॒त्वा तानि॒ रक्षाँसि म॒न्देहारुंणे द्वी॒पे प्रक्षिंपन्ति।

▼ *भट्टभास्कर-टीका*

तदु ह वै तस्मादेव हि खल्व् एते ब्रह्मवादिनः ब्रह्मणो वेदितारो ब्राह्मणादयः पूर्वाभिमुखास्तिष्ठन्तः सन्ध्याथां प्रातः गायत्र्या आभिमन्त्रिता आपो ऽपः - विभक्तिव्यत्ययः - ऊर्ध्वं विक्षिपन्ति । उपलक्षणत्वात्सायं प्रत्यङ्मुखा इत्यवगम्यते । ता एता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहा मन्देहनाम्नां रक्षसां - "सुपां सुलुक्" इति षष्ठ्या आकारः - तेषां रक्षसां स्वभूते अरुणे अरुणनाम्नि द्वीपे प्रक्षिपन्ति पातयन्ति ।

# प्रदक्षिणीकरणम्④

▼ *मूल-प्रस्तुतिः*

यत् प्रंदक्षि॒णं प्रक्रंमन्ति॒, तेनं पा॒प्मान॒म् अवंधून्वन्ति।

▼ *भट्टभास्कर-टीका*

यत्प्रदक्षिणं प्रक्रमन्ति दक्षिणप्रारम्भमावर्तन्ते तेन पाप्मानम् आत्मस्थम् अवधून्वन्ति ।

# ब्रह्म-भावनम्④

▼ *मूल-प्रस्तुतिः*

उ॒द्यन्तं॑म् अस्तयँ॒ यन्तं॑म् आदि॒त्यम् अ॑भिध्या॒यन्
कु॒र्वन् ब्रा॑ह्म॒णो वि॒द्वान्त् स॒कलं॑ भ॒द्रम् अ॑श्नुते -
असाव् आ॑दि॒त्यो ब्र॒ह्मेति॒ -
ब्र॒ह्मै॒व सन् ब्रह्मा॒प्येति॒-
य ए॒वव॑ँ वेद॑ ।2।

▼ *भट्टभास्कर-टीका*

तस्माद् उद्यन्तमस्तंयन्तञ्चादित्यमभिध्यायन् आभिमुख्येन चिन्तयन् कुर्वंश्च प्रदक्षिणं विद्वांश्च असावादियो ब्रह्मेत्य् असावेवादित्यः परम्ब्रह्मेति ब्रह्मादित्ययोरभेदम् आदित्येन चात्मन ऐक्यं जानन् ब्राह्मणः सकलं भद्रं कल्याणम् अश्नुते न केवलं स्वर्गादिकमेव, अपितु सकलं कल्याणम् । अथ य एवं वेद सोऽपि ब्रह्मैव सन् ब्रह्माप्येति ब्रह्मणा ऐक्यं प्रतिपद्यते, किं पुनस्स्वर्गादि सकलं भद्रमश्नुत इति । यद्वा - असावादित्यो ब्रह्मेति विद्वान् तेन चादित्येनात्मन ऐक्यात् स्वयमपि ब्रह्मैव आदित्यः सन् कुर्वन् आचरन् एवं विशिष्टमादित्योपस्थानम् आचरन् सकलं भद्रमश्नुते अपवर्गमपि प्राप्नोति । अथ य एवं वेदिता सोऽपि ब्रह्माप्येति प्राप्नोति ॥
इति द्वितीथे द्वितीयोऽनुवाकः ॥

इति जपित्वा,
अन्नम् अभिधार्य,

## अभिमर्शः②

पितृपात्रेषु क्लृप्तान् अन्नादीन् सर्वान्
**प्राचीनावीती** -
दक्षिणामुखः सव्यं जान्व् आच्य,
"एष ते तत" इति यथालिङ्गम् अभिमृशेत् ।
असम्भवतां मन्त्रावृत्तिः ।

## कर्त्रा हुतशिष्टान्नस्य जपः③

(कर्त्रा हुतशिष्टान्नस्य जपः 2)

ए॒ष ते॑ तत॒ *(स्वधासमुद्रः)* मधु॑माँ ऊ॒र्मिस् सर॑स्वा॒न्।
याव॑ान् अ॒ग्निश् च॑ पृथि॒वी च॒ ताव॑त्य् अस्य मा॒त्रा।
ताव॑तीन् त ए॒तां मात्रा॑न् ददामि।

यथा॒ ऽग्निर् अक्षि॒तो ऽनु॑पदस्त*(=उपक्षयरहितः)*, ए॒वं मह्यं॑*(→मम)* पि॒त्रे ऽक्षि॒तो ऽनु॑पदस्तः स्व॒धा भ॑व॒ तां त्वँ स्व॒धां तैस् स॒होप॑जीव॒, +र्चस् ते॑ महिमा।

ए॒ष ते॑ प्रपितामह॒ *(स्वधासमुद्रः)* मधु॑माँ ऊ॒र्मिस् सर॑स्वा॒न्।
यावा॑न् वा॒युश् चा॒न्तरि॑क्षञ् च॒ ताव॑त्य् अस्य मा॒त्रा।
ताव॑तीन् त ए॒तां मात्रा॑न् ददामि।
यथा॑ वा॒युर् अक्षि॒तो ऽनु॑पदस्त*(=उपक्षयरहितः)*, ए॒वं मह्यं॑*(→मम)* पिताम॒हायाक्षि॒तोऽनु॑पदस्तः स्व॒धा भ॑व।
तां त्वँ स्व॒धां तैस् स॒होप॑जीव॒, सामा॑नि ते महिमा।

ए॒ष ते॑ प्रपितामह॒ *(स्वधासमुद्रः)* मधु॑माँ ऊ॒र्मिस् सर॑स्वा॒न्।
यावा॑न् आदि॒त्यश्च॒ द्यौश्च॒ ताव॑त्यस्य मा॒त्रा।
ताव॑तीन् त ए॒तां मात्रा॑न् ददामि।
यथा॑ ऽऽदि॒त्यो ऽक्षि॒तो ऽनु॑पदस्त*(=उपक्षयरहितः)*, ए॒वं मह्यं॑ प्रपिताम॒हायाऽक्षि॒तोऽनु॑पदस्तः स्व॒धा भ॑व।
तां त्वँ स्व॒धां तैस् स॒होप॑जीव॒, यजूँ॑षि ते महि॒मा ॥ (19)

[[125]]

## देव-पात्रे③

अथ देव-पात्रे उदङ्-मुखः
**उपवीती**
दक्षिणं जान्व् आच्य,
स-व्याहृतिक-गायत्र्या प्रोक्ष्य

(ओं भूर्भुव॒स्सुवः॑ । इति अन्नं प्रोक्ष्य ओं तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचो॒दया॑त् ॥)

> देव॑ सवितः॒ प्र सु॑व ॥

इति प्रदक्षिणं परिषिच्य,
(विश्वेदेवहस्ते शुद्धोदकं दत्वा,)

*(हे अन्न -)* पृ॒थि॒वी ते॒ पात्रं॒,
द्यौर् अ॑पि॒धानम्।
ब्रह्म॑णस् त्वा॒ मुखे॑ जुहोमि।
ब्राह्म॒णाना॑न् त्वा प्राणापा॒नयो॑र् जुहोमि।

भुक्तवतो ऽनुव्रज्य प्रदक्षिणीकृत्य
द्वैधं दक्षिणाग्रान् दर्भान् संस्तीर्य
*(भुञ्जानानामपि तृप्तिरस्त्वित्याह -)* अक्षि॑तम् असि॒।
मैषा॑ं क्षेष्ठा*(←क्षी क्षये)* अ॒मुत्रा॒*(→परलोके)*ऽमुष्मि॑ंल्ँ लो॒के *(च ब्राह्मणानाम्)* ।

इति सव्येन पात्रमालभ्य दक्षिणेन ब्राह्मणहस्तं गृहीत्वा, अन्नं सर्वं स्पर्शयित्वा

इद॑व्ँ वि॑ष्णुर् *(अग्नि-विद्युत्-सूर्यात्मना)* **वि॑ चक्रमे**
*(पृथिव्याम् अन्तरिक्षे दिवि च)* त्रेधा॑ **नि॑ दधे** पद॑म् ।
*(तैर् आधारैर् जगत्)* **स॑म् ऊढम्** अस्य पाँसुरे॑ *(ले इति साम्नि, पांसुमति [पादे])* ॥

> विष्णो! हव्यँ रक्ष

इति अन्ने अ-नख-द्विजाङ्गुष्ठ-प्रदेशं प्रवेश्य,
द्विज-वामाङ्गुष्ठ-तर्जनी-मध्यमाभिः पात्रं स्पर्शयित्वा,

[[126]]

> .... गोत्रस्य .... शर्मणः मम पितुः श्राद्धे
> पुरूरवार्द्रवसंज्ञकाः ! विश्वेदेवा देवताः!
> इदम् अन्नं ब्रह्म,
> अयं च ब्राह्मणो ब्रह्म,
> अहञ्च ब्रह्म।
> इयं च भूर् गयाऽक्षय-वट-च्छाया।
> अयञ्च ब्राह्मणः आहवनीयार्थे।
> इदं च पात्रं स्वर्णमयम्।
> इदं च अन्नम् अमृतमयम्।
> अयञ्च भोक्ता ब्राह्मणो गदाधरः।
> पुरूरवार्द्रव-संज्ञकेभ्यो विश्वेभ्यो देवेभ्य
> इदं इदं इदं हव्यं स-व्यञ्जनं स-परिकरञ् च परिविष्टम्,
> आतृप्तेः परिवेष्यमाणं च।
> स्वाहा नमः!
> न मम!

इति यवोदकेन देवतीर्थेन दद्यात् ।

> गयायाम् अक्षयवटच्छायायां
> .... क्षेत्रे.... दिव्यविमान-च्छायायां ...
> नायिकासमेत ... श्री .... स्वामि-सन्निधौ
> श्रीविष्णु-पादे दत्तं,

> गयायां दत्तम् अस्तु ।
> पुरूरवार्द्रव-संज्ञक-विश्वेदेवेभ्यः ॥

इति अन्ने द्विजाङ्गुष्ठं नखान्यप्रदेशे निवेश्य,

(एवं पित्र्ये)

**प्राचीनावीती**

> .... विष्णो! कव्यं रक्ष

इति विशेष-युक्तं दक्षिणामुखः
पितृणां ... गोत्र-नाम-रूप-पुरस्सरं दद्यात् ॥

> अयं च ब्राह्मणः .... पितृपितामहप्रपितामहार्थे,
> इदञ्च पात्रं रजतमयं
> ... गोत्रेभ्यः .... शर्मभ्यः ... रूपेभ्यः
> .... पितृपितामहप्रपितामहेभ्यः
> इदम् इदम् इदं कव्यं ...
> स्वधा नमः॥
> न मम॥

इति विशेषयुक्तं पितृतीर्थेन दद्यात् ॥

देववत् विष्णोश्च कुर्यात् । 'विष्णुर्देवता.... अयं च ब्राह्मणः विष्ण्वर्थे ... ' इत्यादिर् विशेषः ॥

[[127]]

# समष्टिदत्तम्②

समष्टिदत्तम्

पितृ-देवतयोर् मध्ये भुवं संशोध्य,
भुग्नं निधाय,
**प्राचीनावीती** -
दक्षिणामुखः सव्यं जान्व् आच्य,

यज्ञेश्वरो हव्य-समस्त-कव्य-
**भोक्ता** ऽव्ययात्मा हरिर् ईश्वरो ऽत्र ।
तत्-सन्निधानाद् **अपयान्तु** सद्यो
रक्षांस्य् अशेषाण्य् असुराश् च सर्वे ॥

एको विष्णुर् महद्-भूतं
पृथक् भूतान्य् अनेकशः ।
त्रीन् लोकान् **व्याप्य** भूतात्मा
**भुङ्क्ते** विश्व-भुग् अव्ययः ॥

इति +उच्चार्य

> अनेन... गोत्रस्य ... शर्मणः मम पितुः श्राद्धे
> पितृ-श्राद्ध-रूप--भगवद्-आराधनोपक्रमेण
> (**उपवीती**) पुरूरावार्द्रव-संज्ञक-विश्वेदेव-रूपी
> (**प्राचीनावीती**) वसु-रुद्रादित्य-स्वरूप-संज्ञक+अस्मत्-पितृ-पितामह-प्रपितामह-रूपी
> (**उपवीती**) - श्राद्ध-संरक्षक-श्री-विष्णु-रूपी
> (**प्राचीनावीती**) -
> सर्वाकारो भगवान् स देवः श्रीजनार्दनः प्रीयताम्

इति सयवतिलोदकं (दर्भेषु) दद्यात् ।

> गयायाम् अक्षयवट-च्छायायां
> सत्य-व्रत-क्षेत्रे *(=काञ्चीपुर्याम्)* पुण्य-कोटि-विमान-च्छायायां
> पेरुन्देवी-नायिका-समेत--श्री-देवादि-राज-स्वामि-पादारविन्दयोर् दत्तम् ।

"स्वामिनः! अच्छिद्रं जायताम्" इति प्रार्थना ।
'अस्त्व् अच्छिद्रम्' इति प्रतिवचनम्

> पिता पितामहश् चैव
> तथैव प्रपितामहः ।
> तृप्तिं प्रयान्तु मे भक्त्या
> यन् मयैतद् उदीरितम् ॥

# परिषेचनादि②

क्रमेण मन्त्रेण परिषेचनं कारयित्वा,
आपोशनम् अपि कारयित्वा

[[128]]

▼ ***मूल-प्रस्तुतिः***

प्रा॒णे निवि॑ष्टो॒ ऽमृतं॑ञ्जुहोमि।
शि॒वो मा॑ ऽऽवि॒शाऽप्र॑दाहाय।
प्रा॒णाय॒ स्वाहा॑ ।

अ॒पा॒ने निवि॑ष्टो॒ऽमृतं॑ञ्जुहोमि।
शि॒वो मा॑ ऽऽवि॒शाऽप्र॑दाहाय।
अ॒पा॒नाय॒ स्वाहा॑ ।

व्या॒ने निवि॑ष्टो॒ऽमृतं॑ञ्जुहोमि।
शि॒वो मा॑ ऽऽवि॒शाऽप्र॑दाहाय।
व्या॒नाय॒ स्वाहा॑ ।

उ॒दा॒ने निवि॑ष्टो॒ऽमृतं॑ञ्जुहोमि।
शि॒वो मा॑ ऽऽवि॒शाऽप्र॑दाहाय।
उ॒दा॒नाय॒ स्वाहा॑ ।

स॒मा॒ने निवि॑ष्टो॒ऽमृतं॑ञ्जुहोमि।
शि॒वो मा॑ ऽऽवि॒शाऽप्र॑दाहाय।
स॒मा॒नाय॒ स्वाहा॑ ।

▼ ***मूल-प्रस्तुतिः***

---

ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑ । (48)

इति जपन् प्राणाहुतीः कारयित्वा,

१. 3 गायत्रीं
२. 4 मधु-त्रयञ् च जपित्वा

[[129]]

> स्वामिनः! यथासुखं जुषध्वम् ।
>
> श्रीपुंसूक्ते, वैष्णवान्, पैतृकान्, राक्षोघ्नान्, अन्यांश्च पवमानान्,
> इतिहासपुराणानि च
> भवतो भुञ्जानान् यावच्-छक्यं श्रावयिष्ये

इत्युक्त्वा,
“श्रावय" इत्यनुज्ञातः,

> स्वामिनः! सनक-सनन्दनादि-समधिक-माहात्म्यशालिनो यूयं
> अस्मिन् कैङ्कर्ये वात्सल्यातिशयेन समागताः।
> स्वामिनाम् अनुगुणं कैङ्कर्यानुगुणं च
> पदार्थादिकं सम्पादयितुम् अशक्तः,
> सम्पादितवांश् चास्मि।
> सम्पादितेषु च भगवन्-निवेदितेषु
> +अपेक्षितं यथाशास्त्रम् आनीय, भुक्त्वा,
> वयं संरक्षणीयाः

इत्य् उपचारान् उक्त्वा

# शुश्रूषा-नियमाः②

"स्वयम् अनवेक्षमाणो ददामी"ति कथनं,
रोदनं, क्रूरभाषणम्, अन्-ऋत-भाषणं,
पदा अन्नस्पर्शनावधूननं, क्रोधेन दानं,
स्विन्न-गात्रतया ब्राह्मण-पुरोऽवस्थानं,
ब्राह्मणान् प्रति हविर्-गुण-प्रश्नः,*(5)*
त्वरया परिवेषणम् इत्यादि-वर्जितः,
इङ्गितादिभिर् अपेक्षितं ज्ञात्वा
परिवेषणं कारयेत् ॥

भोक्ता च

> अधिक-परिवेषणे हस्त-संज्ञया निषेधः,
> तथैव अपेक्षितानयनं,
> मुख-चालन-हुङ्कारादिना अपेक्षानपेक्षयोर् असूचनम्,
> भोज्य-पात्रे +आज्य-पात्रं निक्षिप्य अभोजनम्,
> खादित-शेषस्य भोजन-पात्रे अनिक्षेपः,
> मन्त्रानुच्चारणं,
> दात्रा पृष्टत्वे ऽपि हविर्-गुणानां हस्त-संज्ञयाऽपि +असूचनं,
> मौनं,
> "साङ्गुष्ठाङ्गुलीभिर्"

इत्यादि-नियम-युक्तः

इन्द्रियचापल्यं, परान्नावलोकनं,
हुङ्कारं, भू-तलात् पात्रस्योद्धरणं,
हस्तेन पात्रस्य मोचनम्,

उत्तर-वासो-बहिर्-भूत-कक्षः,
पीतावशिष्ट-पानं, खादितावशिष्टापूप-फलादि-पुनः-खादनं,
मुखेन +अन्न-धमनं,
ष्ठीवनं, बहु-भाषणम्,
अतिमिताशनम्, अति-भोजनं,
लवणापेक्षा,
दधि-क्षीर-क्षौद्र-सक्तु-घृत-पायसानाम् अवशेष-करणम्,
अन्येषां किञ्चिद् अप्य् अनवशेष-करणम्
इत्यादिवर्जितः
यावद्-अपेक्षं भुञ्जीत ।

[[130]]

## श्रावणम्②

सतां बन्ध्व्-आदीनां दक्षिणा-दान-पुरस्सरं तत्-सहितः,
स्वयम्-अशक्तौ तन्-मुखेन वा,

१. गायत्रीं त्रिः,
२. श्रीसूक्तम्, ३. पुंसूक्तम्,
४. अद्भ्यस्सम्भूतः, ५. सहस्रशीर्षं देवं,
६.विष्णुगायत्रीम्, ७. विष्णोर्नुकम्,
८. तदस्य प्रियम्,
९. कृणुष्वपाजः, १०. रक्षोहणः,
११. उशन्तस्त्वा, १२. आपूर्यास्स्थामा,
१३. असावादित्यः, १४. सन्ततिर्वा,
१५, १६, १७. अयं वाव इति त्रयोनुवाकाः,
१८, १९, २०. ब्रह्म मेतुमाम् इत्यादित्रयम्, [^11]
२१. अन्नसूक्तम्,
२२. इतिहासपुराणादीनि इत्यादि श्रावयेत् ॥
(अभिश्रवणमन्त्राः पु. १४४-१५५ द्रष्टव्याः ॥)

## तृप्ति-प्रश्नाः②

भोजनान्ते अन्नादिकं पात्रे परिकल्प्य,

> स्वामिनः ! भगवन्निवेदितेषु किमपेक्षितम्?

इति पृष्ट्वा, "सर्वं सम्पूर्णम्" इत्युक्ते,
कर्ता

(गायत्रीं) ओं भूर्भुवस्सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।
[[TODO:परिष्कार्यम्??]]

(मधुत्रयम्)

मधु वाता ऋतायते
मधु क्षरन्ति सिन्धवः ।
माद्ध्वीर् नस् सन्त्व् ओषधीः ॥

मधु नक्तम् उतोषसि
मधुमत् पार्थिवँ रजः ।
मधु द्यौरस्तु नः पिता ॥

मधुमान् नो वनस्पतिर्
मधुमाँ अस्तु सूर्यः ।
माद्ध्वीर् गावो भवन्तु नः ॥

> (ओं मधु मधु मधु ॥)

**अ"क्षन्न्**_(=भुक्तवन्तः)_, **अ"मीमदन्त** ह्य् अ"व प्रिया" **अधूषत**_(=अकम्पयन् [=वक्तुम् अशक्नुवन्])_ ।
**अ"स्तोषत**_(=अस्तुवन्)_ स्व"भानवो वि"प्रा
न"विष्ठया मती"_(त्या)_, _(अतो रथे)_ **यो"जा**_(=योजय)_ न्वि्" इन्द्र ते ह"री ॥

इति च जपित्वा

[[132]]

१. **उपवीती** -

> पुरूरवार्द्रवसंज्ञकाः विश्वेदेवाः! (मधु) वस् सम्पन्नम्?

इति पृष्ट्वा, ‘सुसंपन्नम्’ इत्युक्ते,

‘विश्वेदेवाः! तृप्तास् स्थ?' इति पृष्ट्वा, ‘तृप्तास्स्मः' इति प्रत्युक्ते,

२. (पित्रादीनप्येवं पृष्ट्वा )

**प्राचीनावीती** -

> वसुरुद्रादित्य-स्वरूप+अस्मत्-पितृ-पितामह-प्रपितामहाः!
> (मधु) वस्सम्पन्नम् ?

इति पृष्ट्वा, ‘सुसम्पन्नम्' इत्युक्ते,
‘पितृ-पितामह-प्रपितामहाः ! तृप्तास्स्थ?’ इति पृष्ट्वा, ‘तृप्तास्स्मः’ इति प्रत्युक्ते, -

३. (विष्णुम् अपि पृष्ट्वा)

**उपवीती** -

> श्राद्ध-संरक्षक-श्री-विष्णो ! (मधु) ते संपन्नम्?

इति पृष्ट्वा, ‘सुसंपन्नम्' इत्युक्ते,
‘श्रीविष्णो! तृप्तोऽसि?' इति पृष्ट्वा, ‘तृप्तोऽस्मि’ इति प्रत्युक्ते,

# प्रकिर-दानम्②

पितृ-देवयोर् मध्ये **प्राचीना-वीती** भुग्नं निधाय,
सव्यं जान्व् आच्य
तिलोदकं पितृ-तीर्थेनोत्सिच्य,
स-व्यञ्जनम् अन्नं द्रवी-कृतं हस्त-द्वयेना ऽऽदाय,

> ये अग्निदग्धा येऽनग्निदग्धा
> ये वा जाताः कुले मम ।
> भूमौ दत्तेन तृप्यन्तु
> तृप्ता यान्तु परां गतिम् ॥

इति पितृ-तीर्थेन प्रकिरेत् ॥

[[133]]

# अथवा विकिरदानम्②

प्रथम-वृत-वैश्वदेविक-ब्राह्मण-सन्निधौ
कस्मिंश्चित् पात्रे स-यवान् युग्मान् दर्भान् संस्तीर्य,

> १. असोमपाश् च ये देवा
> यज्ञ-भाग-विवर्जिताः ।
> तेषाम् अन्नं प्रदास्यामि
> विकिरं वैश्वदेविकम् ॥

इति देवतीर्थेन
**उपवीती** उदगपवर्गं विकिरेत् ।

२. पितॄणां पुरतः पात्रे सतिलं भुग्नं निधाय,
**प्राचीनावीती**

> अ-संस्कृत-प्रमीता ये
> त्यागिन्यो याः कुल-स्त्रियः ।
> दास्यामि तेभ्यो विकिरम्
> अन्नं ताभ्यश् च पैतृकम् ॥

इति प्रत्यग्-अपवर्गं पितृ-तीर्थेन विकिरेत् ।

३. **उपवीती**

> असंशयो भवेद् विष्णुः
> मोक्ष-साधनम् अव्ययम् ।
> पितॄणाञ् च वरं श्रेष्ठं
> विकिरान्नञ् च वैष्णवम् ॥

इति देववत् विष्णोश्च विकिरेत् ।

**प्राचीनावीती** प्रकिरवत् भुग्ने,

> ये अग्निदग्धा येऽनग्निदग्धा
> ये वा जाताः कुले मम ।
> भूमौ दत्तेन पिण्डेन
> तृप्ता यान्तु परां गतिम् ॥

(इति पिण्डं दद्यात् )

[[134]]

# उत्तरापोशनं②

**उपवीती** - आचम्य,
'विश्वेदेवाः! अमृतापिधानमसि' /

**प्राचीनावीती**
'पितृपितामहप्रपितामहाः ! अमृतापिधानमसि'/

**उपवीती** - 'श्राद्धसंरक्षकविष्णो! अमृतापिधानमसि' - इत्य्-आदि-क्रमेण
उत्तरापोशनं कारयित्वा,
पितृ-पूर्वं हस्त-प्रक्षालनादिकं दत्त्वा,
स्वयं शिष्यादि-मुखेन वा पात्राणि चालयेत् ।

आपिण्ड-निधानात् भुक्ति-मण्डल-शोधनं न कारयेत् ।*(5)*

# रोचनम्②

आचान्तेषु स्वयम् आचम्य,

१. "विश्वेदेवाः! रोचयतेति ब्रूत" इत्युक्त्वा, “रोचयत" इति तैरुक्ते,

२. **प्राचीनावीती**, “वसु-रुद्रादित्य-स्वरूप-पितृ-पितामह-प्रपितामहाः! ‘स्वदितम्’ इति ब्रूत" इति पृष्ट्वा, "स्वदितम्” इत्युक्ते,

३. **उपवीती**, "श्राद्ध-संरक्षक-श्रीविष्णो ! 'स्वस्त्य्-अस्तु इति ब्रूहि' इति पृष्ट्वा, ‘स्वस्त्यस्तु' इति प्रत्युक्ते,

**प्राचीनावीती**, ‘सर्वे स्वस्त्य् अस्तु इति ब्रूत!' इत्युक्त्वा,
सर्वैः ‘स्वस्त्य् अस्तु’ इति प्रत्युक्ते,

१. **उपवीती** -

> ... गोत्रस्य... शर्मणः मम पितुः श्राद्धे
> पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानाम् अक्षय्यम् अस्तु ।

हस्ते जलं दत्वा

> अस्त्व् अक्षय्यम्

*(एवम् अन्ययोः, पितृभोक्तरि **प्राचीनावीती**)*

४. सर्वेषां हस्ते जलं दत्वा
"अस्त्व् अक्षय्यम्" इति सर्वैर् उक्ते

[[135]]

# निवेदित-तुलसी-मिश्र-ताम्बूल-दक्षिणाश् च②

१. "इदं वस् ताम्बूलम्, इयं च दक्षिणा ।"

> .... गोत्रस्य ... शर्मणः मम पितुः श्राद्धे पुरूरवार्द्रवसंज्ञकः विश्वेदेवाः!

२. **प्राचीनावीती**

> ... गोत्रस्य ....शर्मणः मम पितुः श्राद्धे
> वसुरुद्रादित्यस्वरूप अस्मत्-पितृ-पितामह-प्रपितामहाः!
> इदं वस्ताम्बूलम्, इयं च दक्षिणा ।

३. **उपवीती** -

> .... गोत्रस्य ....शर्मणः मम पितुः प्रत्याब्दिकश्राद्धे,
> श्राद्धसंरक्षकश्रीविष्णो! इदं ते ताम्बूलम्, इयं च दक्षिणा ॥

# स्वधा-वाचनादि②

**प्राचीनावीती**,

"पितृ-पितामह-प्रपितामहाः! स्वधां वाचयिष्ये"।

इत्युक्त्वा, 'वाच्यतां स्वधा' इति प्रत्युक्ते,

"पितृ-पितामह-प्रपितामहेभ्यः स्वधोच्यताम्" इति पृष्ट्वा,
'अस्तु स्वधा' इति प्रत्युक्ते,
'ओं स्वधा' इति पात्र-स्थं सतिलं जलं पितृ-तीर्थेन अधो-मुखं निनीय,
पात्रम् अधोमुखं कृत्वा,

वैश्वदेविकान् **उपवीती** - 'विश्वे देवाः ! प्रीयन्ताम्' इत्यापृच्छ्य,
'प्रीयन्तां विश्वेदेवाः' इति प्रत्युक्ते,

**प्राचीनावीती**

> स्वामिनः! ... गोत्रं ... शर्माणं पितरम् उद्दिश्य
> मया कृतमिदं श्राद्धं,
> यथा-शास्त्रानुष्ठितं, गया-श्राद्ध-फलदम्, अक्षय्य-तृप्तिकरं, भगवत्-प्रीणनं च भूयाद्
> इति भवन्तो महान्तोऽनुगृह्णन्तु

इति प्रार्थ्य,

> यथा-शास्त्रानुष्ठितं, गया-श्राद्ध-फलदम्, अक्षय्य-तृप्ति-करं, भगवत्-प्रीणनम् अस्तु

इति प्रत्युक्ते,

[[136]]

पिण्डार्थं, प्राशनार्थं च उद्धृत्य,
'अन्नशेषः किं क्रियताम्’ इति प्रश्नः ।
‘इष्टैः सह भुज्यताम्' इति प्रत्युक्तिः ।

> दातारो नोऽभिवर्धन्तां
> वेदाः सन्ततिरेव नः ।
> श्रद्धा च नो मा व्यपगात्
> बहु देयञ्च नोऽस्तु ॥
> अन्नञ्च नो बहु भवेद्
> अतिथींश्च लभेमहि ।
> याचितारश् च नस् सन्तु
> मा च याचिष्म कञ्चन ॥

इति **उपवीती** प्रार्थ्य

भोक्तारः -

> दातारो वोऽभिवर्धन्तां
> वेदाः सन्ततिरेव वः ।
> श्रद्धा च वो मा व्यपगात्
> बहु देयञ्च वोऽस्तु ॥
> अन्नञ्च वो बहु भवेद्
> अतिथींश्च लभध्वम् ।
> याचितारश् च वस् सन्तु
> मा च याचध्वं*(छन्दः??)* कञ्चन ॥

इति प्रत्युक्ते

**प्राचीनावीती** - अधोमुखं (स्वधापात्रं) उत्तानं कृत्वा,

# उपस्थानम्②

(उपस्थानम्)

▼ ***भास्करोक्त-विनियोगः***

18षड्भिर्नमस्कारैरुपतिष्ठते - नमो व इति ॥

▼ ***मूल-प्रस्तुतिः***

नमों व॒ पितरो॒ रसा॑य । [पितं॑रो॒ नमों वः।],

▼ *Keith*

Homage to your taste, O fathers;

▼ *भट्टभास्कर-टीका*

हे पितरः युष्मभ्यं नमः नमस्करोमि रसाय रसार्थं रसवान् भूयासमिति । 'पितरो नमो वः' इत्यादिकं षट्स्वप्यजुषज्यते ।

▼ *मूल-प्रस्तुतिः*

नमों व॒ पितर॒श् शुष्मा॑य *(पितं॑रो॒ नमों वः )*,,

▼ *Keith*

homage to your birth, O fathers;

---

- *pūruṣaḥ* ← *pūruṣa*
- [noun], nominative, singular, masculine
- “man; man; Puruṣa.”

---

- *pādo* ← *pādaḥ* ← *pāda*
- [noun], nominative, singular, masculine

- “foot; one-fourth; beam; pāda; foot; foundation; pāda [word]; leg; leg; animal foot; step; foot; footfall; verse.”

---

- *'sya ← asya ← idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

---

- *viśvā ← viśva*
- [noun], nominative, plural, neuter
- “all(a); whole; complete; each(a); viśva [word]; completely; wholly.”

---

- *bhūtāni ← bhūta*
- [noun], nominative, plural, neuter
- “being; ghost; mahābhūta; monster; past; Bhūta; world; bhūta [word]; being; mythical monster; animal; entity.”

---

- *tripād ← tri*
- [noun]
- “three; tri/tisṛ [word].”

---

- *tripād ← pād*
- [noun], nominative, singular, masculine
- “pād [word]; foot.”

---

- *asyāmṛtaṃ ← asya ← idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

---

- *asyāmṛtaṃ ← amṛtam ← amṛta*
- [noun], nominative, singular, neuter

- “immortal; amṛta; imperishable.”

---

- *divi* ← *div*
- [noun], locative, singular, masculine
- “sky; Svarga; day; div [word]; heaven and earth; day; dawn.”

---

▼ ***रङ्गनाथः***

एतावान्- सर्वोपि प्रकृतिविषयः। अस्य- एतस्य विष्णोः। महिमा। अतः- महिमातः। पूरुषः- विष्णुः। ज्यायान्- श्रेष्ठः। अस्य- एतस्य विष्णोः। विश्वा भूतानि- सर्वाणि प्रकृतिजातानि। पादः- चतुर्थोऽशः। अस्य- एतस्य विष्णोः। त्रिपात्- अन्ये त्रयोंऽशाः। दिवि- चिदाकाशे। अमृतम्- विनाशरहिताः॥३॥

▼ ***सायण-भाष्यम्***

अतीतानागत-वर्तमान-रूपं जगद् यावद् अस्ति **एतावान्** सर्वोऽप्य् अस्य पुरुषस्य महिमा। स्वकीय-सामर्थ्य-विशेषः। न तु तस्य वास्तव-स्वरूपम्।*(5)* वास्तवस्तु पुरुषोऽतो महिम्नोऽपि **ज्यायान्**। अतिशयेनाधिकः। एतच्चोभयं स्पष्टीक्रियते। अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादः। चतुर्थोऽंशः। अस्य पुरुषस्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सद्दिवि द्योतनात्मकेस्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेशः। यद्यपि सत्यं ज्ञानमनन्तं ब्रह्म। तै. आ. ८-१- उ. २-१। इत्याम्नातस्य परब्रह्मन इयत्ताभावात्पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपपेक्षयाल्पमिति विवक्षितत्वात्पादत्वोपन्यासः॥ ३॥

▼ ***भट्टभास्कर-टीका***

3एतावानिति ॥ एतावान् एतत्प्रमाणः यन् मर्त्या अमर्त्याश्च एतावान् अस्य पुरुषस्य महिमा महत्कर्म विभूतिरित्यर्थः, न त्वयमेतावान् । अयं तु पुरुषो ऽतोऽपि यथोक्तान् मर्त्यामर्त्यलक्षणात् कार्यवर्गाज् ज्यायान् वृद्धतरः नेतावानेवेति मन्तव्यः । तत्कथमित्याह - पाद एकदेशो ऽस्य विश्वा भूतानि भूतजातान्य् अल्पांशो व्यक्तात्मना वर्तते । पादमात्रत एव सर्गप्रतिसर्गयोः प्रवृत्तिः । अस्य सम्बन्ध्य् अपरं त्रिपात् पादत्रयात्मकं व्यक्तप्रमाणात्त्रिगुणं महाप्रमाणम् एकदेशान्तरम् अमृतम् अविकारित्वेन चेतनरूपेण दिवि द्योतनवत्य् आदित्यमण्डले परमपुरुषशरीरभूते वर्तते । उक्तं च 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ।' इति । त्रयः पादा यस्येति 'सङ्ख्यासु पूर्वस्य' इति लोपः 'द्वित्रिभ्यां पद्दन्' इत्युत्तरपदान्तोदात्तत्वम् । पुरुषस्यापरिमितत्वान् न चतुर्थांशवचनः पादशब्दः ॥

▼ ***Wilson***

---

**English translation:**

"Such is his greatness; and **Puruṣa** is greater even than this; all beings are one-fourth of him; his otherthree-fourths, (being) immortal, (abide) in heaven."

---

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

Such is his greatness: i.e., the greatness of Puruṣa is as vastas the world of past, present, and future beings

▾ *Jamison Brereton*

So much is his greatness, but the Man is more than this:
a quarter of him is all living beings; three quarters are the immortal in heaven.

▾ *Griffith*

So mighty is his greatness; yea, greater than this is Purusa.
All creatures are one-fourth of him, three-fourths eternal life in heaven.

▾ *Geldner*

Solches ist seine Größe und noch gewaltiger als dies ist Purusa. Ein Viertel von ihm sind alle Geschöpfe, drei Viertel von ihm ist das Unsterbliche im Himmel.

▾ *Grassmann*

So bedeutend ist seine Grösse, und noch grösser ist der Urmensch; ein Viertel von ihm sind alle Geschöpfe, und drei Viertel von ihm die Welt der Unsterblichen im Himmel.

▾ *Elizarenkova*

Таково его величие,
И еще мощнее этого (сам) Пуруша.
Четверть его – все существа.
Три четверти его – бессмертие на небе.

▼ ***अधिमन्त्रम् (VC)***

- पुरुषः
- नारायणः
- निचृदनुष्टुप्
- गान्धारः

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (एतावान् महिमा-अस्य) यह जड़-जङ्गम प्रसार या संसार इस परम पुरुष परमात्मा का महिमा-महत्त्वसूचक व्यापार है (अतः-ज्यायान् पूरुषः) इससे बड़ा वह परमात्मा है (विश्वा भूतानि-अस्य पादः) साड़ी जड़-जङ्गम वस्तुएँ इसके पादमात्र हैं (अस्य त्रिपात्) इस परमात्मा का त्रिपाद्रूप (दिवि-अमृतम्) प्रकाशमय स्वरूप में अमृत है ॥३॥

▼ ***ब्रह्ममुनि - भावार्थः***

भावार्थभाषाः - सारा संसार उसके एकदेश में है, वह परमात्मा इससे महान् है, तथा ये सारी जड़-जङ्गम वस्तुएँ उसके एक पादमात्र हैं, उसका अमृतस्वरूप त्रिपाद तो प्रकाशस्वरूप में है ॥३॥

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (एतावान्-महिमा-अस्य) एतावान् जडजङ्गमरूपः प्रसारः संसारो वाऽस्य परमपुरुषस्य परमात्मनो महिमा महत्त्वसूचको व्यापारः (अतः-ज्यायान् पूरुषः) अस्माज्ज्येष्ठः स परमात्मा (विश्वा-भूतानि-अस्य पादः) सर्वाणि भूतानि जडजङ्गमानि वस्तूनि खल्वस्य पाद एव (अस्य त्रिपात्-दिवि-अमृतम्) अस्य परमात्मनस्त्रिपाद्रूपं द्योतनात्मके स्वरूपेऽमृतं विद्यते ॥३॥

## 04 त्रिपादूर्ध्व उदैत्पुरुषः - अनुष्टुप्⑥

*(सो ऽयं)* **त्रिपा॑द्***(→त्रिविक्रम-सूचना)* ऊर्ध्व॑ **उ॑दैत्** पु॑रुषः *(शिष्टस्यापेक्षया)*।
*(पूर्वोक्त-)***पा॑दो ऽस्येहा॑ऽऽभवात्** पु॑नः *(पुनःपुनः)* ।

त॑तो *(पादः)* वि॑ष्वङ् *(=सर्वतो)* **व्य्क्रामत्** *(वक्ष्यमाण-जननाय)*।
साशनानशने॑ *(=जीवाजीवे [वस्तू])* अभि॑ *(लक्ष्य)* । ४

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥

▼ ***अधिमन्त्रम् - sa***

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ ***Thomson & Solcum***

त्रिपा॑द् ऊर्ध्व॑ उ॑द् ऐत् पु॑रुषः
पा॑दो ऽस्येहा॑भवत् पु॑नः
त॑तो वि॑ष्वङ् वि॑ अक्रामत्
साशनानशने॑ अभि॑

▼ ***Vedaweb annotation***

---

### Strata

Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

### Pāda-label

popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

---

### Morph

ait ← √i- 1 (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:ACT}

púruṣaḥ ← púruṣa- (nominal stem)
{case:NOM, gender:M, number:SG}

tripā́t ← tripád- (nominal stem)
{case:NOM, gender:M, number:SG}

ūrdhváḥ ← ūrdhvá- (nominal stem)
{case:NOM, gender:M, number:SG}

út ← út (invariable)
{}

abhavat ← √bhū- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:ACT}

asya ← ayám (pronoun)
{case:GEN, gender:M, number:SG}

ihá ← ihá (invariable)
{}

pā́daḥ ← pā́da- (nominal stem)
{case:NOM, gender:M, number:SG}

púnar ← púnar (invariable)
{}

akrāmat ← √kramⁱ- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:ACT}

tátas ← tátas (invariable)
{}

ví ← ví (invariable)
{}

víṣvaṅ ← víṣvañc- (nominal stem)
{case:NOM, gender:M, number:SG}

abhí ← abhí (invariable)
{}

sāśanānaśané ← sāśanānaśaná- (nominal stem)
{case:ACC, gender:N, number:DU}

▼ *पद-पाठः*

त्रिऽपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरितिं ।
ततः । विष्वङ् । वि । अक्रामत् । साशनानशने इतिं । अभि ॥

▼ ***Hellwig Grammar***

- *tripād ← tri*
- [noun]
- “three; tri/tisṛ [word].”

---

- *tripād ← pād*
- [noun], nominative, singular, masculine
- “pād [word]; foot.”

---

- *ūrdhva ← ūrdhvaḥ ← ūrdhva*
- [noun], nominative, singular, masculine
- “upper; up(a); upper; upward; erect; more(a); raised; ūrdhva [word]; acclivitous; overturned; loud; eminent; high.”

---

- *ud*
- [adverb]
- “up.”

---

- *ait ← i*
- [verb], singular, Imperfect
- “go; travel; enter (a state); return; walk; continue; reach; ask.”

- *puruṣaḥ ← puruṣa*
- [noun], nominative, singular, masculine
- “man; man; Puruṣa; puṃvajra; puruṣa; servant; puruṣa [word]; assistant; soldier; soul; commoner; generation; people; doll.”

---

- *pādo ← pādaḥ ← pāda*
- [noun], nominative, singular, masculine
- “foot; one-fourth; beam; pāda; foot; foundation; pāda [word]; leg; leg; animal foot; step; foot; footfall; verse.”

---

- *'syehābhavat ← asya ← idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

---

- *'syehābhavat ← iha*
- [adverb]
- “here; now; in this world; now; below; there; here; just.”

---

- *'syehābhavat ← abhavat ← bhū*
- [verb], singular, Imperfect
- “become; be; originate; transform; happen; result; exist; be born; be; be; come to life; grow; elapse; come to mind; thrive; become; impend; show; conceive; understand; stand; constitute; serve; apply; behave.”

---

- *punaḥ ← punar*
- [adverb]
- “again; further; now; over and over; subsequently; repeatedly; however; besides.”

---

- *tato* ← *tatas*
- [adverb]
- “then; therefore; now; then; from there; subsequently; consequently; then; there; from that; for that reason; alternatively; consequently; furthermore.”

---

- *viṣvaṅ* ← *viṣvañc*
- [noun], nominative, singular, masculine
- “dispersed; viṣvañc [word].”

---

- *vy* ← *vi*
- [adverb]
- “apart; away; away.”

---

- *akrāmat* ← *kram*
- [verb], singular, Imperfect
- “kram; step; go; continue; proceed; traverse; heat.”

---

- *sāśanānaśane* ← *sa*
- [adverb]
- “with; little; together.”

---

- *sāśanānaśane* ← *aśana*
- [noun], neuter
- “eating; food; diet; foodstuff.”

---

- *sāśanānaśane* ← *anaśane* ← *anaśana*
- [noun], accusative, dual, neuter
- “fast; seeking death by fasting.”

---

- *abhi*

- [adverb]
- “towards; on.”

---

▼ ***रङ्गनाथः***

त्रिपात्- अमृतः पुरुषः। ऊर्ध्व उदैत्- चतुर्थादंशात् प्राकृतात् उत्कृष्टः स्थितः। अस्य- एतस्य पुरुषस्य। पादः- एकांश एव। इह- अत्र। पुनः- पौनःपुन्येन। अभवत्- सृज्यते। ततः- २ अनन्तरम्। साशनानशने- अन्नान्नादादिकम्। साशनमन्नादम्। अनशनमन्नम्। अभि- अभितः। विष्वङ्- नानारूपेण। व्यक्रामत्- व्याप्नोति॥४॥

▼ ***सायण-भाष्यम्***

योऽयं **त्रिपात् पुरुषः** संसाररहितो ब्रह्मस्वरूपः सोऽयम् **ऊर्ध्व उदैत्** अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान्। तस्य **अस्य** सोऽयं **पादः** लेशः सोऽयम् **इह** मायायां **पुनः** अभवत् सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं---- विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ' ( भ. गी. १०. ४२) इति । **ततः** मायायामागत्यानन्तरं **विष्वङ्** देवमनुष्यतिर्यगादिरूपेण विविधः सन् **व्यक्रामत्** व्याप्तवान् । किं कृत्वा । **साशनानशने** अभिलक्ष्य । साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥

▼ ***भट्टभास्कर-टीका***

4एवमादित्यान्तरपुरुषरूपेण महापुरुषो विश्वस्य सर्गकारणमित्युक्तम् । इदानीं यज्ञपुरुषरूपेण महापुरुषस्य लोकसृष्टिकारणत्वं तदुभयात्मना च लोकस्थितिहेतुत्वं पुरुषस्याह - त्रिपादिति ॥ वेदानां प्रत्येकं त्रिभिस्त्रिभिः पादैस्सहितः पुरुषो यज्ञात्मा त्रिपात् । रूपस्वरावुक्तौ । वेदानां त्रींस्त्रीन् पादानुपादाय यज्ञो भूत्वा स पुरुष उर्ध्वम् उदैद् उर्ध्वमुद्गतवान् । यथा 'गुहा त्रीणि निहिता नेङ्गयन्ति' इति । अथ अस्य पुरुषस्य यज्ञात्मनः पादस् तुरीयांशः वेदानां चतुर्थभागा आत्मा इह आभवाद् अस्यां परिदृश्यमानायां सर्वभूतस्थितो कारणभावेन पुनःपुनर्भवति, यथा इष्टदेवतास्तुत्यादिभिस् तर्पयित्वा तत्फलेन यजमानान् संयोजयति 'अग्नौ प्रास्ताहुतिः' इति न्यायेन लोकानां स्थितिं निर्वतयति । आदित्यमण्डलगता चाहुतिरुदकभावेन रश्मिभिः क्रियते, रश्मिस्थं चोदकं यदा सर्वभूतानुग्रहसमर्थं भवति तदा तन्मध्यमस्थानीयवृष्टिरूपेण पातयित्वा अनेन ओषध्यादीनां स्थितिहेतुर्भवति । एवमयं पुरुषस्य पादः पुनःपुनराभवत्य् आवृत्यावृत्य स्थिति हेतुर्भवतीहत्यानाम् । लेट्याडागमः । ताभ्यां यज्ञादित्यप्रवृत्तिभ्यां समुपबृंहितपादो महापुरुषो विष्वङ् नानाञ्चनः व्यक्रामद् विविधं क्रामति कार्यवशाद् विविधं सर्पति साशनानशने अभिलक्ष्य । साशनम् अन्नाधीनस्थितिकं जराय्वण्डोद्भित्स्वेदजं चतुर्विधम् अनशनं देवजातम् । सत्यपि पारम्पर्येणान्नाधीनस्थितिकत्वे अस्मदादीनामिव साक्षादशनाभावादनशनत्वं देवजातस्य । तदुभयस्थितिमभिसन्धाय विष्वङ् व्यक्रामदिति । विष्वगञ्चतीत्य् ऋत्विगादिना क्विन् प्रत्ययः, 'क्विन्प्रत्ययस्य कुः' इति कुत्वम् ॥

▼ *मानसतरङ्गिणीकृत्*

Therefrom, he strode forth into everything, into those that eat (living beings) and those that do not

▼ *मानसतरङ्गिणीकृत् - टिप्पनी*

Before this statement, the Puruṣa is described with the term tripāt, which is a double entendre implying both three-fourths and three steps.*(5)*
This connection suggests that the sūkta was evidently composed during the rise of Viṣṇu along with the spread of the ādhvaryava tradition. Notably, this went hand-in-hand with Viṣṇu’s identification with the yajña (sacrifice), which is also the case with the Puruṣa

▼ *Wilson*

---

**English translation:**

“Three-fourths of **Puruṣa** ascended; the other fourth that remained in this world proceeds repeatedly,and, diversified in various forms, went to all animate and inanimate creation.”

---

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

Proceeds repeatedly: either inindividuals by death and birth, or in the world by its temporary dissolution and renovation;

Sāśanānaśane =those who eat and those who do not; i.e., the two classes of created things, those capable of enjoyment etc., asgods, men, animals, or incapable thereof, as mountains and rivers -- conscious and unconscious creation

▼ *Jamison Brereton*

With his three quarters the Man went upward, but a quarter of him came to be here again.
From there he strode out in different directions toward what eats and what does not eat.

▼ *Griffith*

With three-fourths Purusa went up: onefourth of him again was here.
Thence he strode out to every side over what cats not and what cats.

▼ *Geldner*

Zu drei Vierteln stieg Purusa empor, ein Viertel von ihm verjüngte sich hienieden. Von dem aus ging er nach allen Seiten auseinander und erstreckte sich über alles was Speise ißt und was nicht ißt.

▼ *Grassmann*

Mit drei Vierteln ging der Urmensch oben hinauf, ein Viertel von ihm erschien wieder hier, dann verbreitete er sich über alles, was Speise geniesst, und was sie nicht geniesst.

▼ *Elizarenkova*

На три четверти взошел Пуруша вверх.
Четверть его возникла снова здесь.
Оттуда он выступил повсюду,
(Распространяясь) над тем, что ест (пищу) и что не ест.

▼ *अधिमन्त्रम् (VC)*

- पुरुषः
- नारायणः
- अनुष्टुप्
- गान्धारः

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (त्रिपात् पुरुषः) पूर्वोक्त वह अमृतरूप तीन पादों से युक्त परमात्मा (ऊर्ध्वः-उदैत्) नश्वर संसार से ऊपर स्थित है (अस्य पादः) इसका पादमात्र संसार (इह पुनः-अभवत्) इधर नश्वररूप में पुनः-पुनः उत्पन्न होता है (ततः) पश्चात्(साशनानशने-अभि) भोगसेवित-भोगनेवाले जीवात्मा को तथा भोगरहित न भोगनेवाले जड़ के प्रति (विष्वक्-व्यक्रामत्) विविध गुणवत्ता से व्याप्त होता है ॥४॥

▼ ***ब्रह्ममुनि - भावार्थः***

भावार्थभाषाः - पूर्ण पुरुष परमात्मा अमृतरूप त्रिपाद इस संसार से ऊपर है, यह संसाररूप पाद पुनः-पुनः उत्पन्न होता है। इसके अन्दर भोगनेवाले जीव और न भोगनेवाले जड़ के अन्दर परमात्मा व्याप रहा है ॥४॥

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (त्रिपात्-पुरुषः) पूर्वोक्तः सोऽमृतरूपपादत्रययुक्तः पुरुषः परमात्मा (ऊर्ध्वः-उदैत्) नश्वर-संसारत उपरि स्थितः (अस्य पादः) अस्य पादः संसाररूपः (इह पुनः-अभवत्) ऐहिकः पुनः पुनः भवति (ततः) पश्चात् (साशनानशने अभि) सभोगं जीवात्मानं तथा खल्वभोगं जडं तदुभयं च (विष्वक्-व्यक्रामत्) विविधतया विविधगुणवत्तया व्याप्नोति ॥४॥

## 05 तस्माद्विराळजायत विराजो - अनुष्टुप्⑥

*(पादांशात्)* त"स्माद् **विरा"ड्***(→पुरुष-मेध-ब्राह्मणे छन्दोऽपि) (ब्रह्माण्ड-शरीरम्)* **अजायत** ।
*(तस्माद्)* विरा"जो अ"धि पू"रुषः *(ऋतात्मना /पुरुषमेध-कर्मरूपेण अजायत)* ।
स" जातो" **अ"त्यरिच्यत** -
*(क्वेति चेत् -)* पश्चा"द् *(विराजम्)* भू"मिम् अ"थो *(जीवानाम्)* पुरः" *(=पूर्वम्)*। ५

तस्मा॑द्वि॒राळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥

▼ ***अधिमन्त्रम् - sa***

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ ***Thomson & Solcum***

त″स्माद् विरा″ळ् अजायत
विरा″जो अ″धि पू″रुषः
स″ जातो″ अ″त्य् अरिच्यत
पश्चा″द् भू″मिम् अ″थो पुरः″

▼ *Vedaweb annotation*

### Strata

Popular for linguistic reasons, and possibly also for non-linguistic reasons

### Pāda-label

popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

### Morph

ajāyata ← √jan$^{i}$- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:MED}

tásmāt ← sá- ~ tá- (pronoun)
{case:ABL, gender:M, number:SG}

virā́ṭ ← virā́j- (nominal stem)
{case:NOM, gender:F, number:SG}

ádhi ← ádhi (invariable)
{}

pū́ruṣaḥ ← pū́ruṣa- (nominal stem)
{case:NOM, gender:M, number:SG}

virā́jaḥ ← virā́j- (nominal stem)
{case:ABL, gender:M, number:SG}

aricyata ← √ric- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:MED}

áti ← áti (invariable)
{}

jātáḥ ← √jani- (root)
{case:NOM, gender:M, number:SG, non-finite:PPP}

sá ← sá- ~ tá- (pronoun)
{case:NOM, gender:M, number:SG}

átha ← átha (invariable)
{}

bhū́mim ← bhū́mi- (nominal stem)
{case:ACC, gender:F, number:SG}

paścā́t ← paścā́t (invariable)
{}

purás ← purás (invariable)
{}

u ← u (invariable)
{}

▼ ***पद-पाठः***

तस्मा॑त् । वि॒राट् । अ॒जा॒य॒त॒ । वि॒ऽराजः॑ । अधि॑ । पुरु॑षः ।
सः । जा॒तः । अति॑ । अ॒रि॒च्य॒त॒ । प॒श्चात् । भूमि॑म् । अथो॒ इति॑ । पु॒रः ॥

▼ ***Hellwig Grammar***

- *tasmād* ← *tasmāt* ← *tad*
- [noun], ablative, singular, masculine
- "this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same."

- *virāḍ* ← *virāj*
- [noun], nominative, singular, feminine
- “Virāj; eminence.”

- *ajāyata* ← *jan*
- [verb], singular, Imperfect
- “become; originate; be born; transform; happen; result; grow; beget; produce; create; conceive; separate; cause; give birth; grow; produce; generate; be; become; arise; come on.”

- *virājo* ← *virājaḥ* ← *virāj*
- [noun], ablative, singular, feminine
- “Virāj; eminence.”

- *adhi*
- [adverb]
- “on; from; accordingly.”

- *pūruṣaḥ* ← *pūruṣa*
- [noun], nominative, singular, masculine
- “man; man; Puruṣa.”

- *sa* ← *tad*
- [noun], nominative, singular, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *jāto* ← *jātaḥ* ← *jan*

- [verb noun], nominative, singular
- “become; originate; be born; transform; happen; result; grow; beget; produce; create; conceive; separate; cause; give birth; grow; produce; generate; be; become; arise; come on.”

---

- *aty* ← *ati*
- [adverb]
- “very; excessively; beyond; excessively.”

---

- *aricyata* ← *ric*
- [verb], singular, Imperfekt Passiv
- “empty; liberate; concede; surrender; purge.”

---

- *paścād* ← *paścāt*
- [adverb]
- “subsequently; westward; paścāt [word]; after; back.”

---

- *bhūmim* ← *bhūmi*
- [noun], accusative, singular, feminine
- “floor; earth; Earth; real property; region; pṛthivī; location; Earth; place; bhūja; floor; pit; bhūmi [word]; one; hole; shop; distance; country; space; land; territory; topographic point.”

---

- *atho* ← *atha*
- [adverb]
- “now; then; furthermore; now; then.”

---

- *atho* ← *u*
- [adverb]
- “ukāra; besides; now; indeed; u.”

- *puraḥ* ← *puras*
- [adverb]
- “ahead; puras [word]; easterly; eastward; east; earlier.”

▼ ***रङ्गनाथः***

तस्मात्- पुरुषात्। विराट्- ब्रह्माण्डदेहः। अजायत- उद्भूतः। विराजः- ब्रह्माण्डदेहात्। अधि। पुरुषः- तदन्तर्यामित्वेन पुरुषो जातः। सः- असौ पुरुषः। जातः- अन्तर्यामित्वेन जातः सन्नेव। पश्चात्- अनन्तरम्। भूमिम्- प्रकृतिम्। पुरः- प्राकृतशरीरम्। अत्यरिच्यत- अतिक्रम्य विशिष्यते। अन्तर्यामिभावङ्गतविष्णोरपि स्वरूपतो न नाश इति भावः॥५॥

▼ ***सायण-भाष्यम्***

विष्वङ् व्यक्रामद् इति यदुक्तं तद् एवात्र प्रपञ्च्यते । **तस्मात्** आदिपुरुषात् **विराट्** ब्रह्माण्ड-देहः **अजायत** उत्पन्नः । विविधानि राजन्ते वस्तून्यत्रेति विराट् । **विराजोऽधि** विराड्-देहस्योपरि - तम् एव देहम् अधिकरणं कृत्वा **पुरुषः** तद्देहाभिमानी कश्चित् पुमान् अजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयम् एव स्वकीयया मायया विराड्-देहं ब्रह्माण्ड-रूपं सृष्ट्वा तत्र जीव-रूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् ।*(4)* एतच् चाथर्वणिका उत्तर-तापनीये विस्पष्टम् आमनन्ति----

> स वा एष
> भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा
> प्रविश्यामूढो मूढ इव व्यवहरन्न् आस्ते माययैव
> (नृ. ता. २. १, ९)

इति । **स जातः** विराट् पुरुषः **अत्यरिच्यत** अतिरिक्तोऽभूत् । विराड्-व्यतिरिक्तो देव-तिर्यङ्-मनुष्यादिरूपोऽभूत् ।
**पश्चात्** देवादि-जीव-भावाद् ऊर्ध्वं **भूमिं** ससर्जेति शेषः । **अथो** भूमिसृष्टेर् अनन्तरं तेषां जीवानां **पुरः** ससर्ज ।
पूर्यन्ते सप्तभिर् धातुभिर् इति **पुरः** शरीराणि ॥॥१७॥

▼ ***भट्टभास्कर-टीका***

5इदानीं सृष्टिरुच्यते - तस्मात् प्रणवाख्यान् नारायणात् । अव्यक्तादिति केचित्, तदयुक्तं, तस्याप्रस्तुतत्वात् । तस्मात् प्रकृतान्महापुरुषाद् विराडजायत विविधं राजन्ति वस्तूनि यस्मिन् स विराट् मनस्सञ्ज्ञः प्रजापतिः । ततो विराजो अधि विराजमेवाधिकरणीकृत्य पुरुषोऽजायत दशहोत्राख्यः प्रजापतिः पुरुषसमष्ट्यात्मना अजायत । यथोक्तं 'स मानसीन आत्मा जनानाम्' इति । स वैराजः पुरुषः जातः प्रादुर्भावानन्तरम् अत्यरिच्यत स्वयमेव आत्मानमत्यरेचयत् ।

कर्मकर्तरि रूपम् । अनेकधाभावलक्षणं स्वरूपातिरेकमभजत भूतेन्द्रियादीन्यसृजतेति यावत् । उक्तं च 'असतोऽधि मनोऽसृज्यत । मनः प्रजापतिमसृजत । प्रजापतिः प्रजा असृजत' इति । पश्चादिति । भूतग्रामस्यान्ते भूमिम् अत्यरेचयत् । सामर्थ्यात् कर्मकर्तृभावो निवर्तते । एवम् आकाशादिपृथिव्यन्तानां तत्त्वानां सर्ग उक्तः । अथो अनन्तरं भूतसृष्टेः पुरः पुराणि शरीराणि सुरनरतिर्यगादीनां स्थावरादीनां च अत्यरेचयत् । पुर इत्यत्र छान्दसं विभक्त्युदात्तत्वम् । एवमिन्द्रियसर्गः पिण्डसर्गश्च प्रतिपादितः ॥

▼ *मध्वः*

विष्वङ् व्यक्रामदिति यदुक्तं तदेव प्रपञ्च्यते । ततः **तस्मात्** आदिपुरुषात् **विराट्** ब्रह्माण्डदेहो **अजायत** जातः । विविधं राजन्ते वस्तनि अत्रेति **विराट्** । **विराजः अधि** विराड्देहस्योपरि तमेव देहम् अधिकरणं कृत्वा **पुरुषः** तद्देहाभिमानी एक एव पुमान् अजायत । सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् इत्यर्थः । एतञ्च अथर्वणोत्तरतापनीये स्पष्टमुक्तम् ‘स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वात्र प्रविष्ट प्रविश्य अमूढो मूढ इव व्यवहरनास्ते माययैव' (नृ.उ.ता.२-१-९) इति । किंच स जातो विराट्पुरुषः अत्यरिच्यत अतिरिक्तो देवतिर्यमनुष्यादिरूपोऽभूत् पश्चात् देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः । अथो भूमिसृष्टेः अनन्तरं तेषां जीवानां पुरः ससर्ज । पूर्यन्ते सप्तभिः धातुभिः इति पुरः शरीराणि ।। ५ ।।

▼ *Wilson*

---

## English translation:

“From him was born Virāt. and from Virāt. **Puruṣa**;
he, as soon as born, became manifested,
and afterwards (created) the earth (and) then corporeal forms.”

---

## Commentary by Sāyaṇa: Ṛgveda-bhāṣya

From him: tasmāt = from that one-fourth; or, from the spirit who by his delusion created the body of **Virāṭ**, i.e., the egg of **Brahma** and entered into it in the form oflife

▼ *Jamison Brereton*

From him the Virāj was born; from the Virāj the Man.
Upon his birth, he reached beyond the earth from behind and also

from in front.

▼ *Griffith*

From him Viraj was born;
again Purusa from Viraj was born.
As soon as he was born he spread eastward and westward o'er the earth.

▼ *Geldner*

Aus ihm ward die Viraj geboren, aus der Viraj der Purusa. Geboren ragte er hinten und vorn über die Erde hinaus.

▼ *Grassmann*

Von ihm ward der Allherrscher [virâj] geboren und vom Allherrscher der Urmensch. Als er geboren war überragte er die Erde von hinten und von vorn.

▼ *Elizarenkova*

От него Вирадж родилась,
От Вираджи – Пуруша.
Родившись, он стал выступать
Над землей сзади и спереди.

▼ *अधिमन्त्रम् (VC)*

- पुरुषः
- नारायणः
- अनुष्टुप्
- गान्धारः

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (ततः-विराट्-अजायत) उस परमात्मा से विविध पदार्थों के साथ राजमान संसार उत्पन्न हुआ (विराजः-अधि पूरुषः) उस विविध पदार्थों से राजमान संसार के ऊपर अधिष्ठाता पुरुष परमात्मा है (पश्चात् सः-जातः) पश्चात् वहविविध पदार्थों से राजमान संसार

प्रकट हुआ, परमात्मा के अधीन (भूमिम्) जिसमें भूत उत्पन्न होते हैं, ऐसे उत्पत्तिस्थान लोक को (अथ पुरः) अनन्तर उस लोक पर देहनगरियों को (अति अरिच्यत) बाहर निकालता है- प्रकट करता है ॥५॥

▼ *ब्रह्ममुनि - भावार्थः*

भावार्थभाषाः - विविध पदार्थों से युक्त संसार को परमात्मा रचता है, उसके अधीनत्व में लोक-लोकान्तर उससे प्रकट होते हैं तथा लोक पर देह उत्पन्न होते हैं ॥५॥

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (ततः-विराट्-अजायत) ततः-परमात्मनः सकाशात्-विविधपदार्थैः सह राजमानः संसार उत्पन्नः (विराजः-अधि पूरुषः) विविधतया राजमानस्य संसारस्योपरि-अधिष्ठाता पुरुषः परमात्मा “अधि-उपरि अधिष्ठाता” [दयानन्दः] पश्चात् (सः-जगतः) पश्चात् स विराट् प्रकटीभूतः सन् परमात्मनोऽधिष्ठातृत्वे (भूमिम्-अथ पुरः-अति अरिच्यत) भवन्ति भूतानि यस्मिन् तदुत्पत्तिस्थानं लोकमनन्तरं देहपुरश्च व्यक्तीकरोति “रिचिर् विरेचने” [रुधादि०] ॥५॥

## 06 यत्पुरुषेण हविषा - अनुष्टुप्⑥

य"त् *(वक्ष्यमाणेन कालभागेन)* पु"रुषेण हवि"षा ।
*(त्रिपादङ्गभूता)* देवा" यज्ञ"म् **अ"तन्वत** ।
*(पुरुष-हविषो विभागाः -)* वसन्तो" **अस्यासीद्** आ"ज्यम् ।
ग्रीष्म" इध्मः" शर"द् *(अन्नादिरूपम्)* +हविः" । ६

यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।
व॒स॒न्तो अ॑स्यासी॒दाज्यं॑ ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः ॥

▼ *अधिमन्त्रम् - sa*

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ *Thomson & Solcum*

य॑त् पु॑रुषेण हवि॑षा
देवा॑ यज्ञ॑म् अ॑तन्वत
वसन्तो॑ अस्यासीद् आ॑ज्यं
ग्रीष्म॑ इध्मः॑ शर॑द् धविः॑

▾ *Vedaweb annotation*

**Strata**
Popular for linguistic reasons, and possibly also for non-linguistic reasons

**Pāda-label**
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

**Morph**
havíṣā ← havís- (nominal stem)
{case:INS, gender:N, number:SG}

púruṣeṇa ← púruṣa- (nominal stem)
{case:INS, gender:M, number:SG}

yát ← yá- (pronoun)
{case:NOM, gender:N, number:SG}

átanvata ← √tan- (root)
{number:PL, person:3, mood:IND, tense:IPRF, voice:MED}

devā́ḥ ← devá- (nominal stem)
{case:NOM, gender:M, number:PL}

yajñám ← yajñá- (nominal stem)
{case:ACC, gender:M, number:SG}

ā́jyam ← ā́jya- (nominal stem)
{case:NOM, gender:N, number:SG}

āsīt ← √as- 1 (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:ACT}

asya ← ayám (pronoun)
{case:GEN, gender:M, number:SG}

vasantáḥ ← vasantá- (nominal stem)
{case:NOM, gender:M, number:SG}

grīṣmáḥ ← grīṣmá- (nominal stem)
{case:NOM, gender:M, number:SG}

havíḥ ← havís- (nominal stem)
{case:NOM, gender:N, number:SG}

idhmáḥ ← idhmá- (nominal stem)
{case:NOM, gender:M, number:SG}

śarát ← śarád- (nominal stem)
{case:NOM, gender:F, number:SG}

▼ ***पद-पाठः***

यत् । पुरुंषेण । हविषां । देवाः । यज्ञम् । अतंन्वत ।
वसन्तः । अस्य । आसीत् । आज्यंम् । ग्रीष्मः । इध्मः । शरत् । हविः ॥

▼ ***Hellwig Grammar***

- *yat*
- [adverb]
- “once [when]; because; that; if; how.”

---

- *puruṣeṇa* ← *puruṣa*
- [noun], instrumental, singular, masculine

- “man; man; Puruṣa; puṃvajra; puruṣa; servant; puruṣa [word]; assistant; soldier; soul; commoner; generation; people; doll.”

---

- *haviṣā* ← *havis*
- [noun], instrumental, singular, neuter
- “Havya; offering; ghee; havis [word].”

---

- *devā* ← *devāḥ* ← *deva*
- [noun], nominative, plural, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

---

- *yajñam* ← *yajña*
- [noun], accusative, singular, masculine
- “yajña; religious ceremony; Vishnu; yajña [word]; Yajña; Shiva.”

---

- *atanvata* ← *tan*
- [verb], plural, Imperfect
- “expand; perform; cause; increase; write; spread; produce; spread; speak; propagate.”

---

- *vasanto* ← *vasantaḥ* ← *vasanta*
- [noun], nominative, singular, masculine
- “spring; vasanta [word].”

---

- *asyāsīd* ← *asya* ← *idam*
- [noun], genitive, singular, masculine
- “this; he,she,it (pers. pron.); here.”

---

- *asyāsīd ← āsīt ← as*
- [verb], singular, Imperfect
- “be; exist; become; originate; happen; result; be; dwell; be born; stay; be; equal; exist; transform.”

---

- *ājyaṃ ← ājyam ← ājya*
- [noun], nominative, singular, neuter
- “ghee; clarified butter; ājya.”

---

- *grīṣma ← grīṣmaḥ ← grīṣma*
- [noun], nominative, singular, masculine
- “summer; grīṣma [word].”

---

- *idhmaḥ ← idhma*
- [noun], nominative, singular, masculine
- “fuel.”

---

- *śaraddhaviḥ ← śarad*
- [noun], nominative, singular, feminine
- “fall; year; śarad [word].”

---

- *śaraddhaviḥ ← haviḥ ← havis*
- [noun], nominative, singular, neuter
- “Havya; offering; ghee; havis [word].”

---

▼ ***रङ्गनाथः***

यत्- यदा। पुरुषेण- आत्माख्येन। हविषा- हव्येन। देवाः- द्योतनशक्तयः। यज्ञम्- उपासनम्। अतन्वत- विस्तृतवन्तः। तदा। अस्य- एतस्य पुरुषस्य। वसन्तः। आज्यमासीत्। ग्रीष्मः। इध्मः। शरत्। हविः॥६॥

▼ ***सायण-भाष्यम्***

**यत्** यदा पूर्वोक्तक्रमेणैव शरीरेषुत्पन्नेषु सत्सु **देवाः** उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरसंभवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य **पुरुषेण** पुरुषाख्येन **हविषा** मानसं यज्ञम् **अतन्वत** अन्वतिष्ठन् तदानीम् **अस्य** यज्ञस्य **वसन्तः** वसन्तर्तुरेव **आज्यम् आसीत्** अभूत् । तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं **ग्रीष्म इध्मः** आसीत्। तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः। तथा **शरद्धविः** आसीत् । तामेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्त इत्यर्थः । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः । अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् ॥

▼ *भट्टभास्कर-टीका*

6इदानीं सृष्टिविशेष उच्यते - यदिति ॥ यद् यदा पुरुषेण प्रजापतिना हविषा हविष्ट्वेन सङ्कल्पितेन हविरन्तरस्याभावाद् देवाः प्राणाः प्राजापत्या इन्द्रियाणि च यज्ञं सङ्कल्पात्मकम् अतन्वत यज्ञमिव अकुर्वत । सृष्टिकामः प्रजापतिरेव प्राणादिवृत्तिभेदेनोच्यते । अथ अस्य यज्ञस्य वसन्त आज्यमासीत्, तत्र गवां भूयिष्ठत्वात् तमेवर्तुं तद्विकाराज्यकार्याय समकल्पयत् । एवं ग्रीष्मशरदौ व्याख्येये ॥

▼ *Wilson*

## English translation:

“When the gods performed the sacrifice with **Puruṣa** as the offering, then Spring was its ghī, Summerthe fuel, and Autumn the oblation.”

## Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Apparently a reference to an imaginary sacrifice (mānasam)

▼ *Jamison Brereton*

When, with the Man as the offering, the gods extended the sacrifice, spring was its melted butter, summer its firewood, autumn its offering.

▼ *Griffith*

When Gods prepared the sacrifice with Purusa as their offering,
Its oil was spring, the holy gift was autumn; summer was the

wood.

▼ *Geldner*

Als die Götter mit Purusa das Opfer vollzogen, da war der Frühling dessen Schmelzbutter, der Sommer das Brennholz, der Herbst die Opfergabe.

▼ *Grassmann*

Als die Götter ihr Opfer mit dem Urmenschen als dem Opfertrank kunstvoll bereiteten, da war der Frühling sein Opferschmalz, der Sommer sein Brennholz, der Herbst sein Opfertrank.

▼ *Elizarenkova*

Когда боги предприняли жертвоприношение
С Пурушей как с жертвенным даром,
Весна была его жертвенным маслом,
Лето – дровами, осень – жертвенным даром.

▼ *अधिमन्त्रम् (VC)*

- पुरुषः
- नारायणः
- अनुष्टुप्
- गान्धारः

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (यत्)जब (देवाः)सृष्टि के आरम्भ में वेदप्रकाशक परमर्षि अग्न्यादि महानुभाव (पुरुषेण हविषा) अपने आत्मा में धारण करने योग्य परमात्मा द्वारा (यज्ञम्-अतन्वत) मानस यज्ञ को सेवन करते हैं (अस्य) तो इस यज्ञ का (वसन्तः-आज्यम्) वसन्त ऋतु घृत (आसीत्)होता है, वसन्त में ओषधियाँ उत्पन्न होती हैं, अतः अध्यात्मयज्ञ को प्रबोधित करने के लिये वह घृतसमान है (ग्रीष्मः-इध्मः) ग्रीष्म ऋतु इन्धन होता है, क्योंकि ग्रीष्म में वनस्पतियाँ बढ़ती हैं, अतः वह इन्धन के समान है (शरत्-हविः) शरद् ऋतु हव्य द्रव्य होता है, शरद्ऋतु में वनस्पतियाँ समृद्ध पुष्ट होती हैं, इसलिए अध्यात्मयज्ञ की समृद्धि का कारण शरद् ऋतु है ॥६॥

▼ ***ब्रह्ममुनि - भावार्थः***

भावार्थभाषाः - आदि सृष्टि में वेदप्रकाशक ऋषि अध्यात्मयज्ञ का अनुष्ठान करते हैं। अपने आत्मा में धारण करने योग्य परमात्मा के द्वारा उसका रचा वसन्तऋतु घृतसमान होकर अध्यात्मयज्ञ को प्रबोधित करता है, भिन्न-भिन्न ओषधियों के उत्पन्न होने से परमात्मा है, इस भाव जागृत करता है, पुनः ग्रीष्म ऋतु इसकी समिधा इन्धन बन जाता है, क्योंकि ग्रीष्म ऋतु में ओषधियाँ बढ़ती हैं, तो परमात्मा की आस्तिकता में दृढ़ता आ जाती है, पुनः शरद् ऋतु उसका हव्यपदार्थ हो जाता है, क्योंकि शरद् ऋतु में ओषधियाँ पुष्ट होती हैं, अतः परमात्मा का साक्षात् होने का निमित्त बन जाता है ॥६॥

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (यत्) यदा (देवाः) सृष्टेरारम्भे वेदप्रकाशकाः परमर्षयोऽग्निप्रभृतयः (पुरुषेण हविषा यज्ञम्-अतन्वत) निजात्मनि धारयितुं योग्येन परमात्मना मानसं यज्ञमन्वतिष्ठन् (अस्य) एतस्य यज्ञस्य (वसन्तः-आज्यम्-आसीत्) वसन्तर्तुर्धृतमासीत्-वसन्ते खल्वोषधय उत्पद्यन्तेऽतोऽध्यात्मयज्ञं प्रबोधयन्ति (ग्रीष्मः-इध्मः) ग्रीष्मर्तुरिन्धनमासीत्-यतो ग्रीष्मे वनस्पतयो वर्धन्ते (शरत्-हविः) शरदृतुर्हव्यद्रव्यमासीत्-शरदि वनस्पतयः समृध्यन्ते तस्मादध्यात्म-यज्ञस्य समृद्धिकारणं भवति शरत् ॥६॥

## 07 सप्तास्यासन् परिधयः⑥

**सप्ता"ऽस्याऽऽसन्** परिध"यः ।
त्रिः" सप्त" *(२१!)* समि"धः **कृताः"** *(इध्म-सन्नाहः!)*।
*(त्रिपादङ्गभूता)* देवा" य"द् यज्ञं" **तन्वानाः"** ।
**अ"बध्नन्** *(एकपात्)* पु"रुषं पशु"म् । ७

स॒प्तास्या॑सन्परि॒धय॒स्त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न्पुरु॑षं प॒शुम् ॥

▼ ***अधिमन्त्रम् - sa***

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ ***Thomson & Solcum***

सप्ता॑स्यासन् परिध॑यस्
त्रिः॑ सप्त॑ समि॑धः कृताः॑
देवा॑ य॑द् यज्ञं॑ तन्वाना॑
अ॑बध्नन् पु॑रुषम् पशु॑म्

▾ *Vedaweb annotation*

**Strata**
Popular for linguistic reasons, and possibly also for non-linguistic reasons

**Pāda-label**
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

**Morph**
aukṣan ← √ukṣ- (root)
{number:PL, person:3, mood:IND, tense:IPRF, voice:ACT}

barhíṣi ← barhís- (nominal stem)
{case:LOC, gender:N, number:SG}

prá ← prá (invariable)
{}

tám ← sá- ~ tá- (pronoun)
{case:ACC, gender:M, number:SG}

yajñám ← yajñá- (nominal stem)
{case:ACC, gender:M, number:SG}

agratás ← agratás (invariable)
{}

jātám ← √janⁱ- (root)
{case:NOM, gender:M, number:SG, non-finite:PPP}

púruṣam ← púruṣa- (nominal stem)
{case:ACC, gender:M, number:SG}

ayajanta ← √yaj- (root)
{number:PL, person:3, mood:IND, tense:PRS, voice:MED}

devā́ḥ ← devá- (nominal stem)
{case:NOM, gender:M, number:PL}

téna ← sá- ~ tá- (pronoun)
{case:INS, gender:M, number:SG}

ca ← ca (invariable)
{}

ṛ́ṣayaḥ ← ṛ́ṣi- (nominal stem)
{case:NOM, gender:M, number:PL}

sādhyā́ḥ ← sādhyá- (nominal stem)
{case:NOM, gender:M, number:PL}

yé ← yá- (pronoun)
{}

▼ *पद-पाठः*

स॒प्त । अ॒स्य॒ । आ॒स॒न् । प॒रि॒ऽधयः॑ । त्रिः । स॒प्त । स॒म्ऽइधः॑ । कृ॒ताः ।
दे॒वाः । यत् । य॒ज्ञम् । त॒न्वा॒नाः । अब॑ध्नन् । पुरु॑षम् । प॒शुम् ॥

▼ *Hellwig Grammar*

- *taṃ ← tam ← tad*
- [noun], accusative, singular, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

- *yajñam* ← *yajña*
- [noun], accusative, singular, masculine
- “yajña; religious ceremony; Vishnu; yajña [word]; Yajña; Shiva.”

---

- *barhiṣi* ← *barhis*
- [noun], locative, singular, neuter
- “Barhis; barhis [word].”

---

- *praukṣan* ← *prokṣ* ← *√ukṣ*
- [verb], plural, Imperfect
- “butcher; consecrate; sprinkle.”

---

- *puruṣaṃ* ← *puruṣam* ← *puruṣa*
- [noun], accusative, singular, masculine
- “man; man; Puruṣa; puṃvajra; puruṣa; servant; puruṣa [word]; assistant; soldier; soul; commoner; generation; people; doll.”

---

- *jātam* ← *jan*
- [verb noun], accusative, singular
- “become; originate; be born; transform; happen; result; grow; beget; produce; create; conceive; separate; cause; give birth; grow; produce; generate; be; become; arise; come on.”

---

- *agrataḥ* ← *agratas*
- [adverb]
- “ahead; first; agratas [word]; earlier.”

---

- *tena* ← *tad*
- [noun], instrumental, singular, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

---

- *devā* ← *devāḥ* ← *deva*
- [noun], nominative, plural, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

---

- *ayajanta* ← *yaj*
- [verb], plural, Imperfect
- “sacrifice; worship; worship.”

---

- *sādhyā* ← *sādhyāḥ* ← *sādhya*
- [noun], nominative, plural, masculine
- “Sādhya.”

---

- *ṛṣayaś* ← *ṛṣayaḥ* ← *ṛṣi*
- [noun], nominative, plural, masculine
- “Ṛṣi; spiritual teacher; ascetic; Mantra.”

---

- *ca*
- [adverb]
- “and; besides; then; now; even.”

---

- *ye* ← *yad*
- [noun], nominative, plural, masculine
- “who; which; yat [pronoun].”

---

▼ *रङ्गनाथः*

तम्- अमुम्। यज्ञम्- विष्णुमात्मानम्। अग्रतः जातम्- अस्मिन् पुरे पूर्वजम्। पुरुषम्- अन्तर्यामिणम्। बर्हिषि- चित्तासने। बर्हिःशब्दोन्तरिक्षनामसु पठितः। प्रौक्षन्- संस्कृतवन्तः। तेन- अनेन पुरुषाख्येन हव्येन। देवाः- द्योतनशक्तयः। साध्या ऋषयश्च ये- सिद्धानि दर्शनानि च। अयजन्त- विष्णुमेव उपासञ्चक्रिरे। शारीरिकेण त्रिपाद्विभूतिं विष्णुं पूजां कुर्वन्तीति भावः॥७॥

▼ *सायण-भाष्यम्*

**अस्य** सांकल्पिकयज्ञस्य गायत्र्यादीनि **सप्त** छन्दांसि परिधयः **आसन्** । ऐष्टिकस्याहवनीयस्य त्रयः परिधय उत्तरवेदिकास्त्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अत एवाम्नायते-- न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्ति' (तै. सं. २.६.६.३) इति । तत एत आदित्यसहिताः सप्त परिधयोऽत्र सप्त छन्दोरूपाः । तथा **समिधः त्रिः** सप्त त्रिगुणीकृतसप्तसंख्याकाः एकविंशतिः **कृताः** । द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः ( तै. सं. ५.१.१०.३) इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः। यत् यः पुरुषो वैराजोऽस्ति ते **पुरुषं देवाः** प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं तन्वानाः कुर्वाणाः पशुम् **अबध्नन्** विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र ‘ यत्पुरुषेण हविषा' इत्युक्तम् ॥

▼ *भट्टभास्कर-टीका*

7अथ अस्य यज्ञस्य सप्त पदार्थाश् छन्दांसि परिधय आसन् छन्दांस्येव परिधित्वेन अबुध्यन् । तत्र त्रय औत्तरवेदिकाः परिधयस्त्रयस्तान्त्रिका आदित्यस्सप्तम इति । 'आदित्यो ह्येवोद्यन्पुरस्तादृक्षांस्यपहन्ति' इति परिधित्वमादित्यस्य । अथास्य यज्ञस्य त्रिस्सप्त एकविंशतिपदार्थाः समिधः कृताः 'द्वादश मासाः पञ्चर्तवः । त्रय इमे लोकाः । असावादित्य एकविंशः' इति इध्मत्वेन एते कल्पिता इति । एवम् इध्मावयवानाम् एकविंशतेर्दारूणां सम्पादनेन इध्मनिरूपणं कृतम् । पूर्वं तु पृथक्त्वेन परिधानकाले परिधिनिरूपणं कृतमिति द्रष्टव्यम् । एवं प्राजापत्यं सङ्कल्पयज्ञं कल्पयित्वा तत्फलं प्रपञ्चसृष्टिमाह - देवा इति । देवाः प्राणाः प्राजापत्या यज्ञं सङ्कल्पात्मकं तन्वाना यद् यदा पुरुषं प्रजापतिं पशुम् अबध्नन् मनसा पशुत्वेन सङ्कल्पितवन्तः नियोजनमिव कृतवन्तः ॥

▼ *Wilson*

## English translation:

“Seven were the enclosures of the sacrifice, thrice seven logs of fuel were prepared, when the gods,celebrating the rite, bound **Puruṣa** as the victim.”

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

Seven enclosures: sapta paridhayaḥ = seven metres, ga-yatrīetc., and also as meaning the shallow trenches, three of which were dug round the **Āhavanīya** fireplace, threeround the northern altar, and the seven ideally dug round the sun to keep off evil spirits. paridhayaḥ = moats; or,the seven oceans; thrice seven pieces of fuel = twelve months of the year, the five seasons, the **three worlds** andthe sun; or the three classes of seven metres eaach: **Taittirīya Saṃhitā** 5.1.10.3

▾ *Jamison Brereton*

Its enclosing sticks were seven; the kindling sticks were made three times seven,
when the gods, extending the sacrifice, bound the Man as the (sacrificial) animal.

▾ *Griffith*

Seven fencing-sticks had he, thrice seven layers of fuel were prepared,
When the Gods, offering sacrifice, bound, as their victim, Purusa.

▾ *Geldner*

Ihn besprengten, weihten sie als Opfer auf dem Barhis, den am Anfang geborenen Purusa. Diesen brachten die Götter, die Sadhya´s und die Rishi´s sich zum Opfer.

▾ *Grassmann*

Diesen zuerst geborenen Urmenschen benetzten sie als ihr Opfer auf der heiligen Streu; durch ihn opferten die Götter die Sādhja's [die zu gewinnenden] und die Rischi's.

▾ *Elizarenkova*

Его как жертву кропили на жертвенной соломе,
Пурушу, рожденного в начале.
Его принесли себе в жертву боги
И (те,) что садхья и риши.

▼ ***अधिमन्त्रम् (VC)***

- पुरुषः
- नारायणः
- निचृदनुष्टुप्
- गान्धारः

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (अग्रतः-जातम्)पूर्व से प्रसिद्ध (तं यज्ञं पुरुषम्) उस यजनीय सङ्गमनीय परमात्मा को (बर्हिषि-प्र औक्षन्)हृदयाकाश में आर्द्रभावना से सींचते हैं, प्रसन्न करते हैं (च) और (तेन) उस परमात्मा द्वारा अर्थात् उसे लक्षित कर (देवाः) अन्य विद्वान् (ये) जो (साध्याः-ऋषयः) साधनापरायण मन्त्रद्रष्टा जन (अयजन्त) अध्यात्मयज्ञ करते हैं ॥७॥

▼ ***ब्रह्ममुनि - भावार्थः***

भावार्थभाषाः - परमात्मा पूर्व से प्रसिद्ध वर्त्तमान है, उस समागम के योग्य को साधनापरायण ऋषिजन हृदयाकाश में आर्द्रभावनाओं, श्रद्धा प्रेम भरी स्तुतियों द्वारा प्रसन्न करते हैं, तो उनके अन्दर वह साक्षात् होकर कल्याण का निमित्त बनता है ॥७॥

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (अग्रतः-जातं तं यज्ञं पुरुषम्) पूर्वतः प्रसिद्धं तं यजनीयं सङ्गमनीयं परमात्मानं (बर्हिषि-प्र औक्षन्) हृदयाकाशे-“बर्हिः-अन्तरिक्षनाम” [निघं० १।३] आर्द्रभावनाभिः सिञ्चन्ति-प्रसादयन्ति (च) तथा (तेन) पुरुषेण परमात्मना-तं लक्षयित्वा (देवाः) अन्यविद्वांसः (ये) ये खलु (साध्याः-ऋषयः) साधनापरायणाः-मन्त्रद्रष्टारः (अयजन्त) अध्यात्मयज्ञं कृतवन्तः ॥७॥

## 08 तं यज्ञम् - अनुष्टुप्⑥

तं॑ यज्ञं॑ *(~तत्साधनभूतं पशुं)* बर्हि॑षि **प्रौ॑क्षन्** ।
पु॑रुषं **जात॑म्** अग्रतः॑ ।

ते॑न *(वक्ष्यमाणा)* देवा॑ **अयजन्त** -
*(अविशिष्टा नानापात्रेषु पश्चात्)* साध्या॑ ऋ॑षयश् च ये॑ । ८

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न्पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये ॥

▼ ***अधिमन्त्रम् - sa***

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ ***Thomson & Solcum***

तं॑ यज्ञ॑म् बर्हि॑षि प्रउ॑क्षन्
पु॑रुषं जात॑म् अग्रतः॑
ते॑न देवा॑ अयजन्त
साधिया॑ ऋ॑षयश् च ये॑

▼ ***Vedaweb annotation***

---

**Strata**

Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

**Pāda-label**

popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

---

**Morph**

sarvahútaḥ ← sarvahúta- (nominal stem)
{case:NOM, gender:M, number:SG}

tásmāt ← sá- ~ tá- (pronoun)
{case:ABL, gender:M, number:SG}

yajñā́t ← yajñá- (nominal stem)
{case:ABL, gender:M, number:SG}

pr̥ṣadājyám ← pr̥ṣadājyá- (nominal stem)
{case:NOM, gender:N, number:SG}

sámbhr̥tam ← √bhr̥- (root)
{case:NOM, gender:M, number:SG, non-finite:PPP}

cakre ← √kr̥- (root)
{number:SG, person:3, mood:IND, tense:PRF, voice:MED}

paśū́n ← paśú- (nominal stem)
{case:ACC, gender:M, number:PL}

tā́n ← sá- ~ tá- (pronoun)
{case:ACC, gender:M, number:PL}

vāyavyā̀n ← vāyavyà- (nominal stem)
{case:ACC, gender:M, number:PL}

āraṇyā́n ← āraṇyá- (nominal stem)
{case:ACC, gender:M, number:PL}

ca ← ca (invariable)
{}

grāmyā́ḥ ← grāmyá- (nominal stem)
{case:NOM, gender:M, number:PL}

yé ← yá- (pronoun)
{}

▼ **पद-पाठः**

तम् । य॒ज्ञम् । ब॒र्हिषि॑ । प्र । औ॒क्ष॒न् । पुरु॑षम् । जा॒तम् । अ॒ग्र॒तः ।
तेन॑ । दे॒वाः । अ॒य॒ज॒न्त॒ । सा॒ध्याः । ऋष॑यः । च॒ । ये ॥

▼ ***Hellwig Grammar***

- *tasmād ← tasmāt ← tad*
- [noun], ablative, singular, masculine
- "this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same."

---

- *yajñāt ← yajña*
- [noun], ablative, singular, masculine
- "yajña; religious ceremony; Vishnu; yajña [word]; Yajña; Shiva."

---

- *sarvahutaḥ ← sarva*
- [noun]
- "all(a); whole; complete; sarva [word]; every(a); each(a); all; entire; sāṃnipātika; manifold; complete; all the(a); different; overall."

---

- *sarvahutaḥ ← hutaḥ ← hu*
- [verb noun], nominative, singular
- "sacrifice; offer; pour; worship."

---

- *saṃbhṛtam ← sambhṛ ← √bhṛ*
- [verb noun], nominative, singular
- "gather; collect; fill; mix; fill into; produce."

---

- *pṛṣadājyam ← pṛṣadājya*
- [noun], nominative, singular, neuter

---

- *paśūn ← paśu*
- [noun], accusative, plural, masculine
- “domestic animal; sacrificial animal; animal; cattle; Paśu; stupid; Paśu; herd; goat.”

---

- *tāṃś ← tān ← tad*
- [noun], accusative, plural, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

---

- *cakre ← kṛ*
- [verb], singular, Perfect indicative
- “make; perform; cause; produce; shape; construct; do; put; fill into; use; fuel; transform; bore; act; write; create; prepare; administer; dig; prepare; treat; take effect; add; trace; put on; process; treat; heed; hire; act; produce; assume; eat; ignite; chop; treat; obey; manufacture; appoint; evacuate; choose; understand; insert; happen; envelop; weigh; observe; practice; lend; bring; duplicate; plant; kṛ; concentrate; mix; knot; join; take; provide; utter; compose.”

---

- *vāyavyān ← vāyavya*
- [noun], accusative, plural, masculine
- “aerial; air(a).”

---

- *āraṇyān ← āraṇya*
- [noun], accusative, plural, masculine
- “sylvan; wild; wild.”

---

- *grāmyāś ← grāmyāḥ ← grāmya*
- [noun], nominative, plural, masculine

- “domestic; cultivated; tame; sexual; rural; coarse; coarse.”

---

- *ca*
- [adverb]
- “and; besides; then; now; even.”

---

- *ye* ← *yad*
- [noun], nominative, plural, masculine
- “who; which; yat [pronoun].”

---

▼ ***रङ्गनाथः***

तस्मात्। सर्वहुतः- सर्वात्मकपुरुषहव्यात्मकात्। यज्ञात्- उपासनातः। पृषदाज्यम्। संभृतम्- सम्पादितम्। तान्। वायव्यान्- प्राणिनः। आरण्यान् ग्राम्यांश्च ये पशून्- वन्यग्राम्यमृगान्। चक्रे- उत्पादितवान्॥८॥

▼ ***सायण-भाष्यम्***

यज्ञं यज्ञसाधनभूतं **तं** पुरुषं पशुत्वभावनया यूपे बद्धं **बर्हिषि** मानसे यज्ञे **प्रौक्षन्** प्रोक्षितवन्तः । कीदृशमित्यत्राह। **अग्रतः** सर्वसृष्टेः पूर्वं **पुरुषं जातं** पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तं तस्माद्विराळजायत विराजो अधि पूरुषः' इति । तेन पुरुषरूपेण पशुना **देवा अयजन्त** । मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह। **साध्याः** सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः **ऋषयः** मन्त्रद्रष्टारः **च ये** सन्ति । ते सर्वेऽप्ययजन्तेत्यर्थः ॥

▼ ***विश्वास-टिप्पनी***

अयजन्त इत्यत्र - अकार उदात्तः तैत्तिरीये - 'चवायोगे प्रथमा'।

▼ ***भट्टभास्कर-टीका***

8तदानीमेव पुरुषं प्रजापतिम् अग्रे सर्वविकाराणां मुखे बन्धनानन्तरं पुरुषं जातं विराट्सञ्ज्ञकं पुरुषरूपेण जातं यज्ञं यज्ञसाधनम् । करणे नञ्प्रत्ययः । बर्हिषि यज्ञे यज्ञार्थं प्रौक्षन् प्रोक्षणमिव मनसा कृतवन्तः । कथमन्यो नियुज्यते अन्यः प्रोक्ष्यते इति चेन्न, अभेदात् । अथ तेन विराजा पुरुषेण देवाः प्राणा अयजन्त यज्ञो वर्तत इति मनसा सङ्कल्पमकुर्वत । केचिदाहुः - अग्रतो जातं यज्ञं यज्ञात्मानं पुरुषं यज्ञे पशुत्वेन प्रौक्षन् इति । यथोक्तं - 'यज्ञेन यज्ञमयजन्त देवाः' इति । साध्याश्च ऋषयश्च द्विप्रकारा अपि देवा अयजन्त ।
'चवायोगे प्रथमा' इति निघाताभावः *(तैत्तिरीये)* ।

साधयन्तीति साध्याः प्राणाः । 'कृत्यल्युटो बहुलम्' इति कर्तरि 'अचो यत्' इति ण्यन्ताद्यत्, उदात्तनिवृत्तिस्वरेण यत उदात्तत्वम् । ऋषयः द्रष्टार इन्द्रियाणि । द्वयेऽपि देवनशीलः देवा इत्युच्यन्ते ॥

▼ *Wilson*

---

**English translation:**

"They immolated as the victim upon the sacred grass - **Puruṣa**, born before (creation); with him the deities who were **Sādhyas** and those who were Ṛṣis sacrificed."

---

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

**Sādhya** = competent to create, i.e.,**Prajāpati** and the rest

▼ *Jamison Brereton*

On the ritual grass they consecrated that sacrifice, the Man, born at the beginning.
With him the gods sacrificed, (also) the Sādhyas and those who were seers.

▼ *Griffith*

They balmed as victim on the grass Purusa born in earliest time.
With him the Deities and all Sadhyas and Rsis sacrificed.

▼ *Geldner*

Aus diesem vollständig geopferten Opfer wurde das Opferschmalz gewonnen. Das machte er zu den in der Luft, im Wald und im Dorfe lebenden Tieren.

▼ *Grassmann*

Aus diesem vollständig dargebrachten Opfer sammelte sich das triefende Opferschmalz; er schuf die Thiere der Luft, der Wälder und der Dörfer [die Hausthiere].

▼ *Elizarenkova*

Из этой жертвы, полностью принесенной
Было собрано крапчатое жертвенное масло.
Он сделал из него животных, обитающих в воздухе,
В лесу и (тех,) что в деревне.

▼ *अधिमन्त्रम् (VC)*

- पुरुषः
- नारायणः
- विराडनुष्टुप्
- गान्धारः

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (तस्मात् सर्वहुतः-यज्ञात्)उस जिसमें सब जगत् प्रलय में हुत अर्थात् लीन हो जाता है या सबके द्वारा हूयमान ग्रहण करने योग्य परमात्मा है, उस यजनीय से (पृषदाज्यम्) अन्न रस (सम्भृतम्) सम्यक् निष्पन्न होता है, तथा (तान्) उन (पशून्) पशुओं को (वायव्यान्) पक्षियों को (चक्रे) उत्पन्न करता है (च) और (ये-आरण्याः ग्राम्याः) जो जङ्गल के और ग्राम के पशु-पक्षी हैं, उन सबको उत्पन्न करता है ॥८॥

▼ *ब्रह्ममुनि - भावार्थः*

भावार्थभाषाः - परमात्मा के अन्दर यह सारा जगत् प्रलयकाल में लीन हो जाता है तथा जो सबके द्वारा उपासना करने योग्य है, वह ऐसा परमात्मा अन्न रसमयी ओषधियों को उत्पन्न करता है तथा जङ्गल और नगर के पशु-पक्षियों को उत्पन्न करता है, मानने योग्य है ॥८॥

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (तस्मात् सर्वहुतः-यज्ञात्) तस्मात् सर्वं यस्मिन् हुतं भवति यद्वा सर्वैर्हूयमानो गृह्यमाणः पुरुषः परमात्मा तस्मात् यजनीयात् (पृषदाज्यं सम्भृतम्) अन्नमदनीयमोषधिवनस्पत्यादिकम् “अन्नं हि पृषदाज्यम्” [श० ९।८।४।८] “रस आज्यम्” [श० ३।७।१।१३] निष्पन्नं (तान् पशून् वायव्यान् चक्रे) तान् पशून् गवादीन् तथा पक्षिणश्च स परमात्मा जनयामास (च) तथा (ये-आरण्याः-ग्राम्याः) ये वन्या ग्राम्याः पशुपक्षिणः सन्ति तान् सर्वान् जनयाञ्चकार ॥८॥

## 09 तस्माद्यज्ञात्सर्वहुतः सम्भृतम् - अनुष्टुप्⑥

त॑स्माद् यज्ञा॑त् सर्वहु॑तः ।
*(पशुनिर्माणाय तज्-जातकर्मणे वापि)* **सं॑भृतं** *(हविश्शेषं घनीभवद् दधिमिश्रं वा)* पृषद्*(=बिन्दु)*-आज्य॑म् ।
पशूँ॑स् ताँ॑श् *(सूच्यमानान्)* **चक्रे** - वायव्या॑न् ।
आरण्या॑न् ग्राम्याँ॑श् च ये॑ । ९

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ः सम्भृ॑तं पृषदा॒ज्यम् ।
प॒शून्ताँश्च॑क्रे वाय॒व्या॑नार॒ण्यान्ग्रा॒म्याश्च॒ ये ॥

▼ ***अधिमन्त्रम् - sa***

- देवता - पुरुषः
- ऋषिः - नारायणः
- छन्दः - अनुष्टुप्

▼ ***Thomson & Solcum***

त॑स्माद् यज्ञा॑त् सर्वहु॑तः
स॑म्भृतम् पृषदाजिय॑म्
पशू॑न् तां॑श् चक्रे वायव्या∫न्
आरण्या॑न् ग्रामिया॑श् च ये॑

▼ ***Vedaweb annotation***

---

**Strata**
Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

**Pāda-label**
popular;; epic anuṣṭubh (380);; repeated line
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)
popular;; epic anuṣṭubh (380)

**Morph**

sarvahútaḥ ← sarvahúta- (nominal stem)
{case:NOM, gender:M, number:SG}

tásmāt ← sá- ~ tá- (pronoun)
{case:ABL, gender:M, number:SG}

yajñā́t ← yajñá- (nominal stem)
{case:ABL, gender:M, number:SG}

jajñire ← √janⁱ- (root)
{number:PL, person:3, mood:IND, tense:PRF, voice:MED}

ṛ́caḥ ← ṛ́c- (nominal stem)
{case:NOM, gender:F, number:PL}

sā́māni ← sā́man- (nominal stem)
{case:NOM, gender:N, number:PL}

chándāṁsi ← chándas- (nominal stem)
{case:NOM, gender:N, number:PL}

jajñire ← √janⁱ- (root)
{number:PL, person:3, mood:IND, tense:PRF, voice:MED}

tásmāt ← sá- ~ tá- (pronoun)
{case:ABL, gender:M, number:SG}

ajāyata ← √janⁱ- (root)
{number:SG, person:3, mood:IND, tense:IPRF, voice:MED}

tásmāt ← sá- ~ tá- (pronoun)
{case:ABL, gender:M, number:SG}

yájuḥ ← yájus- (nominal stem)
{case:NOM, gender:N, number:SG}

▼ पद-पाठः

अ॑-तन्द्रासो ऽवृका॑ *(=अहिंसका)* अ॑-श्रमिष्ठाः ।
ते॑ *(रश्मयः)* पाय॑वस् **सध्रि॑यञ्चो** *(=सङ्गताः)* **निष॑द्य** *(=उपविश्य)*
+अ॑ग्ने त॑व नः **पान्त्व्** अमूर *(=अमर्त्य)* ॥

*(उतथ्यभार्या ममता। तस्याम् बृहस्पतिर् रेतः स्थापयितुम् अयतत। तत्र वर्तमानं रेतोऽन्तरम् आक्षिपत्। बृहस्पतिर् अशपत् तम् दीर्घतमा भवेति। सोऽ अग्नेर् अलभत चक्षुः।)*

ये॑ **पाय॑वो** मामतेय॑न् ते अग्ने
**प॑श्यन्तो** अन्ध॑न् दुरिता॑द् **अ॑रक्षन्** ।
**रर॑क्ष** ता॑न्त् सुकृ॑तो विश्व॑-वेदा
**दि॑प्सन्त** *(=दम्भितुकामाः)* इ॑द् रिप॑वो ना॑ ह **देभुः॑** *(=परिभवन्ति)* ॥

# प्रतिज्ञानुवर्तनम्④

त्व॑या वयँ॑ सधन्य॑स् **त्वो॑तास्** *(त्वया +अविताः=रक्षिताः)*
त॑व **प्र॑णीत्या ऽश्याम** वा॑जान् *(=अन्नानि)* ।
उभा॑ *(पाप-)* **शँ॑सा** *(शत्रू)* **सूदय** सत्य-ताते *(=तते)*
ऽनुष्ठुया॑ *(=अनुक्रमेण)* **कृणुह्य्** *(हे!)* अ-ह्रयाण *(=अह्रि!)* ॥

अया॑ *(=अनया)* ते अग्ने समि॑धा **विधेम**
प्र॑ति स्तो॑मँ शस्य॑मानं **गृभाय** *(=गृहाण)* ।
**द॑हा** ऽश॑सो *(=अशंसो)* रक्ष॑सः **पाह्य्** +अ॑स्मा॑न्
द्रुहो॑ निदो॑ *(=निन्दकात्)* मित्र-महो *(=मित्रपूज्य!)* अवद्या॑त् *(=परिवादात्)* ॥

रक्षोह॑णं वाजि॑नम् *(=अन्नवन्तम्)* आ॑ऽऽजिघर्मि *(=दीपयामि)*
मित्रं॑ प्र॑थिष्ठम् *(=विस्तीर्णतमम्)* उ॑पयामि श॑र्म ।
शि॑शानो *(=तीक्ष्णः)* अग्निः॑ क्र॑तुभिस् स॑मिद्धस्
स॑ नो दि॑वा स॑ रिषः॑ *(=हिंसकात्)* पातु न॑क्तम् ॥

# रक्षोहाग्निध्यानम्④

वि॑ ज्यो॑तिषा बृहता॑ **भात्य्** अग्नि॑र्
आवि॑र् वि॑श्वानि **कृणुते** महित्वा॑ *(=महत्तया)* ।
प्रा॑देवीर् माया॑स् **सहते** दुरे॑वाः *(=दुरत्ययः)*
**शि॑शीते** *(=तीक्ष्णीकरोति)* शृ॑ङ्गे र॑क्षसे विनि॑क्षे *(=विनाशाय)* ॥

उत॑ स्वाना॑सो *(=सस्वनाः)* दिवि॑ **षन्त्व्** अग्ने॑स्
तिग्मा॑युधा र॑क्षसे **ह॑न्तवा॑** उ ।
*(अस्माकं)* म॑दे *(=मदाय)* चिद् अस्य **प्र॑रुजन्ति** *(=भञ्जन्ति (अदेवीः))* भा॑मा*(=भासः रश्मयो)*,
**न॑ वरन्ते** *(अस्मान्)* परिबा॑धो अ॑देवीः ॥

१०. उपरव-निर्माण-मन्त्राः

हविर्धान(अभ्यन्तर)गतोपरवनिर्माणम्

सोमऋषिः

---

▼ ***भास्करोक्त-विनियोगः***

उपरवान् खनति पूर्वयोर् दक्षिणम् एवाग्रे - रक्षोहण इति ॥

▼ ***मूल-प्रस्तुतिः***

र॒क्षो॒-हणो॑ *(अभिचार-हेतुक--निखात--)*वल-ग॒--हनो॑ वैष्ण॒वान् ख॑नामि ।

▼ ***Keith***

I dig those which slay the Raksas, which slay the spell, which are of Visnu.

▼ ***पद-पाठः***

र॒क्षो॒ह॒ण॒ इति॑ रक्षः-हनः॑ । व॒ल॒ग॒ह॒न॒ इति॑ वलग-हनः॑ । वै॒ष्ण॒वान् । ख॒ना॒मि॒ । 2B ।

▼ ***भट्टभास्कर-टीका***

उपरवान् खनति पूर्वयोर् दक्षिणम् एवाग्रे - रक्षोहण इति ॥ हन्तेः 'बहुलं छन्दसि' इति क्विप्, 'एकाजुत्तरपदे णः' इति णत्वम् । 'सर्वे विधयस्छन्दसि विकल्प्यन्ते' इत्युपधालोपो न क्रियते । कृदुत्तरपदप्रकृतिस्वरत्वम् ।

**वलो** नामासुरमुख्यः, तद्-गामिनस् तद्धृत्या **वलगाः** ।
यद्वा - वृणोतीति **वलो** मेघः । कपिलकादित्वाल् लत्वम् । स इव छादयन्तो ये गच्छन्ति ते

**वलगाः** असुरविशेषाः ।
यद्वा - जीर्ण-कट-पटादि-खण्ड-सम्भृताः अस्थि-नख-रोम पाद-पांसु-प्रभृतयः प्राणिनां मारणार्थं ये भूमौ निखन्यन्ते ते **वलगाः** । ते हि प्राणिनां बाधकतया वल-गामिनो वलवल् लक्ष्या भवन्ति ।
'अन्यत्रापि दृश्यते' इति गमेर्डः ।
तेषां हन्तारो **वलगहनः** । इर्दृशान्विष्णुदेवत्यानुपरवान् खनामि । 'वैष्णवा हि देवतयोपरवाः' इति ब्राह्मणम् ।

देवानां नासिकादिप्रास्थानीया उपरवाः । 'शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवाः' इति ब्राह्मणम् । ते च खन्यमाना रक्षांसि वलगांश्च निघ्नन्तीति । 'असुरा वै निर्यन्तः इति ब्राह्मणम् ॥

---

▼ *भास्करोक्त-विनियोगः*

2पांसूनुद्वपति - इदमहमिति ॥

▼ *मूल-प्रस्तुतिः*

इ॒दम् अ॒हन् तवँ् **वं॒लगम् उद्वं॑पामि॒**
यन् नं॑स् समा॒नो
यम् असं॑मानो निचु॒खानं॑।

▼ *Keith*

Here do I cast out the spell which an equal or an unequal hath buried against us.

▼ *पद-पाठः*

इ॒दम् । अ॒हम् । तम् । व॒ल॒गमिति॑ वल-गम् । उदिति॑ । व॒पा॒मि॒ । यम् । न॒ः । स॒मा॒नः । यम् । अस॑मानः । नि॒चु॒खानेति॑ नि-चु॒खान॑ ।

▼ *भट्टभास्कर-टीका*

2पांसूनुद्वपति - इदमहमिति ॥ इदमिति क्रियाविशेषणम् । तं वलगमहमिदमुद्वपामि उद्धृत्य बहिः प्रक्षिपामि । कमित्याह – नः अस्माकं समानस्तुल्यः यं वलगं निचखान । 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम् । उदात्तवता तिङा' इति समासः । यश्चास्माकमसमानः अतुल्यः ऊनः उत्कृष्टो वा वलग निचखान, तमुद्वपामीति । 'द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानः' इत्यादि ब्राह्मणम् ।

---

▼ *मूल-प्रस्तुतिः*

इ॒दमे॑न॒म् **अध॑रङ् करोमि॒**
यो न॑स् सम॒ानो
योऽस॑मानो ऽराती॒यति॑
...

▼ *Keith*

Here do I overthrow him who equal or unequal is ill-disposed to us.

▼ *पद-पाठः*

इ॒दम् । ए॒न॒म् । अध॑रम् । कु॒रो॒मि॒ ।
यः । न॒ः । स॒मा॒नः ।
यः । अस॑मानः । अ॒रा॒ती॒यति॑ ।

▼ *भट्टभास्कर-टीका*

किञ्च – एनमहमधरं अधोगतिं करोमि । इदमिति पूर्ववत्क्रियाविशेषणम् । कमित्याह - योस्माकं समानो यश्चासमानो जनः अरातीयति अरातिरिवाचरति । यद्वा - अस्मानरातीयति यस्समानोसमानो वा । 'उपमानादाचारे' इति क्यच् ।

▼ *प्रदीपसिंहः*

अत्र विश्वासप्रस्तुतौ मूले पि वाक्यविभागे दोषः भाति। निचखानेदम् इदं पूर्ववाक्यम् समाप्तमासीत् । इदम् इति पदम् अग्रिमवाक्यान्वयि । किञ्च – एनमहमधरं अधोगतिं करोमि । इदमिति पूर्ववत्क्रियाविशेषणम् । इति टीका । अतः व्यत्यासः कृतः

▼ *मूल-प्रस्तुतिः*

गाय॒त्रेण॒ छन्द॑सा ।

▼ *Keith*

The spell is overcome by the Gayatri metre.

▼ *पद-पाठः*

गा॒य॒त्रेण॑ । छन्द॑सा ।

▼ *भट्टभास्कर-टीका*

गायत्रेण छन्दसा उद्वपामि । गायत्र्येव गायत्रम् । 'छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसङ्ख्यानम्' इत्यण्प्रत्ययः ।

एवं दक्षिणपूर्वमारभ्य सर्वेभ्य उद्वपति । त्रैष्टुभेन जागतेनानुष्टुभेनेति विशेषोन्यत्र ॥

---

▼ *मूल-प्रस्तुतिः*

अव॑-बाढो*(=बद्धो)* व॒ल॒गः ।

▼ *पद-पाठः*

अव॑बाढ॒ इत्यव॑-बा॒ढ॒ः । व॒ल॒ग इति॑ वल-गः ।

▼ *भट्टभास्कर-टीका*

3यजमानस्याधस्तात्पदपांसूनुद्वपति - अवबाढ इति ॥ यजमानस्य पादयोर् अधस्तात् **बाढो** बद्धो **वलगो** ऽस्तु । बाहृ प्रयत्ने, 'क्षुब्धस्वान्त' इत्यत्र निपातितः, 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

---

▼ *भास्करोक्त-विनियोगः*

4उपरवान् क्रमेणावमृशतो ऽध्वर्युयजमानौ । ते चाधस्तात् सतृण्णाः । 'तस्मात्सतृण्णा अन्तरतः प्राणाः इति ब्राह्मणम् । बहिरसतृण्णाः । 'न सम्भिनत्ति तस्मादसभिन्नाः प्राणाः' इति ब्राह्मणम् । पूर्वयोर्दक्षिणमेवाध्वर्युरवमृशत्युत्तरं यजमानः ।

▼ *मूल-प्रस्तुतिः*

*(अध्वर्यो!)* किम् अत्र॑?

▼ ***Keith***

What is here?

▼ *पद-पाठः*

किम् । अत्र॑ ।

▼ *भट्टभास्कर-टीका*

4उपरवान् क्रमेणावमृशतो ऽध्वर्युयजमानौ । ते चाधस्तात् सतृण्णाः । 'तस्मात्सतृण्णा अन्तरतः प्राणाः इति ब्राह्मणम् । बहिरसतृण्णाः । 'न सम्भिनत्ति तस्मादसभिन्नाः प्राणाः' इति ब्राह्मणम् । पूर्वयोर्दक्षिणमेवाध्वर्युरवमृशत्युत्तरं यजमानः ।
अथ यजमानः पृच्छति - अध्वर्यो किमत्रेति ॥

▼ ***मूल-प्रस्तुतिः***

*(भो यजमान!)* भ॒द्रम्।

▼ ***Keith***

Good.

▼ ***पद-पाठः***

भ॒द्रम् ।

▼ ***भट्टभास्कर-टीका***

5इतर आह - भद्रमिति ॥ भद्रं भजनीयं कल्याणम् । भदि कल्याणे, रन्प्रत्ययः, उपधालोपश्च ॥

▼ ***मूल-प्रस्तुतिः***

*(अध्वर्यो!)* तन् नौं स॒ह ।

▼ ***Keith***

Let it be ours.

▼ ***पद-पाठः***

तत् । नौ॒ । स॒ह ।

▼ ***भट्टभास्कर-टीका***

6यजमान आह - तन्नौ सहेति ॥ तद्भद्रमावयोस्सहैवास्तु । अथाध्वर्युः पृच्छति - यजमान किमत्रेति । भद्रमित्यादि यथायथम् । एवं सर्वत्र ॥

▼ ***भास्करोक्त-विनियोगः***

7-10उपरवान् अभिमृशति सर्वान् एवानुर्पूवं - विराडिति ॥

▼ *मूल-प्रस्तुतिः*

वि॒राड् अ॑सि सपत्न॒हा ।

▼ *Keith*

Thou art Viraj, slaying our rivals;

▼ *पद-पाठः*

वि॒राडिति॑ वि-राट् । अ॒सि॒ । स॒प॒त्न॒हेति॑ सपत्न-हा ।

▼ *भट्टभास्कर-टीका*

7-10उपरवान् अभिमृशति सर्वान् एवानुर्पूवं - विराडिति ॥ विविधं राजतीति विराट् । 'सत्सूद्विष' इति क्विप्, कृदुत्तरपदप्रकृतिस्वरत्वम् । सपत्राश्शत्रवस्तेषां हन्ता । 'बहुलं छन्दसि' इति क्विप्। यस्मात्त्वं विविधं दीप्यसे तस्मात्सपत्नहा ।

---

▼ *मूल-प्रस्तुतिः*

स॒म्राड् अ॑सि भ्रातृव्य॒हा ।

▼ *Keith*

thou art Samraj, slaying our foes;

▼ *पद-पाठः*

स॒म्राडिति॑ सम्-राट् । अ॒सि॒ । भ्रा॒तृ॒व्य॒हेति॑ भ्रातृव्य-हा ।

▼ *भट्टभास्कर-टीका*

सङ्गतं दीप्यत इति सम्राट् । 'मो राजि समः क्वौ' इति मस्य मः । यस्मादेवं तस्मात्त्वं भ्रातृव्यहा । भ्रातृव्यास्सपत्नाः । 'व्यन् सपत्ने' इति व्यन्प्रत्ययः । तेषां हन्ता बाह्याभ्यन्तरभेदेन नित्यानित्यभेदेन वा शत्रूणां पृथगभिधानम् ।

---

▼ *मूल-प्रस्तुतिः*

स्व॒राड् अ॑स्य् अभिमाति॒हा।

▼ *Keith*

thou art Svaraj, slaying the enemy;

▼ *पद-पाठः*

स्व॒राडिति॑ स्व-राट् । अ॒सि॒ । अ॒भि॒मा॒ति॒हेत्य॑भिमाति-हा ।

▼ *भट्टभास्कर-टीका*

स्वायत्तं दीप्यस इति स्वराट् । यस्मादेवं तस्मात्त्वं अभिमातिहा । अभिमातिः पाप्मा । मन्यतेः क्तिनि नित्यमप्यनुनासिकलोपं बाधित्वा व्यत्ययेन 'अनुनासिकस्य क्विझलोः' इति दीर्घत्वम् । ततः 'अनुदात्तोपदेश' इत्यादिनानुनासिकलोपः । तया हन्ता । महाबलेन हि पाप्मा निहन्तुं शक्यते ।

---

▼ *मूल-प्रस्तुतिः*

वि॒श्वा॒राड् अ॑सि॒ विश्वा॑सान् ना॒ष्ट्राणाँ॑ ह॒न्ता ।

▼ *Keith*

thou art Viśvaraj, slayer of all destructive things [1].

▼ *पद-पाठः*

वि॒श्वा॒राडिति॑ विश्व-राट् । अ॒सि॒ । विश्वा॑साम् । ना॒ष्ट्राणा॑म् । ह॒न्ता । [3]

▼ *भट्टभास्कर-टीका*

विश्वेषु लोकेषु राजतीति **विश्वाराट्** । 'विश्वस्य वसुराटोः' इति दीर्घः ।
यस्मादेवं तस्माद् **विश्वासां नाष्ट्राणां** नाशयितॄणां दैवादि-प्रवृत्तीनां **हन्ता** नाशयिता त्वमसि । नशेर्ण्यन्तात् 'दादिभ्यश्छन्दसि' इति त्रन्प्रत्ययः 'तितुत्रतथ' इतीट्प्रतिषेधः, णिलोपे उदात्तनिवृत्तिस्वरेण त्रन उदात्तत्वम्, 'व्रश्च' इत्यादिना षत्वम् ॥

---

▼ *भास्करोक्त-विनियोगः*

11उपरवान्प्रोक्षति - रक्षोहण इति ॥

▼ *मूल-प्रस्तुतिः*

र॒क्षो॒-हणो॑ वलग॒-हन॒ꣳ प्रोक्षा॑मि वैष्ण॒वान्।

▼ *Keith*

I sprinkle those which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

क्षो॒हण॒ इति॑ रक्षः-हनः॑ । व॒ल॒ग॒हन॒ इति॑ वलग-हनः॑ । प्रेति॑ । उ॒क्षा॒मि॒ । वै॒ष्ण॒वान् ।

▼ *भट्टभास्कर-टीका*

11उपरवान्प्रोक्षति - रक्षोहण इति ॥ युष्मान् प्रोक्षामीति सम्बन्धः ॥

---

▼ *मूल-प्रस्तुतिः*

र॒क्षो॒हणो॑ वलग॒-हनोऽव॑ नयामि वैष्ण॒वान्।

▼ *Keith*

I pour down those which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

र॒क्षो॒हण॒ इति॑ रक्षः-हनः॑ । व॒ल॒ग॒हन॒ इति॑ वलग-हनः॑ । अवेति॑ । न॒या॒मि॒ । वै॒ष्ण॒वान् ।

▼ *भट्टभास्कर-टीका*

12उपरवेष्व् अपोवनयति - रक्षोहण इति ॥ एवंविधान् युष्मान्, अधस्तादपोवनयामि प्रापयामि आद्भिस्संयोजयामि । अवनयतिस्वभावादद्भिरेव गम्यते । नयतेश्च द्विकर्मकत्वाद्युष्मानपोवनयामीति भवति, युष्मास्वपोवनयामीति यावत्; यथा - 'अजां नयति ग्रामम्' इति । 'तस्मादार्द्रा अन्तरतः प्राणाः' `इति ब्राह्मणम् ॥

---

▼ *भास्करोक्त-विनियोगः*

13तेषु यवान्प्रस्कन्दयति - यवोसीति ॥

▼ *मूल-प्रस्तुतिः*

यवो॑ऽसि।
य॒वय॑(=अपनय) +अ॒स्मद्-द्वेषः॑ ।
य॒वय॒ +अरा॑तीः ।

▼ *Keith*

Thou art barley (yava);
bar (yavaya) from us foes,
bar evil spirits.

▼ *पद-पाठः*

यवः॑ । अ॒सि॒ ।
य॒वय॑ । अ॒स्मत् । द्वेषः॑ । [1] य॒वय॑ । अरा॑तीः ।

▼ *भट्टभास्कर-टीका*

यावयति अपनयति क्षुधमिति **यवः** ।
यौतेः पृथग्भावकर्मणोन्तर्भावितण्यर्थात् 'पुंसि संज्ञायां घः', वृषादित्वादाद्युदात्तत्वम् ।
बहुलग्रहणाद्वा कर्तरि 'ऋदोरप्' इत्यप् । जात्याख्यायामेकवचनम् ।

ईदृशस् त्वम् **अस्मत्** अस्मत्तः **द्वेषः** द्वेष्यं रक्षःप्रभृति **यवय** अपनय विनाशय ।
यौतेर्णिचि 'संज्ञापूर्वको विधिरनित्यः' इति वृद्धिर्न क्रियते, तिङः परत्वान्न निहन्यते ।
यद्वा - द्विषेः 'अन्येभ्योपि दृश्यते' इति विच् । **द्वेषः** द्वेष्टॄन् विनाशय ।

किञ्च - अरातीः अदातॄन् शत्रूञ्श्च यवय । रातेः कर्तरि क्तिनि क्तिचि वा
नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् । अस्मदीयांश्च शत्रून्नाशयेत्यर्थः ।
अपदात्परत्वादिदमाख्यातं न निहन्यते । 'ऊर्ग्वै यवः' इत्यादि बाह्मणम् ॥

▼ *भट्टभास्कर-टीका*

13तेषु यवान्प्रस्कन्दयति - यवोसीति ॥ व्याख्यातम् । 'प्राणेष्वेवोर्जं दधाति' `इति ब्राह्मणम् ॥

▼ *भट्टभास्कर-टीका*

13तेषु यवान्प्रस्कन्दयति - यवोसीति ॥ व्याख्यातम् । 'प्राणेष्वेवोर्जं दधाति' `इति ब्राह्मणम् ॥

▼ *भास्करोक्त-विनियोगः*

14उपरवान् बर्हिषा ऽवस्तृणाति - रक्षोहण इति ॥

▼ *मूल-प्रस्तुतिः*

र॒क्षो॒हणो॑ वलग॒हनोऽव॑ स्तृणामि वैष्ण॒वान् ।

▼ *Keith*

I bestrew those which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

र॒क्षो॒हण॒ इति॑ रक्षः-हनः॑ । व॒ल॒ग॒ह॒न॒ इति॑ वलग-हनः॑ । अवेति॑ । स्तृ॒णा॒मि॒ । वै॒ष्ण॒वान् ।

▼ *भट्टभास्कर-टीका*

14उपरवान् बर्हिषा ऽवस्तृणाति - रक्षोहण इति ॥ युष्मानवस्तृणामीत्यधस्ताच्छादयामीत्यर्थः । शिष्टं स्पष्टम् । 'तस्माल्लोमशा अन्तरतः प्राणाः' `इति ब्राह्मणम् ॥

▼ *भास्करोक्त-विनियोगः*

15हिरण्यम् अन्तर्धाय स्रुवाहुत्या उपरवान् अभिजुहोति - रक्षोहण इति ॥

▼ *मूल-प्रस्तुतिः*

र॒क्षो॒-हणो॑ वलग॒हनो॒ऽभि जु॑होमि वैष्ण॒वान् ।

▼ *Keith*

I pour the libation over those which slay the Raksas, which slay the spell, and which are of Visnu. </details>

▼ *पद-पाठः*

र॒क्षो॒हण॒ इति॑ रक्षः-हनः॑ । व॒ल॒ग॒ह॒न॒ इति॑ वलग-हनः॑ । अ॒भीति॑ । जु॒हो॒मि॒ । वै॒ष्ण॒वान् ।

▼ *भट्टभास्कर-टीका*

15हिरण्यम् अन्तर्धाय स्रुवाहुत्या उपरवान् अभिजुहोति - रक्षोहण इति ॥
युष्मानभिजुहोमीति युष्मानाज्येन व्याघारयामीति । 'प्राणेष्वेव तेजो दधाति' `इति ब्राह्मणम् ॥

▼ *भास्करोक्त-विनियोगः*

16अधिषवणफलके उपदधाति - रक्षोहणाविति ॥

▼ *मूल-प्रस्तुतिः*

र॒क्षो॒हणौं वलग॒हना॒व् उपं दधामि वैष्ण॒वी ।

▼ *Keith*

I lay down the two Which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

र॒क्षो॒हणा॒विति॑ रक्षः-हनौं । व॒ल॒ग॒हना॒विति॑ वलग-हनौं । उपेति॑ । द॒धा॒मि॒ । वै॒ष्ण॒वी इति॑ ।

▼ *भट्टभास्कर-टीका*

16अधिषवणफलके उपदधाति - रक्षोहणाविति ॥ एवंगुणे युवामुपदधामीति । वैष्णवी वैष्णव्यौ । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । 'हनू वा एते यज्ञस्य यदधिषवणे' इत्यादि ब्राह्मणम् ॥

---

▼ *भास्करोक्त-विनियोगः*

17अधिषवणफलके प्रदक्षिणं पुरीषेण पर्यूहति - रक्षोहणाविति ॥

▼ *मूल-प्रस्तुतिः*

र॒क्षो॒हणौं वलग॒हनौ॒ पर्यूंहामि वैष्ण॒वी ।

▼ *Keith*

I surround the two which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

र॒क्षो॒हणा॒विति॑ रक्षः-हनौं । व॒ल॒ग॒हना॒विति॑ वलग-हनौं । परीति॑ । ऊ॒हा॒मि॒ । वै॒ष्ण॒वी इति॑ ।

▼ *भट्टभास्कर-टीका*

17अधिषवणफलके प्रदक्षिणं पुरीषेण पर्यूहति - रक्षोहणाविति ॥ युवां पर्यूहामीति पुरीषेण परितः पूरयित्वा द्रढयामीति । 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति परस्मैपदम् ॥

---

▼ *भास्करोक्त-विनियोगः*

18एते बर्हिषा परिस्तृणाति - रक्षोहणाविति ॥

▼ *मूल-प्रस्तुतिः*

रक्षोहणौं वलगहनौ परिं स्तृणामि वैष्णवी ।

▼ *Keith*

I bestrew the two which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

क्षोहणाविति रक्षः-हनौं । वलगहनाविति वलग-हनौं । परीतिं । स्तृणामि । वैष्णवी इतिं ।

▼ *भट्टभास्कर-टीका*

18एते बर्हिषा परिस्तृणाति - रक्षोहणाविति ॥ युवां परिस्तृणामीति ॥

---

▼ *भास्करोक्त-विनियोगः*

19एते अभिमृशति

▼ *मूल-प्रस्तुतिः*

रक्षोहणौं वलगहनौं वैष्णवी ।

▼ *Keith*

The two which slay the Raksas, which slay the spell, and which are of Visnu.

▼ *पद-पाठः*

रक्षोहणाविति रक्षः-हनौं । वलगहनाविति वलग-हनौं । वैष्णवी इतिं ।

▼ *भट्टभास्कर-टीका*

19एते अभिमृशति - रक्षोहणौ वलगहनौ वैष्णवी इति ॥

▼ *भास्करोक्त-विनियोगः*

20फलके ग्राव्णोद्वादयति - बृहन्निति ॥

▼ *मूल-प्रस्तुतिः*

बृ॒हन्न् अ॑सि बृ॒हद्-ग्रा॑वा ।
बृ॒ह॒तीम् इन्द्रा॑य॒ वाचव॑ँ वद ॥ [4]

▼ *Keith*

Thou art great, with a great pressing stone;
call forth to Indra with a great voice.

▼ *पद-पाठः*

बृ॒हन् । अ॒सि॒ । बृ॒हद्ग्रा॒वेति॑ बृ॒हत्-ग्रा॒वा॒ ।
बृ॒ह॒तीम् । इन्द्रा॑य । वाच॑म् । व॒द॒ ॥ [4]

▼ *भट्टभास्कर-टीका*

20फलके ग्राव्णोद्वादयति - बृहन्निति ॥ हे ग्रावन् बृहन्महानसि वीर्येण । शतृवद्भावात् 'उगिदचाम्' इति नुम् । न परं वीर्येण, अपि तु शरीरेणापि बृहन्नसीत्याह - बृहद्ग्रावा महापाषाणः । अवयवभूता ग्रावाणोपि गृह्यन्ते । यद्वा - गृणन्तीति ग्रावाणः शब्दकारिणोवयवाः, बृहन्तो ग्रावाणो यस्य । गॄ निगरणे, क्वनिप्, आडागमः ।

यस्मादेवं तस्मादिन्द्रार्थं बृहतीं वाचं वद, यथेन्द्र इमां वाचं श्रुत्वा आगच्छति । शतृवद्भावात् 'उगितश्च' इति ङीप् । 'बृहन्महतोरुपसङ्ख्यानम्' इति नद्या उदात्तत्वम् । 'शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ताः' इत्यादि ब्राह्मणम् ।
एतदुक्तं भवति - शिरस्स्थानीये हविर्धाने प्राणस्थानीयेषूपरवेषु हनूस्थानीयाभ्यामधिषवणफलकाभ्यां परिगृहीते जिह्वास्थानीये चर्मणि दन्तस्थानीयैः ग्रावभिः खादनस्थानीयमभिषवं कृत्वा मुखस्थानीये आहवनीये हुत्वा प्रत्यग्गत्वा उदरस्थानीये सदसि भक्षयन्तीति । 'यो वै विराजो यज्ञमुखे' इत्यादि च ॥

इति तृतीये द्वितीयोनुवाकः ॥

[[147]]

# महापितृयज्ञे हौत्रमन्त्राः②

११. महापितृयज्ञे हौत्रमन्त्राः (तै. सं. २-६-१२)

त्रिष्टुप् , १, १२ अनुष्टुप्, ५ जगती विश्वेदेवा ऋषयः

▼ *भास्करोक्त-विनियोगः*

महापितृयज्ञे सामिधेनी एकैव त्रिरुच्यते ।

उश॑न्तस् त्वा नि॑ धीमहि उश॑न्तः स॑म् इधीमहि उश॑न्न् उशत॑ आ॑ वह पितॄ॑न् हवि॑षे अ॑त्तवे
उ॒शन्त॑स्त्वा॒ नि धी॑मह्यु॒शन्तः॒ समि॑धीमहि । उ॒शन्नु॑श॒त आ व॑ह पि॒तॄन्ह॒विषे॒ अत्त॑वे ॥

▼ *अधिमन्त्रम् - sa*

- देवता - अग्निः
- ऋषिः - दमनो यामायनः
- छन्दः - अनुष्टुप्

▼ *Thomson & Solcum*

उश॑न्तस् त्वा नि॑ धीमहि
उश॑न्तः स॑म् इधीमहि
उश॑न्न् उशत॑ आ॑ वह
पितॄ॑न् हवि॑षे अ॑त्तवे

▼ *Vedaweb annotation*

---

**Strata**
Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

**Pāda-label**
popular;; epic anuṣṭubh (424)
popular;; epic anuṣṭubh (424)

popular;; epic anuṣṭubh (424)
popular;; epic anuṣṭubh (424)

---

**Morph**

dhīmahi ← √dhā- 1 (root)
{number:PL, person:1, mood:OPT, tense:AOR, voice:MED}

ní ← ní (invariable)
{}

tvā ← tvám (pronoun)
{case:ACC, number:SG}

uśántaḥ ← √vaś- (root)
{case:NOM, gender:M, number:PL, tense:PRS, voice:ACT}

idhīmahi ← √idh- 1 (root)
{number:PL, person:1, mood:OPT, tense:AOR, voice:MED}

sám ← sám (invariable)
{}

uśántaḥ ← √vaś- (root)
{case:NOM, gender:M, number:PL, tense:PRS, voice:ACT}

ā́ ← ā́ (invariable)
{}

uśán ← √vaś- (root)
{tense:PRS, voice:ACT}

uśatáḥ ← √vaś- (root)
{case:ACC, gender:M, number:SG, tense:PRS, voice:ACT}

vaha ← √vah- (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

áttave ← √ad- (root)
{case:DAT, number:SG}

havíṣe ← havís- (nominal stem)
{case:DAT, gender:N, number:SG}

pitṝ́n ← pitár- (nominal stem)
{case:ACC, gender:M, number:PL}

▼ *पद-पाठः*

उ॒शन्तः॑ । त्वा॒ । नि । धी॒म॒हि॒ । उ॒शन्तः॑ । सम् । इ॒धी॒म॒हि॒ ।
उ॒शन् । उ॒श॒तः । आ । व॒ह॒ । पि॒तॄन् । ह॒विषे॑ । अत्त॑वे ॥

▼ *पद-पाठः-तैत्तिरीयः*

उ॒शन्तः॑ । त्वा॒ । ह॒वा॒म॒हे॒ । उ॒शन्तः॑ । समिति॑ । इ॒धी॒म॒हि॒ ॥ उ॒शन्न् । उ॒श॒तः । एति॑ । व॒ह॒ । पि॒तृन् । ह॒विषे॑ । अत्त॑वे ॥

▼ ***Hellwig Grammar***

- *uśantas* ← *uśantaḥ* ← *vaś*
- [verb noun], nominative, plural
- “desire; agree; call; care; like; love.”

---

- *tvā* ← *tvad*
- [noun], accusative, singular
- “you.”

---

- *ni*
- [adverb]
- “back; down.”

---

- *dhīmahy* ← *dhīmahi* ← *dhā*
- [verb], plural, Aorist inj. (proh.)

- “put; give; cause; get; hold; make; provide; lend; wear; install; have; enter (a state); supply; hold; take; show.”

---

- *uśantaḥ* ← *vaś*
- [verb noun], nominative, plural
- “desire; agree; call; care; like; love.”

---

- *sam*
- [adverb]
- “sam; together; together; saṃ.”

---

- *idhīmahi* ← *indh*
- [verb], plural, Present optative
- “kindle; ignite; set ablaze.”

---

- *uśann* ← *uśan* ← *vaś*
- [verb noun], nominative, singular
- “desire; agree; call; care; like; love.”

---

- *uśata* ← *uśataḥ* ← *vaś*
- [verb noun], accusative, plural
- “desire; agree; call; care; like; love.”

---

- *ā*
- [adverb]
- “towards; ākāra; until; ā; since; according to; ā [suffix].”

---

- *vaha* ← *vah*
- [verb], singular, Present imperative
- “transport; bring; marry; run; drive; vāhay; drive; run; pull; nirvāpay; blow; transport; discharge; assume; remove.”

- *pitṝn* ← *pitṛ*
- [noun], accusative, plural, masculine
- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

- *haviṣe* ← *havis*
- [noun], dative, singular, neuter
- “Havya; offering; ghee; havis [word].”

- *attave* ← *ad*
- [verb noun]
- “eat; devour.”

▼ ***रङ्गनाथः***

उशन्तः- कामयमानाः। त्वा- भवन्तम्। नि धीमहि- वयं स्थापितवन्तः। उशन्तः। समिधीमहि- सम्यक् ध्यायामः। उशन्- कामयन्। उशतः- कामयतः। पितॄन्- पूर्वपुरुषानाचार्यान्। हविषे अत्तवे- हव्यभक्षणाय। आ वह- प्रापय॥१२॥

▼ ***सायण-भाष्यम्***

हे अग्ने उशन्तः कामयमानाः वयं त्वा त्वां निधीमहि कर्मार्थं स्थापितवन्तः । उशन्तो वयं समिधीमहि सन्दीपयामः । त्वमपि उशन् कामयमानोहविरादिकं उशतः आगन्तुकामान् पितॄन् अस्मिन्यज्ञे आवह हविषे अस्माभिः प्रत्तं हविः अत्तवे अत्तुम् । अदेस्तुमर्थे तवेन् प्रत्ययः क्रियाग्रहणङ्कर्तव्यमितिकर्मणः सम्प्रदानसञ्ज्ञा ॥ १२ ॥

▼ ***भट्टभास्कर-टीका***

1उशन्त इत्यनुष्टुप् ॥ **उशन्तः** कामयमानाः पितॄन् त्वा **हवामहे** आह्वयामः । तानेव कामयमानास्त्वां समिधीमहि सम्यग्दीपयामः । त्वमपि तान् पितॄन् उशन्नावह । कीदृशान् **उशतः** हविरत्तुं कामयमानान् **हविषे अत्तवे** हविर्भोक्तुं । तुमर्थे तवै प्रत्ययः, कर्मणस्सप्रदानत्वाच्चत्तुर्थी ॥

▼ ***Wilson***

**English translation:**

"Longing we set you down; longing we kindle you; do you longing bring the longing **Pitṛs** to eat of the(sacrificial) viands."

---

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

**Kavya**: an offering to sages, i.e. pitṛs

▾ *Jamison Brereton*

Eagerly we would install you; eagerly we would kindle you.
Eagerly convey the eager forefathers here, to eat the oblation.

▾ *Griffith*

Right gladly would we set thee down, right gladly make thee burn and glow.
Gladly bring yearning Fathers nigh to cat the food of sacrifice.

▾ *Geldner*

Willig wollen wir dich einsetzen, willig dich anzünden. Willig fahre die willigen Väter hierher, um die Opferspende zu essen!

▾ *Grassmann*

Begehrend setzen wir dich hin, begehrend zünden wir dich an, Die Väter fahr zum Opfermahl, begehrend die begehrenden.

▾ *Elizarenkova*

Радостные, мы устроили тебя,
Радостные, воспламеним.
Радостный, радостных привози.
Отцов для вкушения жертвенной пищи!

▾ *अधिमन्त्रम् (VC)*

- अग्निः
- दमनो यामायनः
- निचृदनुष्टुप्
- गान्धारः

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (उशन्तः-त्वा निधीमहि-उशन्तः-समिधीमहि) हे अग्ने ! जिससे कि हम सदैव निज इष्ट की इच्छा करते हुए तुझको अन्त्येष्टिपर्यन्त सब संस्कारों में स्थापित करते हैं तथा इष्ट चाहते हुए ही प्रज्वलित करते हैं, (उशन्-उशतः पितॄन् हविषे-अत्तवे-आवह) इसलिये तू भी हमारा इष्ट चाहती हुई, अपने जैसे इष्ट चाहती हुई सूर्यरश्मियों को यज्ञ में प्रयुक्त कर, जिस से तेरे अन्दर डाली हवि सूक्ष्म बन कर फैल जावे ॥१२॥

▼ *ब्रह्ममुनि - भावार्थः*

भावार्थभाषाः - संस्कारों और मङ्गलकार्यों में अग्निहोम करना चाहिये ॥१२॥

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (उशन्तः-त्वा निधीमहि-उशन्तः-समिधीमहि) हे-अग्ने ! यतो वयमिच्छन्तस्त्वां स्थापयेम तथा-इच्छन्त एव च सन्दीपयेम, तस्मात्त्वमपि (उशन्-उशतः पितॄन् हविषे-अत्तवे-आवह) अस्मदिष्टमिच्छन्-अस्मदिष्टमिच्छतः पितॄन् प्रति हविषे-हविरत्तवेऽत्तुं ग्रहीतुम् 'तुमर्थे तवेन् प्रत्ययः'। आवह-प्रयोजय ॥१२॥

तुवं॑ सोम प्र॑ चिकितो मनीषा॑
तुवं॑ र॑जिष्ठम् अ॑नु नेषि प॑न्थाम्
त॑व प्र॑णीती पित॑रो न इन्दो
देवे॑षु र॑त्नम् अभजन्त धी॑राः त्वं सो॑मु प्र चिं॑कितो मनी॒षा त्वं रजिं॑ष्ठ॒मनुं॑ नेषि॒ पन्थां॑म् ।
तव॒ प्रणीं॑ती पि॒तरों॑ न इन्दो दे॒वेषु॒ रत्नं॑मभजन्त॒ धीराः॑ ॥

▼ *अधिमन्त्रम् - sa*

- देवता - सोमः
- ऋषिः - गोतमो राहूगणः
- छन्दः - त्रिष्टुप्

▼ *Thomson & Solcum*

तुवं॑ सोम प्र॑ चिकितो मनीषा॑
तुवं॑ र॑जिष्ठम् अ॑नु नेषि प॑न्थाम्

त॑व प्र॑णीती पित॑रो न इन्दो
देवे॑षु र॑त्नम् अभजन्त धी॑राः

▾ *Vedaweb annotation*

**Strata**
Normal on metrical evidence alone

**Pāda-label**
genre M
genre M
genre M
genre M

**Morph**
cikitaḥ ← √cit- (root)
{number:SG, person:2, mood:INJ, tense:AOR, voice:ACT}

manīṣā́ ← manīṣā́- (nominal stem)
{case:INS, gender:F, number:SG}

prá ← prá (invariable)
{}

soma ← sóma- (nominal stem)
{case:VOC, gender:M, number:SG}

tvám ← tvám (pronoun)
{case:NOM, number:SG}

ánu ← ánu (invariable)
{}

neṣi ← √nī- (root)
{number:SG, person:2, mood:IMP, voice:ACT}

pánthām ← pánthā- ~ path- (nominal stem)
{case:ACC, gender:M, number:SG}

rájiṣṭham ← rájiṣṭha- (nominal stem)
{case:ACC, gender:M, number:SG}

tvám ← tvám (pronoun)
{case:NOM, number:SG}

indo ← índu- (nominal stem)
{case:VOC, gender:M, number:SG}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

pitáraḥ ← pitár- (nominal stem)
{case:NOM, gender:M, number:PL}

práṇītī ← práṇīti- (nominal stem)
{case:INS, gender:F, number:SG}

táva ← tvám (pronoun)
{case:GEN, number:SG}

abhajanta ← √bhaj- (root)
{number:PL, person:3, mood:IND, tense:IPRF, voice:MED}

devéṣu ← devá- (nominal stem)
{case:LOC, gender:M, number:PL}

dhī́rāḥ ← dhī́ra- (nominal stem)
{case:NOM, gender:M, number:PL}

rátnam ← rátna- (nominal stem)
{case:NOM, gender:N, number:SG}

▼ *पद-पाठः-तैत्तिरीयः*

त्वम् । सो॒म॒ । प्र । चि॒कि॒तः॒ । म॒नी॒षा । त्वम् । रजि॑ष्ठम् । अनु॑ । ने॒षि॒ । पन्था॑म् ।
तव॑ । प्रऽनी॑ती । पि॒तरः॑ । नः॒ । इ॒न्दो॒ इति॑ । दे॒वेषु॑ । रत्न॑म् । अ॒भ॒ज॒न्त॒ । धीराः॑ ॥

▼ पद-पाठः

त्वम् । सो॒म॒ । प्रचि॑कित॒ इति॒ प्र-चि॒कि॒तः॒ । म॒नी॒षा । त्वम् । रजि॑ष्ठम् । अन्विति॑ । ने॒षि॒ । पन्था॑म् ॥ तव॑ । प्रणी॒तीति॒ प्र-नी॒ती॒ । पि॒तरः॑ । नः॒ । इ॒न्दो॒ इति॑ । दे॒वेषु॑ । रत्न॑म् । अ॒भ॒ज॒न्त॒ । धीराः॑ ॥

▼ ***Hellwig Grammar***

- *tvaṃ* ← *tvam* ← *tvad*
- [noun], nominative, singular
- “you.”

---

- *soma*
- [noun], vocative, singular, masculine
- “Soma; moon; soma [word]; Candra.”

---

- *pra*
- [adverb]
- “towards; ahead.”

---

- *cikito* ← *cikitaḥ* ← *cit*
- [verb], singular, Perfect conjunctive (subj.)
- “notice; observe; attend to; intend.”

---

- *manīṣā*
- [noun], instrumental, singular, feminine
- “hymn; inspiration; idea; thinking; wish; consideration; intelligence.”

---

- *tvaṃ* ← *tvam* ← *tvad*
- [noun], nominative, singular

- “you.”

---

- *rajiṣṭham* ← *rajiṣṭha*
- [noun], accusative, singular, masculine
- “honest.”

---

- *anu*
- [adverb]
- “subsequently; behind; along; towards; because.”

---

- *neṣi* ← *nī*
- [verb], singular, Present indikative
- “bring; lead; spend; decant; enter (a state); remove; take out; take away; enforce; marry; carry; fill into; bring; learn; go out; add.”

---

- *panthām* ← *pathin*
- [noun], accusative, singular, masculine
- “way; road; path [word]; journey; method.”

---

- *tava* ← *tvad*
- [noun], genitive, singular
- “you.”

---

- *praṇītī* ← *praṇīti*
- [noun], instrumental, singular, feminine
- “guidance; guidance.”

---

- *pitaro* ← *pitaraḥ* ← *pitṛ*
- [noun], nominative, plural, masculine

- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

---

- *na* ← *naḥ* ← *mad*
- [noun], genitive, plural
- “I; mine.”

---

- *indo* ← *indu*
- [noun], vocative, singular, masculine
- “moon; Soma; drop; anusvāra; one; Candra; silver; camphor; point; juice.”

---

- *deveṣu* ← *deva*
- [noun], locative, plural, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

---

- *ratnam* ← *ratna*
- [noun], accusative, singular, neuter
- “jewel; wealth; best; treasure; vajra; property; jewel; ruby; jewelry.”

---

- *abhajanta* ← *bhaj*
- [verb], plural, Imperfect
- “eat; enjoy; enter (a state); worship; love; flee; possess; fall to one's share; partake; share; get; approach; love; use.”

---

- *dhīrāḥ* ← *dhīra*
- [noun], nominative, plural, masculine
- “expert; wise; intelligent; versed; adept.”

---

▼ *रङ्गनाथः*

सोम- रसाधिदैवत। जीवने यो धार्मिको रसोस्ति स सोमः। परमार्थतयाध्यात्मिकरसः सोमः। त्वम्। मनीषा- मनीषया। प्र- प्रकर्षेण। चिकितः- अनुभूतः। कित ज्ञाने। त्वम्। रजिष्टम्- ऋजुम्। पन्थाम्- मार्गम्। अनु नेषि- अनुक्रमेण प्रापयसि। तव- ते। प्रणीती- प्रकर्षनीत्या। इन्दो- स्यन्दनशील। धीराः- धारणासंपन्नाः। नः- अस्माकम्। पितरः- पूर्वजा गुरवः। देवेषु- द्योतनशक्तिषु। रत्नम्- रमणीयसंपदम्। अभजन्त- असेवन्त॥१॥

▼ *सायण-भाष्यम्*

हे सोम **त्वं मनीषा** मनीषयास्मदीयया बुद्ध्या **प्र चिकितः** प्रकर्षेण ज्ञातोऽसि वयं त्वां स्तुतिभिरज्ञासिष्मेत्यर्थः । अतः **त्वं** रजिष्ठम् ऋजुतममकुटिलं **पन्थां** पन्थानं कर्मफलावाप्तिहेतुभूतं मार्गम् **अनु नेषि** अस्माननुक्रमेण प्रापयसि । किंच हे **इन्दो** उन्दनशील सर्वं जगदमृतेन क्लेदयित: सोम **तव प्रणीती** प्रणीत्या त्वत्कर्तृकेण प्रकृष्टनयनेन **धीराः** धीमन्तः कर्मवन्तः प्रज्ञावन्तो वा **नः** अस्माकं **पितरः देवेषु** इन्द्रादिषु **रत्नं** रमणीयं धनम् **अभजन्त** असेवन्त प्राप्नुवन् । अतोऽस्मानपि तादृशं धनं प्रापयेत्यर्थः ॥ प्र चिकितः । ‘ कित ज्ञाने ' । अस्मात् कर्मणि निष्ठा । छान्दसं द्विर्वचनम् । यद्वा । यङ्लुगन्तात् निष्ठा । संज्ञापूर्वकस्य विधेरनित्यत्वात् ‘ गुणो यङ्लुकोः' इति अभ्यासस्य गुणाभावः । यद्वा । ‘ छन्दस्युभयथा ' इति निष्ठायाः सार्वधातुकसंज्ञायां शप् । जुहोत्यादिवत् तस्य श्लुः । श्लौ ' इति द्विर्वचनम् । गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । मनीषा। सुपां सुलुक् ' इति तृतीयाया डादेशः । रजिष्ठम् । ऋजुशब्दात् इष्ठनि ' विभाषर्जोश्छन्दसि ' ( पा. सू. ६. ४. १६२ ) इति रत्वम् । ‘टेः' इति टिलोपः । नेषि । नयतेर्लटि ‘ बहुलं छन्दसि ' इति शपो लुक् । पन्थाम् । “ पथिमथ्यृभुक्षामात् ' ( पा. सू. ७. १. ८५ ) इति असावपि व्यत्ययेन आत्वम् । पथिमथोः सर्वनामस्थाने ' इत्याद्युदात्तत्वम् । प्रणीती । ‘ तादौ च इति गतेः प्रकृतिस्वरत्वम् । ‘ सुपां सुलुक् ' इति तृतीयायाः पूर्वसवर्णदीर्घत्वम् ॥

▼ *भट्टभास्कर-टीका*

2सोमबर्हिषदग्निष्वात्तकव्यवाहनानां क्रमेण द्वेद्वे पुरोनुवाक्ये एकैकस्य तूत्तरा याज्या सर्वास्त्रिष्टुभः । विशेषो वक्ष्यते -**त्वं सोमेति ॥** हे सोम! त्वं **प्रचिकितः** प्रकर्षेण ज्ञातः । निष्ठायां छान्दस्मं द्विर्वचनम्, यङ्लुकि वा अभ्यासविकाराभावः, 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । 'चिक' इति वा धात्वन्तरं द्रष्टव्यम् ।
**मनीषा** मनीषावद्भिः । यद्वा - विशिष्टया मनीषया व्यभिचाराभावात् । 'सुपां सुलुक्' इति विभक्तेराकारः ।
किंच – त्वं **रजिष्ठं** ऋजुतरं **पन्थां** पन्थानम् । ऋजुशब्दादिष्ठनि 'विभाषर्जोश्छन्दसि' इति रेफः । यद्वा - रजः उदकं अतिशयेन तद्वान् रजिष्ठः । रजश्शब्दादिष्ठन् 'विन्मतोर्लुक्', 'टेः' इति टिलोपः ।
ईदृशं पन्थानं **अनुनेषि** अनुक्रमेण प्रापयसि । नयतोर्लिटि शपो लुक् ।
किञ्च - हे **इन्दो!** सोम! तव **प्रणीती** प्रणीत्या परिचरणेन पुरस्कारेण वा । 'सुपां सुलुक्' इति

तृतीयायाः पूर्वसवर्णदीर्घत्वम् । अस्माकं पितरः पूर्वेषु देवेषु **रत्नं** रमणीयं **हविः** अन्नम् अभजन्त **धीराः** धीमन्तः । मत्वर्थीयो रप्रत्ययः ॥

▼ *Wilson*

## English translation:⑥

“You, **Soma**, are thoroughly apprehended by our understanding; you lead us along a straight path; by your guidance, **Indra**, our righteous fathers obtained wealth among the gods.”

▼ *Jamison Brereton*

You, Soma, have become conspicuous through our inspired thought. You—lead along the straightest path.
Through your guidance, o drop, our insightful forefathers had their
share in the treasure among the gods.

▼ *Jamison Brereton Notes*

The multiple possible meanings of the root(s) √cit and the unclear morphological identity of (prá) cikitaḥ make the interpretation of the first pāda somewhat difficult. I follow Thieme’s solution (Plusq.), adopted also by Kümmel (176-77), that it is underlyingly a medial injunctive to the perfect stem (that is, an unaugmented pluperfect), patterning with pf. cikité, etc. But the underspecification of this posited

*cikita caused it to be re-marked with an active ending (like root presents of the type aduha-t). It should not be a subjunctive, despite its thematic appearance, because of the zero-grade root syllable, and, pace Witzel Gotō, it should not be a trans./caus.

reduplicated aorist because of the light reduplicating syllable (expect *cīkitas) -- although I do have to admit that acikitat in VII.80.2 does seem to function like a redupl. aorist. Witzel Gotō supply pánthā́m, from b, as object in a, but this seems unnecessary. On a potential ring made by prá cikitaḥ here and prá cikitsā in the last pāda of the hymn (23d), see published introduction. The other question in pāda a is whose inspired thought is at issue. I assume that it is ours (that is, the poets'), in that the priests and poets create the ritual that makes soma manifest.

▼ *Griffith*

Thou, Soma, art preeminent for wisdom; along the straightest path thou art our leader.
Our wise forefathers by thy guidance, Indu, dealt out among the Gods their share of treasure.

▼ *Geldner*

Du, Soma, offenbare dich durch dichterische Gedanken, führe du uns den richtigsten Weg! Unter deiner Führung, du Saft, empfingen unsere weisen Väter von den Göttern das Kleinod.

▼ *Grassmann*

Du ragst, o Soma, hoch hervor an Weisheit, du führst, o Indu, auf dem gradsten Wege; Durch deine Leitung haben unsre Väter, die weisen, Schutz empfangen bei den Göttern.

▼ *Elizarenkova*

Ты, Сома, проявись через сознание!
Ты веди (нас) самым прямым путем!
Под твоим предводительством отцы наши, о сок,
Получили долю в богатстве у богов, (они,) мудрые.

▼ *अधिमन्त्रम् (VC)*

- सोमः
- गोतमो राहूगणः
- स्वराट्पङ्क्ति
- पञ्चमः

▼ ***दयानन्द-सरस्वती (हि) - विषयः***

अब तेईस मन्त्रवाले इक्कानवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में सोम शब्द के अर्थ का उपदेश किया है ।

▼ ***दयानन्द-सरस्वती (हि) - पदार्थः***

पदार्थान्वयभाषाः - हे (इन्दो) सोम के समान (सोम) समस्त ऐश्वर्य्ययुक्त (त्वम्) परमेश्वर वा अतिउत्तम विद्वान् ! जिस (मनीषा) मन को वश में रखनेवाली बुद्धि से (चिकितः) जानते हो वा (तव) आपकी (प्रणीती) उत्तम नीति से (धीराः) ध्यान और धैर्ययुक्त (पितरः) ज्ञानी लोग (देवेषु) विद्वान् वा दिव्य गुण कर्म और स्वभावों में (रत्नम्) अत्युत्तम धन को (प्र) (अभजन्त) सेवते हैं, उससे शान्तिगुणयुक्त आप (नः) हम लोगों को (रजिष्ठम्) अत्यन्त सीधे (पन्थाम्) मार्ग को (अनु) अनुकूलता से (नेषि) पहुँचाते हो, इससे (त्वम्) आप हमारे सत्कार के योग्य हो ॥ १ ॥

▼ ***दयानन्द-सरस्वती (हि) - भावार्थः***

भावार्थभाषाः - इस मन्त्र में श्लेषालङ्कार है। जैसे परमेश्वर अत्यन्त उत्तम विद्वान् अविद्या विनाश करके विद्या और धर्ममार्ग को पहुँचाता है, वैसे ही वैद्यकशास्त्र की रीति से सेवा किया हुआ सोम आदि ओषधियों का समूह सब रोगों का विनाश करके सुखों को पहुँचाता है ॥ १ ॥

▼ ***दयानन्द-सरस्वती (हि) - अन्वयः***

अन्वय: हे इन्दो सोम त्वं यया मनीषा चिकितस्तव प्रणीती धीराः पितरो देवेषु रत्नं प्राभजन्त तया नोस्मान् रजिष्ठं पन्थामनुनेषि तस्मात् त्वमस्माभिः सत्कर्त्तव्योऽसि ॥ १ ॥

▼ ***दयानन्द-सरस्वती (हि) - विषयः***

अथ सोमशब्दार्थ उपदिश्यते ।

▼ ***दयानन्द-सरस्वती (हि) - पदार्थः***

पदार्थान्वयभाषाः - (त्वम्) परमेश्वरो विद्वान् वा (सोम) सर्वेश्वर्यवन् (प्र) (चिकितः) जानासि। मध्यमैकवचने लेट्प्रयोगः। (मनीषा) मनस ईषया प्रज्ञानुरूपया। अत्र सुपां सुलुगिति

तृतीयास्थाने डादेशः। (त्वम्) (रजिष्ठम्) अतिशयेन ऋतु रजिष्ठम्। ऋजुशब्दादिष्ठनि। विभाषर्जोश्छन्दसि। अ० ६। ४। १६२। इति ऋकारस्य रेफादेशः। (अनु) (नेषि) प्रापयसि। अत्र नौधातोर्लटि बहुलं छन्दसीति शपो लुक्। अत्रान्तर्गतो ण्यर्थः। (पन्थाम्) पन्थानम्। अत्र छान्दसो वर्णलोपो वेति नकारलोपः। (तव) (प्रणीती) प्रकृष्टा चासौ नीतिस्तया। अत्र सुपां सुलुगिति पूर्वसवर्णदीर्घः। (पितरः) ज्ञानिनः (नः) अस्मभ्यम् (इन्दो) सोम्यगुणसम्पन्न (देवेषु) विद्वत्सु दिव्यगुणकर्मस्वभावेषु वा (रत्नम्) रमणीयं धनम् (अभजन्त) भजन्ति (धीराः) ध्यानधैर्ययुक्ताः ॥ १ ॥

▼ ***दयानन्द-सरस्वती (हि) - भावार्थः***

भावार्थभाषाः - अत्र श्लेषालङ्कारः। यथा परमेश्वरः परमविद्वान् वाऽविद्यां विनाश्य विद्याधर्ममार्गे प्रापयति तथैव वैद्यकशास्त्ररीत्या सेवितः सोमाद्योषधिगणः सर्वान् रोगान् विनाश्य सुखानि प्रापयति ॥ १ ॥

▼ ***सविता जोशी ← दयानन्द-सरस्वती (म) - विषयः***

या सूक्तात अध्ययन, अध्यापन करणाऱ्या विद्या शिकणाऱ्या इत्यादी कामांची सिद्धी करणाऱ्या (सोम) शब्दाच्या अर्थाच्या कथनाने या सूक्ताच्या अर्थाची पूर्वसूक्ताच्या अर्थाबरोबर संगती जाणली पाहिजे.

▼ ***सविता जोशी ← दयानन्द-सरस्वती (म) - भावार्थः***

भावार्थभाषाः - या मंत्रात श्लेषालंकार आहे. जसा परमेश्वर किंवा अत्यंत उत्तम विद्वान अविद्येचा नाश करून विद्या व धर्ममार्गाकडे तसे वैद्यकशास्त्राच्या रीतीने सेवा केलेला सोम इत्यादी औषधींचा समूह सर्व रोगांचा नाश करतो व सुखी करतो. ॥ १ ॥

त्व"या हि" नः पित"रः सोम पू"र्वे
क"र्माणि चक्रुः" पवमान धी"राः
वन्व"न्न् अ"वातः परिधीँ"र् अ"पोर्णु
वीरे"भिर् अ"श्वैर् मघ"वा भवा नः त्वया॒ हि नः॑ पि॒तरः॑ सोम॒ पूर्वे॒ कर्मा॑णि च॒क्रुः प॑वमान॒ धीराः॑ ।
व॒न्वन्नवा॑तः परि॒धीँरपो॑र्णु वी॒रेभि॒रश्वै॑र्म॒घवा॑ भवा नः ॥

▼ ***अधिमन्त्रम् - sa***

- देवता - पवमानः सोमः
- ऋषिः - दैवोदासिः प्रतर्दनः
- छन्दः - त्रिष्टुप्

▼ ***Thomson & Solcum***

त्व᳚या हि᳚ नः पित᳚रः सोम पू᳚र्वे
क᳚र्माणि चक्रुः᳚ पवमान धी᳚राः
वन्व᳚न्न् अ᳚वातः परिधीँ᳚र् अ᳚पोर्णु
वीरे᳚भिर् अ᳚श्वैर् मघ᳚वा भवा नः

▼ *Vedaweb annotation*

---

**Strata**

Normal

---

**Pāda-label**

genre M

genre M

genre M

genre M

---

**Morph**

hí ← hí (invariable)
{}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

pitáraḥ ← pitár- (nominal stem)
{case:NOM, gender:M, number:PL}

pū́rve ← pū́rva- (nominal stem)
{case:NOM, gender:M, number:PL}

soma ← sóma- (nominal stem)
{case:VOC, gender:M, number:SG}

tváyā ← tvám (pronoun)
{case:INS, number:SG}

cakrúḥ ← √kr̥- (root)
{number:PL, person:3, mood:IND, tense:PRF, voice:ACT}

dhī́rāḥ ← dhī́ra- (nominal stem)
{case:NOM, gender:M, number:PL}

kármāṇi ← kárman- (nominal stem)
{case:ACC, gender:N, number:PL}

pavamāna ← √pū- (root)
{case:VOC, gender:M, number:SG, tense:PRS, voice:MED}

ápa ← ápa (invariable)
{}

ávātaḥ ← ávāta- (nominal stem)
{case:NOM, gender:M, number:SG}

paridhī́n ← paridhí- (nominal stem)
{case:ACC, gender:M, number:PL}

ūrṇu ← √vr̥- (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

vanván ← √vanⁱ- (root)
{case:NOM, gender:M, number:SG, tense:PRS, voice:ACT}

áśvaiḥ ← áśva- (nominal stem)
{case:INS, gender:M, number:PL}

bhava ← √bhū- (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

maghávā ← maghávan- (nominal stem)
{case:NOM, gender:M, number:SG}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

vīrébhiḥ ← vīrá- (nominal stem)
{case:INS, gender:M, number:PL}

▼ *पद-पाठः*

त्वया॑ । हि । नः॒ । पि॒तरः॑ । सो॒म॒ । पूर्वे॑ । कर्मा॑णि । च॒क्रुः । प॒व॒मा॒न॒ । धीराः॑ ।
व॒न्वन् । अवा॑तः । प॒रि॒ऽधीन् । अप॑ । ऊ॒र्णु॒ । वी॒रेभिः॑ । अश्वैः॑ । म॒घऽवा॑ । भ॒व॒ । नः॒ ॥

▼ *पद-पाठः-तैत्तिरीयः*

त्वया॑ । हि । नः॒ । पि॒तरः॑ । सो॒म॒ । पूर्वे॑ । कर्मा॑णि । च॒क्रुः । प॒व॒मा॒न॒ । धीराः॑ ॥ व॒न्वन्न् । अवा॑तः । प॒रि॒धीनिति॑ परि-धीन् । अपेति॑ । ऊ॒र्णु॒ । वी॒रेभिः॑ । अश्वैः॑ । म॒घवेति॑ म॒घ-वा॒ । भ॒व॒ । नः॒ ॥

▼ *Hellwig Grammar*

- *tvayā ← tvad*
- [noun], instrumental, singular
- “you.”

---

- *hi*
- [adverb]
- “because; indeed; for; therefore; hi [word].”

---

- *naḥ ← mad*
- [noun], genitive, plural
- “I; mine.”

---

- *pitaraḥ ← pitṛ*
- [noun], nominative, plural, masculine
- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

---

- *soma*
- [noun], vocative, singular, masculine
- “Soma; moon; soma [word]; Candra.”

- *pūrve* ← *pūrva*
- [noun], nominative, plural, masculine
- “aforesaid(a); antecedent; previous(a); first; eastern; former(a); pūrva [word]; age-old; anterior; bygone; fore(a); predictive; firstborn; easterly; instrumental.”

---

- *karmāṇi* ← *karman*
- [noun], accusative, plural, neuter
- “action; saṃskāra; ritual; procedure; karman; treatment; object; function; production; job; operation; karman [word]; act; job; passive voice; activity; consequence; function; yajña; pañcakarman; cooking; occupation; profession; construction; duty; method; natural process; duty; therapy.”

---

- *cakruḥ* ← *kṛ*
- [verb], plural, Perfect indicative
- “make; perform; cause; produce; shape; construct; do; put; fill into; use; fuel; transform; bore; act; write; create; prepare; administer; dig; prepare; treat; take effect; add; trace; put on; process; treat; heed; hire; act; produce; assume; eat; ignite; chop; treat; obey; manufacture; appoint; evacuate; choose; understand; insert; happen; envelop; weigh; observe; practice; lend; bring; duplicate; plant; kṛ; concentrate; mix; knot; join; take; provide; utter; compose.”

---

- *pavamāna* ← *pū*
- [verb noun], vocative, singular
- “purify; filter; blow; purify; purge; sift.”

---

- *dhīrāḥ* ← *dhīra*
- [noun], nominative, plural, masculine

- “expert; wise; intelligent; versed; adept.”

---

- *vanvann* ← *vanvan* ← *van*
- [verb noun], nominative, singular
- “obtain; gain; desire; get; like; love; overcome.”

---

- *avātaḥ* ← *avāta*
- [noun], nominative, singular, masculine

---

- *paridhīṃr* ← *paridhi*
- [noun], accusative, plural, masculine
- “covering; circumference; Paridhi; halo; fence.”

---

- *aporṇu* ← *apavṛ* ← *√vṛ*
- [verb], singular, Present imperative
- “open.”

---

- *vīrebhir* ← *vīrebhiḥ* ← *vīra*
- [noun], instrumental, plural, masculine
- “hero; man; Vīra; vīra; vīra [word]; Vīra.”

---

- *aśvair* ← *aśvaiḥ* ← *aśva*
- [noun], instrumental, plural, masculine
- “horse; aśva [word]; Aśva; stallion.”

---

- *maghavā* ← *maghavan*
- [noun], nominative, singular, masculine
- “big.”

---

- *bhavā* ← *bhava* ← *bhū*

- [verb], singular, Present imperative
- “become; be; originate; transform; happen; result; exist; be born; be; be; come to life; grow; elapse; come to mind; thrive; become; impend; show; conceive; understand; stand; constitute; serve; apply; behave.”

---

- *naḥ* ← *mad*
- [noun], dative, plural
- “I; mine.”

---

▼ ***रङ्गनाथः***

पवमान सोम- पुनान रस। त्वया- भवता। हि- खलु। नः- अस्माकम्। धीराः- धारणाकुशलाः। पूर्वे पितरः- पूर्वाचार्याः। कर्माणि- पुण्यानि। चक्रुः- कृतवन्तः। अवातः- प्राणोपासनरहितानि। परिधीन्- आवरणानि। वन्वन्- हिंसन्। अपोर्णु- अपावृणु। वीरेभिः- वीर्यसंपन्नैः। अश्वैः- प्राणैः। नः- अस्मदर्थम्। मघवा- संपद्वान्। भव॥११॥

▼ ***सायण-भाष्यम्***

हे **पवमान** पूयमान **सोम धीराः** कर्मणि कुशलाः प्राज्ञाः **नः** अस्माकं **पितरः पूर्वे** पुरातना अङ्गिरसः **त्वया** । हिरवधारणे । त्वया सहायेनैव **कर्माणि** अग्निष्टोमादीनि **चक्रुः** कृतवन्तः । किंच **वन्वन्** स्तोतॄन संभजन् । यद्वा । वनतिर्हिंसार्थः। शत्रून् हिंसन’ । **अवातः** तैरभिगतस्त्वं **परिधीन्** । परिधीयत एभिः सर्वमिति परिधयो राक्षसाः। तान् **अपोर्णु** अपोर्णुहि अपच्छादय । जहीति यावत् । ऊर्णोतेर्लोटि छान्दसो हेर्लुक् । एतादृशस्त्वं **नः** अस्माकं पुत्रादियुक्तं धनं प्रयच्छेत्यर्थः ॥

▼ ***भट्टभास्कर-टीका***

3त्वया हीति ॥ हे सोम **नः**अस्माकं पूर्वे पितरः त्वया खलु हेतुना त्वत्प्रसादेन **कर्माणि** ज्योतिष्टोमदीनि पितृयज्ञादीनि वा **चक्रुः** कृतवन्तः । धीराः । गतम् ।
हे **पवमान** शोधक तस्मात्कारणात् अस्माकमपि त्वं **वन्वन्** अस्माकं संभजन् **अवातः** वातरहितः स्वयमेव ज्वलन् ।
यद्वा - अकार उपमायां अयं वायुसदृशः, दीर्घकारित्वं साङ्श्यं । **परिधीन्** परितो धारयितॄन् आत्मनः प्रतिबन्धॄन् **अपोर्णु** अपानुद प्रतिबन्धकापनोदेन शीघ्रमागच्छेति ।
रुत्वानुनासिकावुक्तौ । **वीरेभिः** विक्रान्तैरश्वैः शीघ्रमागच्छेति । ततश्चागत्य नः अस्माकं **मघवा** धनवान् भव । अस्मभ्यं धनं दातुं हस्ते गृहाण ।

यद्वा - हविषा धनेन तद्वान् भव । 'छन्दसीवनिपौ' इति मत्वर्थीयो वनिप्रत्ययः ।
'द्व्यचोतस्तिङः' इति भवशब्दस्य संहितायां दीर्घः ॥

▼ *Wilson*

---

## English translation:

"**Soma Pavamāna**, by you our ancient and wise progenitors performed their religious rites; harming the foes (yourself) unharmed slay the **rākṣasas** and be liberal in enriching us with **male** offspring and horses."

---

## Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Yourself unharmed: **avataḥ** = tair, i.e. śatrubhir abhigataḥ

▼ *Jamison Brereton*

Because with you, self-purifying Soma, our insightful forefathers performed their (ritual) acts,
open up the barriers, vanquishing but unvanquished; become a benefactor to us with heroes and with horses.

▼ *Jamison Brereton Notes*

As Geldner (see n. 11c) and Ober (I.311 with n. 791) point out, the first hemistich depicts the Vala myth, with "forefathers" (pitáraḥ) a reference to the Aṅgirases - made clearer by a similar but more explicit passage in the next hymn, IX.97.39. This mythic episode - the forefathers opening the Vala cave with the help of soma - provides the model for the appeal in c, for Soma to open the paridhí- (paridhī́m̐r áporṇu): paridhí- is used explicitly of the barriers of the Vala cave in I.52.5. But as Geldner suggests (n. 11c), the poet here is calling on Soma to open up the livestock pens and provide us with the animals therein.

▼ *Griffith*

For our sage fathers, Soma Pavamana, of old performed, by thee, their sacred duties.
Fighting unvanquished, open the enclosures: enrich us with large gifts of steeds and heroes.

▼ *Geldner*

Denn mit dir, o Soma, haben unsere weisen Väter vormals ihre Taten getan, o Pavamana. Ein unüberwundener Überwinder öffne du die Schranken; sei gegen uns freigebig mit Söhnen und Rossen!

▼ *Grassmann*

Denn unsre alten weisen Väter thaten durch dich, o heller Soma, ihre Werke, Die Wehren brich unangefochten, siegreich, sei mächtig uns durch Helden und durch Rosse.

▼ *Elizarenkova*

Ведь это с тобой, о сома, наши древние отцы
Совершали обряды, о Павамана, (эти) мудрые.
Настигающий, (но) не настигнутый, раствори преграды!
Будь к нам щедрым на мужей и коней!

▼ *अधिमन्त्रम् (VC)*

- पवमानः सोमः
- प्रतर्दनो दैवोदासिः
- त्रिष्टुप्
- धैवतः

▼ *आर्यमुनि - पदार्थः*

पदार्थान्वयभाषाः - (सोमः) हे परमात्मन् ! (पूर्वे, पितरः) पूर्वकाल के पिता-पितामह (धीराः) जो धीर हैं (त्वया) तुम्हारी प्रेरणा से(कर्माणि, चक्रुः) कर्म्मों को करते थे। (पवमान) हे सबको पवित्र करनेवाले परमात्मन् ! (वन्वन्) आपका भजन करते हुए (अवातः) निश्चल होकर

(परिधीन्) राक्षसों को (अपोर्णु) दूर करें (वीरेभिः) वीरपुरुषों से (अश्वैः) और जो शक्तिसम्पन्न हैं, उनसे (नः) हमको (मघवा, भव) ऐश्वर्य्यसम्पन्न करें॥११॥

▼ ***आर्यमुनि - भावार्थः***

भावार्थभाषाः - परमात्मा की आज्ञापालन करने से देश में ज्ञानी तथा विज्ञानी पुरुषों की उत्पत्ति होती है और देश ऐश्वर्य्यसम्पन्न होता है, इस प्रकार राक्षसभाव निवृत्त होकर सभ्यता के भाव का प्रचार होता है॥११॥

▼ ***आर्यमुनि - पदार्थः***

पदार्थान्वयभाषाः - (सोम) हे परमात्मन् ! (पूर्वे, पितरः) पूर्वकालिकाः पितृपितामहादयः (धीराः) ये धीरास्ते (त्वया) त्वत्प्रेरणयैव (कर्माणि, चक्रुः) कर्माणि अकार्षुः (पवमान) हे सर्वपावक ! (वन्वन्) भवन्तं सेवमानः (अवातः) निश्चलः सन् (परिधीन्) राक्षसान् (अप, ऊर्णु) अपसारयाणि (वीरेभिः) वीरपुरुषैः (अश्वैः) शक्तिसम्पन्नैश्च अस्मान् (मघवा, भव) ऐश्वर्यसम्पन्नं कुर्याः॥११॥

तुवं" सोम पितृ"भिः संविदानो"
अ"नु द्या"वापृथिवी" आ" ततन्थ
त"स्मै त इन्दो हवि"षा विधेम
वयं" सियाम प"तयो रयीणा"म् त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥

▼ ***पद-पाठः***

त्वम् । सोम । पितृभिरिति पितृ-भिः । सवँविदान इति सम्-विदानः । अन्विति । द्यावापृथिवी इति द्यावा-पृथिवी । एति । ततन्थ ॥ तस्मै । ते । इन्दो इति । हविषा । विधेम । वयम् । स्याम । पतयः । रयीणाम् ॥ ।

▼ ***अधिमन्त्रम् - sa***

- देवता - सोमः
- ऋषिः - प्रगाथः काण्वः
- छन्दः - त्रिष्टुप्

▼ ***Thomson & Solcum***

तुवं" सोम पितृ"भिः संविदानो"
अ"नु द्या"वापृथिवी" आ" ततन्थ

त॑स्मै त इन्दो हवि॑षा विधेम
वयं॑ सियाम प॑तयो रयीणा॑म्

▾ *Vedaweb annotation*

**Strata**
Popular for non-linguistic reasons

**Pāda-label**
genre D
genre D
genre D
genre D;; repeated line

**Morph**
pitŕ̥bhiḥ ← pitár- (nominal stem)
{case:INS, gender:M, number:PL}

saṁvidānáḥ ← √vid- 2 (root)
{case:NOM, gender:M, number:SG, tense:PRF, voice:MED}

soma ← sóma- (nominal stem)
{case:VOC, gender:M, number:SG}

tvám ← tvám (pronoun)
{case:NOM, number:SG}

ā́ ← ā́ (invariable)
{}

ánu ← ánu (invariable)
{}

dyā́vāpr̥thivī́ ← dyā́vāpr̥thivī́- (nominal stem)
{case:NOM, gender:F, number:DU}

tatantha ← √tan- (root)
{number:SG, person:2, mood:IND, tense:PRF, voice:ACT}

haviṣā ← havís- (nominal stem)
{case:INS, gender:N, number:SG}

indo ← índu- (nominal stem)
{case:VOC, gender:M, number:SG}

tásmai ← sá- ~ tá- (pronoun)
{case:DAT, gender:M, number:SG}

te ← tvám (pronoun)
{case:DAT, number:SG}

vidhema ← √vidh- (root)
{number:PL, person:1, mood:OPT, tense:AOR, voice:ACT}

pátayaḥ ← páti- (nominal stem)
{case:NOM, gender:M, number:PL}

rayīṇā́m ← rayí- ~ rāy- (nominal stem)
{case:GEN, gender:M, number:PL}

syāma ← √as- 1 (root)
{number:PL, person:1, mood:OPT, tense:PRS, voice:ACT}

vayám ← ahám (pronoun)
{case:NOM, number:PL}

▼ ***पद-पाठः***

त्वम् । सो॒म॒ । पि॒तृऽभिः॑ । स॒म्ऽवि॒दा॒नः । अनु॑ । द्यावा॑पृथि॒वी इति॑ । आ । त॒त॒न्थ॒ ।
तस्मै॑ । ते॒ । इ॒न्दो॒ इति॑ । ह॒विषा॑ । वि॒धे॒म॒ । व॒यम् । स्या॒म॒ । पत॑यः । र॒यी॒णाम् ॥

▼ ***पद-पाठः-तैत्तिरीयः***

त्वम् । सो॒म॒ । पि॒तृभि॒रिति॑ पि॒तृ-भिः॒ । स॒वँ॒वि॒दा॒न इति॑ सम्-वि॒दा॒नः । अन्विति॑ । द्यावा॑पृथि॒वी
इति॒ द्यावा॑-पृ॒थि॒वी । एति॑ । त॒त॒न्थ॒ ॥ तस्मै॑ । ते॒ । इ॒न्दो॒ इति॑ । ह॒विषा॑ । वि॒धे॒म॒ । व॒यम् । स्या॒म॒ ।

पतंयः । र॒यी॒णाम् ॥ ।

▼ ***Hellwig Grammar***

- *tvaṃ* ← *tvam* ← *tvad*
- [noun], nominative, singular
- “you.”

---

- *soma*
- [noun], vocative, singular, masculine
- “Soma; moon; soma [word]; Candra.”

---

- *pitṛbhiḥ* ← *pitṛ*
- [noun], instrumental, plural, masculine
- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

---

- *saṃvidāno* ← *saṃvidānaḥ* ← *saṃvid* ← *√vid*
- [verb noun], nominative, singular
- “agree; know; match; recognize.”

---

- *'nu* ← *anu*
- [adverb]
- “subsequently; behind; along; towards; because.”

---

- *dyāvāpṛthivī*
- [noun], accusative, dual, feminine
- “heaven and earth; dyāvāpṛthivī [word].”

---

- *ā*
- [adverb]
- “towards; ākāra; until; ā; since; according to; ā [suffix].”

- *tatantha* ← *tan*
- [verb], singular, Perfect indicative
- “expand; perform; cause; increase; write; spread; produce; spread; speak; propagate.”

---

- *tasmai* ← *tad*
- [noun], dative, singular, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

---

- *ta* ← *te* ← *tvad*
- [noun], dative, singular
- “you.”

---

- *indo* ← *indu*
- [noun], vocative, singular, masculine
- “moon; Soma; drop; anusvāra; one; Candra; silver; camphor; point; juice.”

---

- *haviṣā* ← *havis*
- [noun], instrumental, singular, neuter
- “Havya; offering; ghee; havis [word].”

---

- *vidhema* ← *vidh*
- [verb], plural, Present optative
- “worship; offer.”

---

- *vayaṃ* ← *vayam* ← *mad*
- [noun], nominative, plural

- “I; mine.”

---

- *syāma* ← *as*
- [verb], plural, Present optative
- “be; exist; become; originate; happen; result; be; dwell; be born; stay; be; equal; exist; transform.”

---

- *patayo* ← *patayaḥ* ← *pati*
- [noun], nominative, plural, masculine
- “husband; overlord; king; deity; īśvara; ruler; pati [word]; commanding officer; leader; owner; mayor; lord.”

---

- *rayīṇām* ← *rayi*
- [noun], genitive, plural, masculine
- “wealth; property.”

---

▼ ***रङ्गनाथः***

सोम- रस। त्वम्। पितृभिः- पूर्वाचार्यैः। संविदानः- लब्धः। द्यावा पृथिवी- द्यावापृथिव्यौ। अनु। आ ततन्थ- विस्तृतवान्। तस्मै। ते- तुभ्यम्। इन्दो। हविषा। विधेम- परिचरेम। वयम्। रयीणाम्- सम्पदाम्। पतयः- पालकाः। स्याम- भवेम॥१३॥

▼ ***सायण-भाष्यम्***

हे **सोम त्वं पितृभिः** सह **संविदानः** संगच्छमानः **द्यावापृथिवी** द्यावापृथिव्यौ **अनु आ ततन्थ** क्रमेण विस्तारयसि । **तस्मै** सोमाय **हविषा विधेम** परिचरेम । **वयं रयीणां** धनानां **पतयः स्याम** भवेम ॥

▼ ***भट्टभास्कर-टीका***

4त्वं सोमेति ॥ हे सोम! **त्वं** पितृभिः पूर्वैरास्माकीनैः **संविदानः** ऐकमत्यं गतः इत्थं वयमस्मै कुर्म इति द्यावापृथिव्यौ **अन्वाततन्थ** अनुक्रमेण दीप्त्या ।
अततेः 'बभूथाततन्थ' इति निपात्यते ।
हे इन्दो! तस्मै तादृशाय **ते** तुभ्यं **हविषा विधेम** परिचरेम तदर्थां आततदीप्तिर्भव । प्रयोजनं च ब्रूमः ।
वयं **रयीणां** धनानां पतयः **स्याम** भूयास्मेति हविषा विधेम त्वाम्, त्वं च द्यावापृथिवी दीप्त्या

आततन्थ पितृभिश्च संविदानो भव इति ।
'समोगमृच्छि' इति विदेरात्मनेपदम् ॥

▼ *Wilson*

---

## English translation:

“**Soma**, you in conjunction with the fathers do stretch our successively heaven and earth-- to you let usdo worship with oblations, may we be lords of wealth.”

▼ *Jamison Brereton*

You, Soma, coming to agreement with the forefathers, extend through heaven and earth.
To you, drop, we would do ceremonial honor with an oblation. May we be lords of riches.

▼ *Griffith*

Associate with the Fathers thou, O Soma, hast spread thyself abroad through earth and heaven.
So with oblation let us serve thee, Indu, and so let us become the lords of riches,

▼ *Macdonell*

Uniting with the Fathers thou, O Soma, Hast over Heaven and Earth thyself extended. So, Indu, we would serve thee with oblation: Thus we would be the lords of ample riches.

▼ *Geldner*

Du, Soma, bist mit den Vätern im Einvernehmen, du reichst so weit wie Himmel und Erde. Dir, o Saft, wollen wir darum mit Opfer aufwarten; wir wollen Herren der Reichtümer sein.

▼ *Grassmann*

O Soma, du vereinigt mit den Vätern, hast dich verbreitet über Erd' und Himmel; Dem Indu möchten wir mit Opfer dienen, und möchten sein Besitzer aller Schätze.

▼ *Elizarenkova*

Ты, сома, находясь в согласии с отцами,
Простерся вдоль неба и земли.
Это тебя мы хотим почтить жертвенным возлиянием.
Да будем мы повелителями богатств!

▼ *अधिमन्त्रम् (VC)*

- सोमः
▼ *Elizarenkova*

Поэтому, Яма, садись на эту солому
В единении с Ангирасами, отцами!

Да привезут тебе молитвы, произнесенные поэтами!
Этой жертве радуйся, о царь!

▼ *अधिमन्त्रम् (VC)*

- यमः
- यमः
- विराट्त्रिष्टुप्
- धैवतः

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (यम-अङ्गिरोभिः पितृभिः संविदानः इमं प्रस्तरं हि-आसीद) हे जीवनकाल ! तू प्राणों के साथ अनुकूल होता हुआ मेरे इस शरीररूपी यज्ञ को जीवनवृद्धि के हेतु अवश्य भली प्रकार प्राप्त हो (कविशस्ताः मन्त्राः त्वा आवहन्तु) शरीर-विद्यावेत्ता विद्वानों के निर्दिष्ट मन्तव्य तुझ को मेरे शरीर में चिरकाल तक रखें, अत एव (राजन्-एना-हविषा मादयस्व) हे राजमान देव ! इस हविर्दान तथा खाने योग्य पदार्थ से मुझ को सन्तुष्ट, सजीवन कर ॥४॥

▼ *ब्रह्ममुनि - भावार्थः*

भावार्थभाषाः - प्राणशक्ति के अभ्यास और वैद्यक सिद्धान्तों के अनुसार खानपान हवनादि क्रियाओं से मनुष्य दीर्घजीवी और सुखी हो सकता है ॥४॥

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (यम-अङ्गिरोभिः-पितृभिः-संविदानः-इमं प्रस्तरं हि-आसीद) यम-हे जीवनकाल ! अङ्गानां रसैः प्राणैः सहानुकूलः संस्त्वमिमं प्रस्तरम्-शरीररूपं यज्ञं जीवनवृद्धिहेतोरवश्यमासीद्-समन्तात्प्राप्तो भव “यज्ञो वै प्रस्तरः” [श०१।३।४।१०] ‘पुरुषो वाव यज्ञः” [छन्दो०३।६।१] “पुरुषो वै यज्ञस्तस्य शिर एव हविर्धानं मुखमाहवनीयः” [गो०५।४] (कविशस्ताः-मन्त्राः-त्वा आवहन्तु) विद्वत्प्रोक्तानि शरीरविद्या-वित्प्रोक्तानि मन्तव्यानि त्वामावहन्तु-अत्र शरीरे समन्तात् प्रापयन्तु चिरं रक्षन्त्वित्यर्थः, अत एव (राजन्-एना हविषा-मादयस्व) राजन्-हे राजमान देव ! अनेन हविर्दानेनादानयोग्येन वस्तुना वा मां मादयस्व-युङ्क्ष्व-संतोषय सजीवनं कुर्वित्यर्थः ॥४॥

अ॑ङ्गिरोभिर् आ॑ गहि यज्ञि॑येभिर्
य॑म वैरूपइ॑र् इह॑ मादयस्व
वि॑वस्वन्तं हुवे यः॑ पिता॑ ते
अस्मि॑न् यज्ञे॑ बर्हि॑षि आ॑ निष॑द्य अङ्गि॑रोभि॒रा ग॑हि य॒ज्ञियें॑भि॒र्यम॑ वैरू॒पैरि॒ह मा॑दयस्व ।
विव॑स्वन्तं हुवे॒ यः पि॒ता ते॒ऽस्मिन्य॒ज्ञे ब॒र्हिष्या नि॒षद्य॑ ॥

▼ *अधिमन्त्रम् - sa*

- देवता - यमः
- ऋषिः - यमः
- छन्दः - त्रिष्टुप्

▼ *Thomson & Solcum*

अ॑ङ्गिरोभिर् आ॑ गहि यज्ञि॑येभिर्
य॑म वैरूपइ॑र् इह॑ मादयस्व
वि॑वस्वन्तं हुवे यः॑ पिता॑ ते
अस्मि॑न् यज्ञे॑ बर्हि॑षि आ॑ निष॑द्य

▼ *Vedaweb annotation*

**Strata**
Popular for linguistic reasons, and possibly also for non-linguistic reasons

**Pāda-label**
popular
popular
popular
popular

**Morph**
ā́ ← ā́ (invariable)
{}

áṅgirobhiḥ ← áṅgiras- (nominal stem)
{case:INS, gender:M, number:PL}

gahi ← √gam- (root)
{number:SG, person:2, mood:IMP, tense:AOR, voice:ACT}

yajñíyebhiḥ ← yajñíya- (nominal stem)
{case:INS, gender:M, number:PL}

ihá ← ihá (invariable)
{}

mādayasva ← √mad- (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:MED}

vairūpaíḥ ← vairūpá- (nominal stem)
{case:INS, gender:M, number:PL}

yáma ← yamá- (nominal stem)
{case:VOC, gender:M, number:SG}

huve ← √hū- (root)
{number:SG, person:1, mood:IND, tense:PRS, voice:MED}

pitā́ ← pitár- (nominal stem)
{case:NOM, gender:M, number:SG}

te ← tvám (pronoun)
{case:DAT, number:SG}

vívasvantam ← vívasvant- (nominal stem)
{case:ACC, gender:M, number:SG}

yáḥ ← yá- (pronoun)
{case:NOM, gender:M, number:SG}

ā́ ← ā́ (invariable)
{}

asmín ← ayám (pronoun)
{case:LOC, gender:M, number:SG}

barhíṣi ← barhís- (nominal stem)
{case:LOC, gender:N, number:SG}

niṣádya ← √sad- (root)
{non-finite:CVB}

yajñé ← yajñá- (nominal stem)
{case:LOC, gender:M, number:SG}

▼ *पद-पाठः-तैत्तिरीयः*

अङ्गिंरःऽभिः । आ । ग॒हि॒ । य॒ज्ञियें॑भिः । यमं । वै॒रू॒पैः । इ॒ह । मा॒द॒य॒स्व॒ ।
विवं॑स्वन्तम् । हु॒वे॒ । यः । पि॒ता । ते॒ । अ॒स्मिन् । य॒ज्ञे । ब॒र्हिषिं । आ । नि॒ऽसद्यं ॥

▼ *Hellwig Grammar*

- *aṅgirobhir* ← *aṅgirobhiḥ* ← *aṅgiras*
- [noun], instrumental, plural, masculine
- “Aṅgiras; Aṅgiras; Brahman; Atharva-Veda; aṅgiras [word]; Aṅgiras.”

---

- *ā*
- [adverb]
- “towards; ākāra; until; ā; since; according to; ā [suffix].”

---

- *gahi* ← *gam*
- [verb], singular, Aorist imperative
- “go; situate; enter (a state); travel; disappear; [in]; elapse; leave; reach; vanish; love; walk; approach; issue; hop on; gasify; get; come; die; drain; spread; transform; happen; discharge; ride; to be located; run; detect; refer; go; shall; drive.”

---

- *yajñiyebhir* ← *yajñiyebhiḥ* ← *yajñiya*
- [noun], instrumental, plural, masculine
- “sacrificial; divine; devoted.”

---

- *yama*
- [noun], vocative, singular, masculine
- “Yama; yama; twin; yam; Yama; two; bridle; yama [word]; Asvins.”

---

- *vairūpair* ← *vairūpaiḥ* ← *vairūpa*
- [noun], instrumental, plural, masculine
- “Vairūpa.”

---

- *iha*
- [adverb]
- “here; now; in this world; now; below; there; here; just.”

---

- *mādayasva* ← *māday* ← *√mad*
- [verb], singular, Present imperative
- “delight; enjoy; intoxicate.”

---

- *vivasvantaṃ* ← *vivasvantam* ← *vivasvant*
- [noun], accusative, singular, masculine
- “Surya; sun; Vivasvant; Vivasvant.”

---

- *huve* ← *hvā*
- [verb], singular, Present indikative
- “raise; call on; call; summon.”

---

- *yaḥ* ← *yad*
- [noun], nominative, singular, masculine
- “who; which; yat [pronoun].”

---

- *pitā* ← *pitṛ*
- [noun], nominative, singular, masculine

- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

---

- *te* ← *tvad*
- [noun], genitive, singular
- “you.”

---

- *'smin* ← *asmin* ← *idam*
- [noun], locative, singular, masculine
- “this; he,she,it (pers. pron.); here.”

---

- *yajñe* ← *yajña*
- [noun], locative, singular, masculine
- “yajña; religious ceremony; Vishnu; yajña [word]; Yajña; Shiva.”

---

- *barhiṣy* ← *barhiṣi* ← *barhis*
- [noun], locative, singular, neuter
- “Barhis; barhis [word].”

---

- *ā*
- [adverb]
- “towards; ākāra; until; ā; since; according to; ā [suffix].”

---

- *niṣadya* ← *niṣad* ← *√sad*
- [verb noun]
- “sit down; sit; put.”

---

▼ ***रङ्गनाथः***

यज्ञियेभिः- यज्ञार्हैः। अङ्गिरोभिः- अङ्गनशीलैर्भवद्गणैः। आ गहि- आगच्छ। यम- नियमाधिदैवत। वैरूपैः- नानारूपैस्तैः। इह- अत्र। मादयस्व- हर्षय। यः। ते- तव पिता जनकस्तम्। विवस्वन्तम्-

आत्मसूर्यम्। हुवे- आह्वये। अस्मिन्- एतस्मिन्। यज्ञे। बर्हिषि- दर्भासने चित्ताकाशे वा। आ निषद्य- उपविश्य। स विवस्वान् हर्षयतु॥५॥

▼ *सायण-भाष्यम्*

हे **यम वैरूपैः** विविधरूपयुक्तैर्वैरूपसामप्रियैर्वा **यज्ञियेभिः** यज्ञयोग्यैः **अङ्गिरोभिः** सह **आ गहि** आगच्छ । आगत्य च **इह** अस्मिन् यज्ञे **मादयस्व** यजमानं हर्षय । **यः** विवस्वान् **ते** तव **पिता** अस्ति **अस्मिन् यज्ञे** तं **विवस्वन्तं हुवे** आह्वयामि । स चास्तीर्णे **बर्हिषि आ निषद्य** उपविश्य यजमानं हर्षयतु ॥ ॥ १४ ॥

▼ *भट्टभास्कर-टीका*

16अङ्गिरोभिरिति ॥ हे यम अङ्गिरोभिस्सह **आगहि** आगच्छ । पूर्ववत् शपो लुक् । **यज्ञियेभिः** यज्ञार्हैः **वैरूपैः** विविधकर्मरूपसंबन्धिभिः, वैरूपसामप्रियैर्वा । यद्वा - स्वार्थिकोऽण् । विरूपैः विविधरूपैस्सह इह कर्मणि मादयस्व । अथ यस्तव पिता तं विवस्वन्तं **हुवे** आह्वयामि । सोप्यस्मिन् यज्ञे आगत्य बर्हिषि निषद्य माद्यताम् ॥

▼ *Wilson*

## English translation:

“Come here, **Yama**, with the venerable multiform **Aṅgirasas**, and be exhilarated; I summon **Vivasvat**,who is your father, to this sacrifice; be seated on the sacred grass (delight the sacrificer).”

▼ *Jamison Brereton*

With the Aṅgirases, deserving of the sacrifice, come hither; Yama, become exhilarated here along with the Vairūpas—
I call upon Vivasvant, who is your father—once having sat down at this sacrifice, on this ritual grass here.

▼ *Griffith*

Come, Yama, with the Angirases the Holy, rejoice thee here with children of Virupa.
To sit on sacred grass at this our worship, I call Vivasvan, too, thy Father hither.

▼ *Macdonell*

Come hither with the Aṅgiras, the holy: Here with Virūpa's sons, O Yama revel, Vivasvant I invoke, who is thy father, When at this rite upon the straw he's seated.

▼ *Geldner*

Komm mit den opferwürdigen Angiras´! O Yama, ergötze dich hier mit den Vairupa´s - ich lade auch den Vivasvat, der dein Vater ist - nachdem du bei diesem Opfer auf dem Barhis Platz genommen hast.

▼ *Grassmann*

Komm, Jama, mit den heil'gen Angirasen, berausch dich hier mit den Virupa-Söhnen; Ich rufe den Vivasvat, deinen Vater, bei diesem Opfer auf der Streu zu sitzen.

▼ *Elizarenkova*

Приди с Ангирасами, достойными жертвы!
О, Яма, радуйся здесь с Варупами!
Я призываю Вивасвата, кто отец тебе,
Когда (ты) сел на солому при этом жертвоприношении.

▼ *अधिमन्त्रम् (VC)*

- यमः
- यमः
- पादनिचृत्त्रिष्टुप्
- धैवतः

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (यज्ञियेभिः-वैरूपैः-अङ्गिरोभिः-यम-आगहि इह मादयस्व) यज्ञ के योग्य नानाविध सायं-प्रातः, अमावस्या, पूर्णिमा, आदि सन्धियों के मुहूर्तरूप कालावयवों के साथ हे समय ! तू प्राप्त हो और इस यज्ञ में हमको अपने लाभ से तृप्त कर (यः ते पिता तं विवस्वन्तं

बर्हिष्या निषद्य-अस्मिन् यज्ञे हुवे) और जो तेरा पिता सूर्यदेव है, उसका भी मैं आसनोपविष्ट इस यज्ञ में आहुतिप्रदान द्वारा प्रयोग करता हूँ ॥५॥

▼ *ब्रह्ममुनि - भावार्थः*

भावार्थभाषाः - भिन्न-भिन्नपर्व दिवसों में जबकि सूर्यरश्मियाँ भी यज्ञ में संयुक्त हों, ऐसे स्थान पर पार्वण यज्ञ समयानुकूल बनाने के लिए करने चाहिये ॥५॥

▼ *ब्रह्ममुनि - पदार्थः*

पदार्थान्वयभाषाः - (यज्ञियेभिः-वैरूपैः-अङ्गिरोभिः-यम-आ गहि इह मादयस्व) यज्ञार्हैर्यज्ञयोग्यैर्विभिन्नरूपैरङ्गिरोभिः-सायम्प्रातरमावस्यापौर्णमास्यादि-सन्धि-समप्राणैः कालावयवैः सह हे समय ! त्वमागह्यागच्छ तथाऽऽगत्येहास्मिन् यज्ञेऽस्मान्मादयस्व तर्पय (यः-ते पिता तं विवस्वन्तं बर्हिष्या निषद्य-अस्मिन् यज्ञे हुवे) यश्च ते पिता विवस्वान् सूर्योऽस्ति तमहमासनमुपविश्योपविष्टः सन्नस्मिन् क्रियमाणे यज्ञे हुवे-आहुतिप्रदानेनाददे युनज्मि। 'अत्र हु धातुरादानार्थः' "हु दानादनयोरादाने च" [जुहोत्यादिः] ॥५॥

अ"ङ्गिरसो नः पित"रो न"वग्वा
अ"थर्वाणो भृ"गवः सोमिया"सः
ते"षां वयं" सुमतउ" यज्ञि"यानाम्
अ"पि भद्रे" सौमनसे" सियाम अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यासः॑ ।
तेषां॑ व॒यं सु॑म॒तौ य॒ज्ञिया॑ना॒मपि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥

▼ *अधिमन्त्रम् - sa*

- देवता - लिङ्गोक्तदेवताः
- ऋषिः - यमः
- छन्दः - त्रिष्टुप्

▼ *Thomson & Solcum*

अ"ङ्गिरसो नः पित"रो न"वग्वा
अ"थर्वाणो भृ"गवः सोमिया"सः
ते"षां वयं" सुमतउ" यज्ञि"यानाम्
अ"पि भद्रे" सौमनसे" सियाम

▼ *Vedaweb annotation*

**Strata**
Popular for linguistic reasons, and possibly also for non-linguistic reasons

---

**Pāda-label**
popular
popular
popular
popular;; repeated line

---

**Morph**
áṅgirasaḥ ← áṅgiras- (nominal stem)
{case:NOM, gender:M, number:PL}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

návagvāḥ ← návagva- (nominal stem)
{case:NOM, gender:M, number:PL}

pitáraḥ ← pitár- (nominal stem)
{case:NOM, gender:M, number:PL}

átharvāṇaḥ ← átharvan- (nominal stem)
{case:NOM, gender:M, number:PL}

bhŕ̥gavaḥ ← bhŕ̥gu- (nominal stem)
{case:NOM, gender:M, number:PL}

somyā́saḥ ← somyá- (nominal stem)
{case:NOM, gender:M, number:PL}

sumataú ← sumatí- (nominal stem)
{case:LOC, gender:F, number:SG}

téṣām ← sá- ~ tá- (pronoun)
{case:GEN, gender:M, number:PL}

vayám ← ahám (pronoun)
{case:NOM, number:PL}

yajñíyānām ← yajñíya- (nominal stem)
{case:GEN, gender:M, number:PL}

ápi ← ápi (invariable)
{}

bhadré ← bhadrá- (nominal stem)
{case:LOC, gender:N, number:SG}

saumanasé ← saumanasá- (nominal stem)
{case:LOC, gender:N, number:SG}

syāma ← √as- 1 (root)
{number:PL, person:1, mood:OPT, tense:PRS, voice:ACT}

▼ ***पद-पाठः-तैत्तिरीयः***

अङ्गिंरसः । नः॒ । पि॒तरः॑ । नवं॑ऽग्वाः । अथ॑र्वाणः । भृगं॑वः । सो॒म्यासः॑ ।
तेषां॑म् । व॒यम् । सु॒ऽम॒तौ । य॒ज्ञियां॑नाम् । अपिं । भ॒द्रे । सौ॒म॒न॒से । स्या॒म॒ ॥

▼ ***Hellwig Grammar***

- *aṅgiraso* ← *aṅgirasaḥ* ← *aṅgiras*
- [noun], nominative, plural, masculine
- “Aṅgiras; Aṅgiras; Brahman; Atharva-Veda; aṅgiras [word]; Aṅgiras.”

---

- *naḥ* ← *mad*
- [noun], genitive, plural
- “I; mine.”

---

- *pitaro ← pitaraḥ ← pitṛ*
- [noun], nominative, plural
- “father; Pitṛ; ancestor; parent; paternal ancestor; pitṛ [word]; forefather.”

---

- *navagvā ← navagvāḥ ← navagva*
- [noun], nominative, plural, masculine
- “Navagva.”

---

- *atharvāṇo ← atharvāṇaḥ ← atharvan*
- [noun], nominative, plural, masculine
- “Atharvan; Atharvavedin.”

---

- *bhṛgavaḥ ← bhṛgu*
- [noun], nominative, plural, masculine
- “Bhṛgu; precipice; Bhṛgu; Bhṛgu; Venus; bhṛgu [word].”

---

- *somyāsaḥ ← somya*
- [noun], nominative, plural, masculine
- “saumya.”

---

- *teṣāṃ ← teṣām ← tad*
- [noun], genitive, plural, masculine
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

---

- *vayaṃ ← vayam ← mad*
- [noun], nominative, plural
- “I; mine.”

---

- *sumatau* ← *sumati*
- [noun], locative, singular, feminine
- “benevolence; favor; Sumati.”

---

- *yajñiyānām* ← *yajñiya*
- [noun], genitive, plural, neuter
- “sacrificial; divine; devoted.”

---

- *api*
- [adverb]
- “besides; even; surely; though; furthermore; among; contrastingly; assuredly.”

---

- *bhadre* ← *bhadra*
- [noun], locative, singular, neuter
- “auspicious; lovely; good; happy; bhadra [word]; lucky; fine-looking; beautiful.”

---

- *saumanase* ← *saumanasa*
- [noun], locative, singular, neuter
- “favor; satisfaction.”

---

- *syāma* ← *as*
- [verb], plural, Present optative
- “be; exist; become; originate; happen; result; be; dwell; be born; stay; be; equal; exist; transform.”

---

▼ ***रङ्गनाथः***

अङ्गिरसः- अङ्गनशीलाः। नः- अस्माकम्। पितरः- पूर्वपुरुषाः पूर्वाचार्या मार्गदर्शकाः। नवग्वाः- अद्याप्ययातयामगतयः। अथवा स्तुतिभूतमन्त्रमयगतयः। नु स्तुतौ। अथर्वाणः- चित्तवृत्तिनिरोधकाः। थर्वतिश्चरतिकर्मा तत्प्रतिषेध इति यास्कः। भृगवः- तेजस्विनः। सोम्यासः-

रसिकाः प्रसन्ना वा। वयम्। तेषाम्। यज्ञियानाम्- पूजार्हाणाम्। सुमतौ। भद्रे- कल्याणे। सौमनसे- शोभनचित्तप्रदे संप्रदाये। स्याम- भवाम॥६॥

▼ *सायण-भाष्यम्*

**अङ्गिरसः** अङ्गिरोनामकाः **अथर्वाणः** अथर्वनामकाः **भृगवः** भृगुनामकाश्च **नः** अस्माकं **पितरः** **नवग्वाः** अभिनवगमनयुक्ताः । सदा नूतनवत्प्रीतिजनका इत्यर्थः। ते च **सोम्यासः** । सोममर्हन्तीति सोम्याः । **यज्ञियानां** यज्ञार्हाणां **तेषां सुमतौ** अनुग्रहयुक्तायां बुद्धौ **वयं स्याम** सर्वदा तिष्ठेम । **अपि** च **सौमनसे भद्रे** सौमनसस्य कारणे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥

▼ *भट्टभास्कर-टीका*

17अङ्गिर इति ॥ अङ्गिरसः पितृविशेषाः अस्माकं च पितरः **नवग्वाः** अभिनवागमनाः आगमने अभिनवा इव प्रियाः । क्विपि 'ऊङ् च गमादीनाम्' इत्यूकारः । आगमनमायातु उपसर्गयोस्स्वस्थानविनिमयः वा बहुव्रीहौ ।
नवग्वा अथर्वाणश्च भृगवश्च पितृविशेषाः प्रशस्ताः **सोम्यासः** सोमार्हाः येऽप्येवंविधा महानुभावाः पितरस्तेषां **यज्ञियानां** यज्ञार्हाणां **सुमतौ** शोभनायां मतौ सानुग्रहायां वयं स्याम भूयास्म ।
अपि च, **भद्रे** भजनीये कल्याणे **सौमनसे** सौमनस्यहेतुके तत्प्रदानहेतुके सर्वाभिमतसिद्धिरूपे कल्याणे च स्यामेति । येऽत्र अविनियुक्ता मन्त्राः ते लिङ्गेन क्वाप्यनुरूपे कर्मणि विनियोक्तव्याः ॥

▼ *मानसतरङ्गिणीकृत्*

The a~Ngirasas, the atharvANs, the bhR^igus, are our ancestors who performed the soma pouring, nine month rite;
may we be favored as these venerable ones and be auspiciously protected.

▼ *Wilson*

---

## English translation:

“The **Aṅgirasas**, the **Atharvas**, the **Bhṛgus**, who are entitled to the **Soma**, are our recent progenitors;may we ever have a plural ce in the favour of these venerable (pitṛs); may we be ever held in their auspiciousregard.”

---

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

Our recent progenitors: navagvā = having recently arrived, or inspiring affliction, as something new;also applied to the three classes; or, navanīya, those condition is to be praised

▼ *Jamison Brereton*

The Aṅgirases, our forefathers, the Navagvas, the Atharvaṇas, the Bhr̥gus deserving of soma—
may we be in the favor of these who are deserving of the sacrifice; may we be also in their propitious benevolence.

▼ *Griffith*

Our Fathers are Angirases, Navagvas, Atharvans, Bhrgus who deserve the Soma.
May these, the Holy, look on us with favour, may we enjoy their gracious loving-kindness.

▼ *Macdonell*

The Aṅgiras, our fathers, the Navagvas, The Bhṛgus and Atharvans, Soma-loving: May we abide for ever in the favour And the good graces of those holy sages.

▼ *Geldner*

Unsere Väter, die Angiras, die Navagva´s, die Atharvan´s, Bhrigu´s, die Somawürdigen - in der Gunst dieser Opferwürdigen und in ihrem glückbringenden Wohlwollen möchten wir sein.

▼ *Grassmann*

Die Angiras, die Neuner, und die Väter, die Feuerpriester und die frommen Bhrigu's, Sie mögen fest in ihrer Huld uns halten, die heiligen im Segen ihrer Liebe.

▼ *Elizarenkova*

Ангирасы – наши отцы, Навагва,
Атхарваны, Бхригу, достойные Сомы,
Да будем мы в милости у них, достойных жертвы,
И в добром (их) расположении!

▼ ***अधिमन्त्रम् (VC)***

- लिङ्गोक्ताः
- यमः
- विराट्त्रिष्टुप्
- धैवतः

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (अङ्गिरसः पितरः-नवग्वाः-अथर्वाणः) ग्रीष्म ऋतु सम्बन्धी सूर्यरश्मियाँ वर्षाऋतु सम्बन्धी सूर्यकिरणों, शरदृतु संबन्धी भानुरश्मियाँ, हेमन्तऋतु संबन्धी दिवाकर किरणें, शिशिरऋतु संबन्धी सूर्यरश्मियाँ, वसन्तऋतु संबन्धी आदित्यकिरणें, हमारे जीवन के लिये हैं (तेषां यज्ञियानां सुमतौ भद्रे-अपि सौमनसे वयं स्याम) उन यज्ञयोग्य सूर्यकिरणों के विचारणीय विज्ञानव्यवहार में हम कल्याण मन से सुखयुक्त होकर रहें ॥६॥ प्रत्येक ऋतु को स्वानुकुल और सुखमय बनाने के लिए पुष्कल ऋतुयोग करने चाहियें ॥६॥

▼ ***ब्रह्ममुनि - पदार्थः***

पदार्थान्वयभाषाः - (अङ्गिरसः पितरः नवग्वाः-अथर्वाणः-भृगवः सोम्यास-नः) अङ्गिरसः-ग्रीष्मर्तुसम्बन्धिसूर्यरश्मयः, पितरः वर्षर्तुसम्बन्धिरविकिरणाः, नवग्वः-शरदृतुसम्बन्धिभानुरश्मयः, अथर्वाणः-हेमन्तर्तुसम्बन्धिरवि-किरणाः, भृगवः शिशिरर्तुसम्बन्धिसूर्यरश्मयः, सोम्यासः-वसन्तर्तु- सम्बन्धिसूर्यकिरणाः, नः-अस्मभ्यं जीवनाय सन्ति। पूर्वस्मिन्मन्त्रे ‘विवस्वन्तं हुवे’ इति वचनात् तेन विवस्वता साकमृतवस्तत्सहिताः सूर्यरश्मयश्चापि युज्यन्त इति दर्शयितुमङ्गिरःप्रभृतीनां वचनम्। अन्यत्रापि-“आयातु मित्र ऋतुभिः कल्पमानः संवेशयन् पृथिवीमुस्रियाभिः” [अथ०३।८।१] सूर्यः, ऋतुभिरुस्रियाभिश्च सह आयातीति सिद्धान्तः। अत्र तु ते रश्मय ऋतुसहचरिता वर्णिताः सन्ति। एवंवच्च विज्ञानम्। “वीळु चिद् दृढा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण। चक्रुर्दिवो बृहती गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः” [ऋ०१।१।२] अन्नापि दर्शितं यदङ्गिरसो ग्रीष्मर्तुसम्बन्धिनः सूर्यरश्मयोऽद्रिं मेघं चक्रुः कृतवन्तस्तमेवाद्रिं मेघं पितरो वर्षर्तुसम्बन्धिरविकिरणा रुजन् भङ्गयन्ति नीचैर्निपातयन्ति पुनश्चोस्रा विविधगुणवासयितारः शारदाः सूर्यकिरणा आदित्यं दिनं पृथिवीं प्राप्नुवन्ति, एवमृतुसाम्यं दर्शितम्। ऋतुत्रयत्वमपि भवति यथा चरके-“विकृतास्त्वेनं महता विपर्ययेणोपपादयन्ति, ऋतवस्त्रय इव” [चरके १२।१३] तथा कृत्वैवात्र पितर इति

शब्दो न विशेषणरूपेणापित्वङ्गिरआदिवद्देवतारूपेण स्वतन्त्र एव। सायणेन ‘पितरो नवग्वाः सोम्यासः’ त्रयोऽप्यङ्गिरआदीनां विशेषणवाचकाः सन्तीति व्याख्यातं परन्तु सूक्तभाष्यावतरणे “अङ्गिरसो नः पितरो नवग्वा इति षष्ठ्या अङ्गिरःपित्रथर्वभृगुलक्षणा लिङ्गोक्ता देवताः” एवमत्र तु सायणेन ‘पितरः’ इति शब्दस्य देवतात्वं प्रतिपादितम्। अस्तु, निरुक्तेऽप्यस्मद्वत् पितर इत्यस्य स्वतन्त्रं देवतात्वमेव प्रतिपादितमङ्गिरआदीनामर्थाश्च यथा–“पिता पाता वा पालयिता वा......पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः” [निरु०४।२१] इति लक्ष्यीकृत्योक्तमत्र “पितरो व्याख्याताः। अङ्गारेष्वङ्गिराः अर्चिषि भृगुः संबभूव” इति कृत्वैवोक्तं यास्केन। “अङ्गिरसो व्याख्याताः, भृगवो व्याख्याताः, अथर्वाणोऽथर्वन्तः, थर्वतिश्चरतिकर्मा तत्प्रतिषेधः। तेषामेषा साधारणा भवति-‘अङ्गिरसो नः पितरो.........।’ अङ्गिरसो नः पितरो नवगतयो नवनीतगतयो वाथर्वाणो भृगवः सोम्याः सोमसम्पादिनः” [निरु०११।१९] “रसः सोमः” [श०७।३।१।३] सोम्यासः सोमसम्पादिनो रससम्पादिनो वसन्तर्तुसम्बन्धिसूर्यरश्मय इत्यर्थः। एवं नात्राङ्गिरआदयो मृतपितरोऽपि तु सन्ति देवा ऋतुयुक्तसूर्यरश्मयः। उक्तं च निरुक्ते ‘पितर’ इत्याख्यानम्। “माध्यमिको देवगण इति नैरुक्ताः” [निरु०११।९९] रश्मयो देवाः-“उदिता देवाः सूर्यस्य” (तेषां यज्ञियानां सुमतौ भद्रे-अपि सौमनसे वयं स्याम ) “तेषां यज्ञियानां सुमतौ कल्याण्यां मतौ भद्रे भन्दनीये भाजनवति वा कल्याणे मनसि स्याम” [निरु०११।१९] तेषां पूर्वोक्तानां यज्ञार्हाणां सुमन्तव्ये व्यवहारे भाजनवति कल्याणे मनसि सुखयुक्ते प्रसन्नभावे वर्तेमहि ॥६॥

# १२. सोमभक्ष-मन्त्राः②

सोमभक्षमन्त्राः (तै. सं. ३-२-५)

▼ *मूल-प्रस्तुतिः*

आ॒पूर्या॑स् स्थ,
+आ मा॑ पूरयत प्र॒जया॑ च॒ धने॑न च ।

▼ *मूल-प्रस्तुतिः*

ए॒तत् ते॑ तत॒ ये च॒ त्वाम् अनु॑।
[ए॒तत् ते॑] पितामह [ये च॒ त्वाम् अनु॑]।
[ए॒तत् ते॑] प्रपितामह॒ [ये च॒ त्वाम् अनु॑]।
अत्र॑ पितरो यथाभा॒गम्म॑न्दध्वम् ।

▼ *Keith*

This for thee, O father, and for thy line;
This for thee, O grandfather, great-grandfather, and for thy line

▼ *भट्टभास्कर-टीका*

एनदन्नं ते तव भवतु हे तत तात ।
ये च त्वामनुगता आश्रिताः अन्ये, तेषाञ्चैतदन्नं भवतु । एतत्ते अन्नं हे पितामह, ये च त्वामनुगताः तेषां च । पितुः पिता पितामहः । एवमेतत्ते अन्नं हे प्रपितामह, ये चान्ये त्वामनुगताः, तेषाञ्च । पितामहस्य पिता प्रपितामहः ।

---

हे तत तात एतदशनं तव ये चान्ये त्वामनुगताः । एतत्ते पितामह, ये च त्वामनुगताः । एतत्ते प्रपितामह, ये च त्वामनुगताः ।

▼ *मूल-प्रस्तुतिः*

अत्र॑ पितरो यथाभा॒गम् म॑न्दध्वम् ।

▼ *Keith*

Do ye Pitrs rejoice in your portions.

---

Rejoice therein, O fathers, according to your shares.

▼ *भट्टभास्कर-टीका*

अधुना सर्वेपि सामान्येनोच्यन्ते । अत्र अस्मिन् कर्मणि हे पितरः पातारः पितृप्रभृतयो वा पितृपितामहप्रपितामहाः यथाभागं योयो यस्य भागः तेनतेन । 'यथाऽसादृश्ये' इत्यव्ययीभावः । यूयं मन्दध्वं मोदध्वम् । मदि स्तुतिमोदमदस्वप्नगतिषु ॥

▼ *भास्करोक्त-विनियोगः*

18षड्भिर्नमस्कारैरुपतिष्ठते - नमो व इति ॥

▼ *मूल-प्रस्तुतिः*

नमो॑ व३ पितरो॒ रसा॑य । [पित॑रो॒ नमो॑ वः।],

▼ *Keith*

Homage to your taste, O fathers;

▼ *भट्टभास्कर-टीका*

हे पितरः युष्मभ्यं नमः नमस्करोमि रसाय रसार्थं रसवान् भूयासमिति । 'पितरो नमो वः' इत्यादिकं षट्स्वप्यजुषज्यते ।

▼ *मूल-प्रस्तुतिः*

नमो॑ व॒ पितर॒श् शुष्मा॑य *(पित॑रो॒ नमो॑ वः )*,,

▼ *Keith*

homage to your birth, O fathers;

▼ *भट्टभास्कर-टीका*

शुष्मो बलम् ।

▼ *मूल-प्रस्तुतिः*

नमो॑ व॒ पितरो जी॒वाय । [पित॑रो॒ नमो॑ वः।],

▼ *Keith*

homage to your life, O fathers;

▼ *भट्टभास्कर-टीका*

जीवः प्राणः ।

▼ *मूल-प्रस्तुतिः*

नमो॑ व॒ पि॒त॒र॒स् स्व॒धायै॑ । [पित॑रो॒ नमो॑ वः।],,

▼ *Keith*

homage to your [5] custom, O fathers;

▼ *भट्टभास्कर-टीका*

स्वधा अन्नम् ।

▼ *मूल-प्रस्तुतिः*

नमो॑ व॒ पितरो म॒न्यवे॑ । [पित॑रो॒ नमो॑ वः।],,

▼ *Keith*

homage to your anger, O fathers;

▼ *भट्टभास्कर-टीका*

मन्युर्दीप्तिः, क्रोधो वा ।

▼ *मूल-प्रस्तुतिः*

नमो॑ व॒ पितरो घो॒राय॑ ,
पित॑रो॒ नमो॑ वः ।

▼ *Keith*

homage to your terrors, O fathers; O fathers, homage to you.

▼ *भट्टभास्कर-टीका*

घोरः क्रूरम् । एतयोः स्थाने प्राधान्यं प्रार्थ्यते । हे पितरः युष्मभ्यं नमः । फलमनपेक्ष्य सप्तमोयं नमस्कारः क्रियते । पुनर्वचनं फलनिरपेक्षया नमस्कारार्थम् । अन्य आहुः - पितृसंबन्धिभ्यो रसादिभ्यः प्रथमं षण्णमस्काराः, ततः पितृभ्य एव सप्तम इति ।

▼ *मूल-प्रस्तुतिः*

य ए॒तस्मि॑ल्ँ लो॒के स्थ यु॒ष्माँस्तेऽनु॑ ।

▼ *Keith*

Ye that are in that world, may they follow you;

▼ *भट्टभास्कर-टीका*

ये एतस्मिन् लोके पितरः स्थ । एतस्मिन्निति पितृलोकं व्यपदिशति । स्थेति सर्वपित्रभिप्रायेणोक्तम् । ते सर्वे युष्माननुसन्तु युष्मत्प्रधाना भवन्तु । 'हीने' इत्यनोः कर्मप्रवचनीयत्वम् । युष्मानिति पित्रादित्रयं व्यपदिशति ।

▼ *मूल-प्रस्तुतिः*

ये॑ऽस्मिल्ँ लो॒के मान् तेऽनु॑ ।

▼ *Keith*

ye that are in this world, may they follow me.

▼ *भट्टभास्कर-टीका*

अस्मिन् मनुष्यलोके मनुष्याः स्थ, ते सर्वे मामनु सन्तु मत्प्रधाना भवन्तु ।

▼ *मूल-प्रस्तुतिः*

य ए॒तस्मि॑ल्ँ लो॒के स्थ यू॒यन् तेषा॑व्ँ॒ वसि॑ष्ठा भूयास्त ।

▼ *Keith*

Ye that are in that world, of them be ye the most fortunate;

▼ *भट्टभास्कर-टीका*

ये यूयमेतस्मिन् लोके स्थ तेषां पितॄणां यूयं वसिष्ठाः वसुमत्तमा भूयास्त ।

▼ *मूल-प्रस्तुतिः*

ये॑ऽस्मिल्ँ लो॒के॑ ऽहन् तेषा॑व्ँ॒वसि॑ष्ठो भूयासम् ।

▼ *Keith*

ye that are in this world, of these may I be the most fortunate.

▼ *भट्टभास्कर-टीका*

येऽस्मिन् लोके सन्ति मनुष्यास्तेषां मनुष्याणामहं वसिष्ठो वसुमत्तमो भूयासम् । वसुशब्दादिष्ठनि 'विन्मतोर्लुक्' इति लुक्, 'टेः' इति टिलोपः ॥

प्र॑जापते न॑ त्व॑द् *(विश्वा जातानि→)* एता॑न्य् अन्यो॑
वि॑श्वा जाता॑नि **प॑रि** ता॑ **बभूव** ।
य॑त्-कामास् ते जुहम॑स् त॑न् नो **अस्तु**
वयँ॑ **स्याम** प॑तयो रयीणा॑म्॥

▼ *भास्करोक्त-विनियोगः*

20-22शकलैश् चरन्ति - देवकृतस्येति ॥

▼ *मूल-प्रस्तुतिः*

दे॒वकृ॑त॒स्यैन॑सो **ऽव॒यज॑नम् असि** ।
म॒नु॒ष्य॑कृतस्यैन॑सोऽव॒यज॑नमसि ।
पि॒तृकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि ।

▼ *Keith*

Thou art the expiation of sin committed by the gods, thou art the expiation of sin committed by men, thou art the expiation of sin committed by the fathers.

▼ *भट्टभास्कर-टीका*

देवादिविषये यदस्माभिः कृतमेनः अधर्मः तस्यावयजनं नाशनं असि । 'क्षेपे' इति सप्तम्यास्समासः, सप्तमीपूर्वपदप्रकृतिस्वरत्वम् । यद्वा - देवादिभिरस्मद्विषये, यत्कृतमेनःफलं दुखं तस्यावयजनमसि । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्ववम् । एतेनोभे व्याख्याते ॥

▼ *भास्करोक्त-विनियोगः*

23अथावभृथभक्षमन्त्रः - अप्सु धौतस्येत्यादि ॥

▼ *मूल-प्रस्तुतिः*

अ॒प्सु **धौ॒तस्य॑** सोम देव ते॒
नृभि॑स् **सु॒तस्य॑**+
**इ॒ष्ट**-य॑जुषस् **स्तु॒त**-स्तो॑मस्य श॒स्तोक्थ॑स्य॒
यो भ॒क्षो अ॑श्व॒-सनि॒र् यो गो॒-सनि॒स्
तस्य॑ ते पि॒तृभि॑र् **भ॒क्षङ् कृ॑त॒स्योप॑हूत॒स्योप॑हूतो भक्षयामि** ॥

▼ *Keith*

Of thee, O god Soma, that art purified in the waters, that art pressed by men, over whom the Yajus is spoken, the Stoma sung, the Śastra recited, who art made by the fathers into food to win horses and cows, and who art invited, I invited eat.

▼ *भट्टभास्कर-टीका*

अप्सु धौतस्य प्रक्षालितस्य नृभिः मनुष्यैः चेतनैः अभिषुतस्य ।

इष्टयजुष इत्यादि । व्याख्यातम् ।
(**इष्टयजुषः** अध्वर्युभिर्यज्ञे इष्टानि विनियुक्तानि सर्वाणि यजूंषि प्रायोगत्वत्संस्कारार्थानीति इष्टयजुष्ट्वम् ।
**स्तुतस्तोमस्य** उद्गातृभिश्च स्तुतास्सोमाः स्तोत्राणि त्वदर्थमिति स्तुतस्तोमत्वम् ।
**शस्तोक्थस्य** होतृभिश्शस्तान्युक्थानि शस्त्राणि त्वदर्थमिति शस्तोक्थत्वम् ।)

हे सोम देव तवेदृशस्य यो भक्षः भक्षणं अश्वसनिः अश्वानां संभक्ता । यो गोसनिः गवां संभक्ता । 'छन्दसि वनसन' इतीन्प्रत्ययः । तस्य ते तव पितृभिः भक्षंकृतस्य । 'च्वौ' इतीत्वापवादः पूर्वपदस्य छान्दसो मुमागमः, 'ऊर्यादिच्विडाचश्च' इति गतित्वात् 'गतिरन्तरः' इति तस्य प्रकृतिस्वरत्वम् ।

उपहूतस्येत्यादि । गतम् ॥ (**उपहूतस्य** इन्द्रादिभिरनुज्ञातस्य ईदृशस्य तव अहं **उपहूतः** देवैस्सहभक्षिभिरनुज्ञातः **भक्षयामि** । )

इति तृतीये द्वितीये पञ्चमोनुवाकः ॥

[[149]]

# १३. एकविंशतिरात्रः②

१३. एकविंशतिरात्रः (तै. सं. ७-३-१०)

## परिचयः⑥

- अतिरात्रः
- पृष्ठ्यष्षडहः
- परस्-सामानस् त्रयः
- विषूवान् दिवाकीर्त्यम्
- आवृत्ताः परस्-सामानः प्रतीचीनास् त्रयः
- पृष्ठ्यष् षडहः
- अतिरात्रः

## फलम्⑥

▼ *मूल-प्रस्तुतिः*

अ॒साव् आ॑दि॒त्यो॑ ऽस्मिल्ँ लो॒क आ॑सीत् ।
तन् दे॒वाः॑ पृ॒ष्ठैः॑ *(षड्भिरहोभिः)* प॑रि॒गृह्य॑ सुव॒र्गल्ँ लो॒कम् अ॑गमयन् ।
परैर्॑ *(त्रिभिरहोभिः)* अ॒वस्ता॒त् *(=पृष्ठतः)* पर्य॑गृह्णन्।
दिवाकी॒र्त्ये॑न *(विषुव-प्रातर्-गीयमानेन साम्ना)* सुव॒र्गे लो॒के प्रत्य॑स्थापय॒न् ।
परैः॑ *(त्रिभिरहोभिः)* प॒रस्ता॒त् पर्य॑गृह्णन् *(अवतरणात् प्राक्)*।
पृ॒ष्ठैर् *(षड्भिरहोभिः)* उ॒पावा॑रोहन् ।
स वा अ॒साव् आ॑दि॒त्यो॑ ऽमुष्मिल्ँ लो॒के परैर्॑ उभ॒यत॒ः॑ परि॑गृहीतः ।

▼ ***मूल-प्रस्तुतिः***

यत् पृ॒ष्ठानि॒ *(षडहगतानि)* भव॑न्ति , सु॒व॒र्गम् ए॒व तैर् लो॒कयँ॒ यज॑माना यन्ति ।
परैर्॑ *(त्रिभिरहोभिः)* अ॒वस्ता॒त् परि॑ गृह्णन्ति *(आरोहणात् प्राक्)*। दि॒वा॒की॒र्त्ये॑न *(विषुव-प्रातर्-गीयमानेन साम्ना)* सु॒व॒र्गे लो॒के प्रति॑ तिष्ठन्ति । [25]
परैः॑ *(त्रिभिरहोभिः)* प॒रस्ता॒त् परि॑गृह्णन्ति *(अवतरणात् प्राक्)*।
पृ॒ष्ठैर् *(षड्भिरहोभिः)* उ॒पाव॑रोहन्ति ।

▼ ***मूल-प्रस्तुतिः***

यत् परे॑ *(त्रीण्य् अहानि +उत्तरार्धे)* प॒रस्ता॒न् न स्युः॑, परा॑ञ्चस् *(उपरि)* सु॒व॒र्गाल् लो॒कान् निष्प॑द्येर॒न् *(अतिवर्तित्वात्)*।
यद् *(त्रीण्य् अहानि +पूर्वार्धे)* अ॒वस्ता॒न् न स्युः॑, प्र॒जा *(पृथिवीस्थानं च)* निर् द॑हेयुः *(अतिवर्तित्वात्)*।

▼ ***मूल-प्रस्तुतिः***

अ॒भितो॑ दिवाकी॒र्त्य॑म् *(त्र्यहोभ्यां)* पर॑स्-सामानो भवन्ति ।
*(स्वर्गस्थितान् आदित्यादिदेवान्)* सु॒व॒र्ग ए॒वैनाल्ँ लो॒क उ॑भ॒यत॒ः॑ परि॑ गृह्णन्ति *(आरोहणावरोहण-कालयोः)*।

▼ ***मूल-प्रस्तुतिः***

यज॑माना॒ वै दि॑वाकी॒र्त्य॑म् *(→विषुवन्तम्)* । *(विषुवस्थानयोर् मध्ये वर्तमावाभ्यां खचक्रार्धाभ्यां युक्तः)* सव॒ँव॒त्स॒रः॑ पर॑स्सामानः ।
अ॒भितो॑ दिवाकी॒र्त्य॑म् पर॑स्सामानो भवन्ति ।
सव॒ँव॒त्स॒र ए॒वोभ॒यत॒ः॑ प्रति॑ तिष्ठन्ति ।[26]

▼ ***मूल-प्रस्तुतिः***

पृ॒ष्ठव्ँ॑ वै दि॑वाकी॒र्त्य॑म् *(साम)*, पा॒र्श्वे पर॑स्सामानः ।
अ॒भितो॑ दिवाकी॒र्त्य॑म् पर॑स्सामानो भवन्ति ।
तस्मा॑द् अ॒भित॒ः॑ पृ॒ष्ठम् पा॒र्श्वे *(प्रजानाम्)*।

## ग्रहविचारः⑥

▼ *मूल-प्रस्तुतिः*

भूयिंष्ठा ग्रहा गृह्यन्ते । भूयिंष्ठँ शस्यते ।
यज्ञस्यैव तन् मंध्यतो ग्रन्थङ् ग्रंथ्नन्त्य् अविंस्रँसाय ।

▼ *मूल-प्रस्तुतिः*

*(त्रिषु परस्सामसु त्रीन् अतिग्राह्यान् गृह्णाति 'उपयामगृहीतोस्यद्भ्यस्त्वौषधीम्यः' इत्यादिभिः त्रिभिः, तान् ऊर्ध्वान् आवृत्तांश् च विषूवति । तेषां मध्ये सूर्यमुदुत्यं जातवेदसमिति ।)*
*(ततः -)* सप्त गृंह्यन्ते ।
सप्त वै शीर्षण्याः प्राणाः*(=रन्ध्राणि)* ।
प्राणान् एव यजंमानेषु दधति ।

▼ *मूल-प्रस्तुतिः*

यत् परांचीनांनि पृष्ठानि भवंन्ति , अमुम् एव तैर् लोकम् अभ्यारोंहन्ति ।
यद् इमलँ् लोकन् न प्रत्यवरोहेंयुर्, उद् वा माद्येंयुर्, यजंमाना॰ प्र वा मीयेरन् ।

▼ *मूल-प्रस्तुतिः*

यत् प्रतीचीनांनि पृष्ठानि भवंन्ति-
इमम् एव तैर् लोकम् प्रत्यवंरोहन्ति ।
अथों अस्मिन्न् एव लोके प्रतिं तिष्ठन्त्य् अनुंन्मादाय ।

## फलम्⑥

▼ *मूल-प्रस्तुतिः*

इन्द्रो वा अप्रंतिष्ठित आसीत् ।
स प्रजापंतिम् उपांधावत् ।
तस्मा एतम् एंकविंँशति-रात्रम् प्रायंच्छत् ।
तम् आहंरत् । तेनांयजत ।
ततो वै स प्रत्यंतिष्ठत् ।

▼ *मूल-प्रस्तुतिः*

ये बंहुया॒जिनो ऽप्रंतिष्ठितास् स्युस्, [28] त एंकविँशतिरा॒त्रम् आंसीरन् ।
द्वादंश॒ मासा॒ऽ, पञ्च॒र्तव॒स्, त्रयं इ॒मे लो॒का, अ॒साव् आंदि॒त्य एंकवि॒ँशः ।
ए॒तावंन्तो॒ वै देंवलो॒काः ।
तेष्वे॒व यंथापू॒र्वम् प्रतिं तिष्ठन्ति ।

▼ *मूल-प्रस्तुतिः*

अ॒साव् आंदि॒त्यो न व्यंरोचत ।
स प्र॒जापंति॒म् उपांधावत्।
तस्मां ए॒तम् एंकविँशतिरा॒त्रम् प्रायंच्छत ।
तम् आहंरत । तेनांयजत ।
ततो॒ वै सोंऽरोचत ।
य ए॒ववँ वि॒द्वाँस एकविँशतिरा॒त्रम् आसंते॒ , रोचंन्त ए॒व ।

▼ *मूल-प्रस्तुतिः*

ए॒क॒वि॒ँश॒ति॒रा॒त्रो भंवति । रुग् वा एंक-वि॒ँशः । रुचंम् ए॒व गंच्छ॒न्त्य् अथों प्रति॒ष्ठाम् ए॒व । प्रंति॒ष्ठा ह्य् एंकवि॒ँशः ।

▼ *मूल-प्रस्तुतिः*

अ॒ति॒रा॒त्राव॒भितों भवतो, ब्रह्मवर्च॒सस्य॒ परिंगृहीत्यै ॥ [29]

# १४. संवत्सरसत्र-मन्त्राः②

१४. संवत्सर सत्र मन्त्राः (तै. ब्रा. १-२-३)

### ग्रहप्रामुख्यम्⑥

▼ *मूल-प्रस्तुतिः*

*(संवत्सर-पक्षयोस्)* सन्तंति॒र् वा ए॒ते *(विषूवति गृह्यमाणा)* ग्रहा॒
यत् परंस्-सामानः ।
*(कुत इति चेत् -)* वि॒षूवान् *(=पक्षद्वयवान्)* दिंवा-की॒र्त्यंम् *(दिनम्)*।

▼ *भट्टभास्कर-टीका*

1 सन्ततिर्वा इत्यादि ॥
**सन्ततिः** सन्तननम् । तादर्थ्यात्ताच्छब्द्यम् ।
पूर्वोत्तरयोः पक्षयोर् विषुवति सन्तानार्था **एते ग्रहाः ये परस्सामानः**,
तात्स्थ्यात् ताच्छब्द्यं 'मञ्चाः क्रोशन्ति'इतिवत् ।
**परस्** सामदिवसेषु गृह्यमाणा अतिग्राह्याः **ग्रहाः** ते सन्तननार्थाः सन्ततरज्जुस्थानीया इति ।
ग्रह-रूपत्वात् **दिवाकीर्त्यं** यद् अहः
**तत् विषूवान्** -
**विष्वङ्** नाना पक्ष-द्वयावलम्बिनी स्थितिर् अस्येति **विषुवान्**
वंश-काष्ठ-स्थानीयो दिवसो मध्यमः, एतेन सन्तत्य्-अपेक्षा दर्शिता ।

▼ *मूल-प्रस्तुतिः*

यथा॒ शाला॑यै॒ पक्षा॑स्य्,
ए॒वँ स॑वँ॒वत्स॒रस्य॒ पक्षा॑सी ।

▼ *भट्टभास्कर-टीका*

इदानीं तामेव सन्ततिं दर्शयितुं सन्तन्यमानं दर्शयति - यथेति । शालायाः पक्षाविव पक्षस्थानीयौ संवत्सरस्य पक्षौ ।

▼ *मूल-प्रस्तुतिः*

यद् ए॒ते न गृ॒ह्ये॒र॒न्न्
विषू॑ची*(=विष्वग्-गमने)* स॑वँ॒वत्स॒रस्य॒ पक्षा॑सी॒ व्य्-अव॑स्रँसेयाताम् ।

▼ *भट्टभास्कर-टीका*

तत्र यद्य् अतिग्राह्याः सन्तनन-रज्जु-स्थानीया न गृह्येरन्
ततो **विषूची** विष्वग्गमने संवत्सरस्य पक्षसी **व्यवस्रंसेयातां** भिन्नदिक्के पतिते स्याताम् ।

▼ *मूल-प्रस्तुतिः*

आर्ति॒म् आर्च्छे॑युः ।

▼ *भट्टभास्कर-टीका*

ततश्च आर्तिं गच्छेयुः यजमानाः कर्मनाशात् ।

▼ *मूल-प्रस्तुतिः*

यद् ए॒ते गृ॒ह्यन्ते॒ ,
यथा॒ शाला॑यै॒ पक्षसी मध्य॒मवँ॒ वँ॒शम् अ॒भि-सं॒मा॒यच्छ॑त्य्

ए॒वँ सव्ँ॒वत्स॒रस्य॒ पक्षं॑सी दिवा-की॒र्त्य॑म् अ॒भि-सन्तं॑न्वन्ति ।

▼ *भट्टभास्कर-टीका*

एषां तु ग्रहणे शालायाः पक्षौ मध्यमं वंशमभिसमायच्छति लौकिक इव । संवत्सरस्य पक्षसी दिवाकीर्त्यमभिसन्तन्वन्ति आभिमुख्येनानीय आबध्नन्ति वंश इव दिवाकीर्त्ये सत्रिणः ।

▼ *मूल-प्रस्तुतिः*

नार्ति॒म् आर्च्छं॑न्ति ।

▼ *भट्टभास्कर-टीका*

ततो नार्तिं गच्छन्ति ॥

## स्तोमाः⑥

▼ *मूल-प्रस्तुतिः*

*(स्तोमसङ्ख्यया)* ए॒क॒-विँ॒शम् अह॑र् भवति ।

▼ *भट्टभास्कर-टीका*

2 एतच्च अहर् एकविंशं एकविंशस्तोमकं भवति ।

## ग्रहा ऽतिग्राह्याश् च⑥

▼ *मूल-प्रस्तुतिः*

शु॒क्राग्रा॒ ग्रहा॑ गृह्यन्ते॒ - प्रत्य् उत्तं॑ब्ध्यै, सयु॒त्वाय॑*(←षिङ् बन्धने)* ।

▼ *भट्टभास्कर-टीका*

**प्रत्युत्तब्ध्यै** प्रत्युत्तम्भनाय वंशकाष्ठस्थानीयस्य उच्छ्रितावस्थानाय प्रतिष्ठात्वाद् एकविंशस्य । शुक्राग्रा ग्रहा गृह्यन्ते।

**सयत्वाय** संश्लिष्यमाणत्वाय स्थाने शुक्रप्राधान्यात् संजज्ञानेरबन्धता(??) यथा स्यादिति ।
उत्तानास्यः **सयः**; षिङ् बन्धने पचाद्यजन्तात् भावप्रत्ययः ।

## सौर्योऽतिग्राह्यः⑥

▼ *मूल-प्रस्तुतिः*

सौ॒र्यँ ए॒तद्-अह॑ऽ॒ प॒शुर् आल॑भ्यते ।
सौ॒र्यो॑ ऽति-ग्रा॒ह्यो॑ गृह्यते *(सप्तमः)* ।
अह॑र् ए॒व रू॒पेण॒ सम॑र्धयन्ति ।

▼ *भट्टभास्कर-टीका*

सौर्य इत्यादि । पश्वतिग्राह्ययोस्सौर्यत्वेन सूर्यसम्बन्धादह्नो रूपसमृद्धिर्भवति । दिवाकीर्त्यत्वं समृद्धं भवति । उभयत्रापि छन्दसमन्तस्वरितत्वम् ॥

▼ *मूल-प्रस्तुतिः*

अथो॒ अह्न॑ ए॒वैष ब॒लिर् ह्रि॑यते ।

▼ *भट्टभास्कर-टीका*

अथो अपिच एषोऽह्नो बलिर्ह्रियते पूजा क्रियते, योऽयं सप्तमः सौर्योऽतिग्राह्यः ॥

## सप्तत्वम्⑥

▼ *मूल-प्रस्तुतिः*

स॒प्त+ एतद्-अह॑र् अति-ग्रा॒ह्या॑ गृह्यन्ते ॥34॥

▼ *भट्टभास्कर-टीका*

3 अस्मिन् अह्नि सप्तातिग्राह्या गृह्यन्ते ये परस्सामसम्बन्धिनः त्रयः पूर्वे त्रय उत्तरे तेपां मध्ये सौर्य इति सप्तास्मिन्नह्नि गृह्यन्ते ।

▼ *मूल-प्रस्तुतिः*

*(चक्षुःश्रोत्र-नासिकास्य-सङ्ख्यया)* स॒प्त वै शी॑र्ष॒ण्या᳚ प्रा॒णाः ।
अ॒साव् आ॑दि॒त्यश् शिर॑᳚ प्र॒जाना॑म् ।

▼ ***भट्टभास्कर-टीका***

सप्त वा इत्यादि । द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके एकमास्यमिति ।*(5)*
आदित्यश् शिरस्-स्थानीयः प्रजानाम् उच्छ्रितत्वात्,
एकविंशश् च ज्योतिः तेषां स्तोमानाम् उच्छ्रितः ।

▼ ***मूल-प्रस्तुतिः***

शी॒र्षन्न्*(=शिरसि)* ए॒व प्र॒जाना॑म् प्रा॒णान् द॑धाति ।
तस्मा॑थ् *(सप्तातिग्राह्य-ग्रहणात्)* स॒प्त शी॒र्षन्*(=शिरसि)* प्रा॒णाः ।

▼ ***भट्टभास्कर-टीका***

तस्माद् एकविंशे दिवाकीर्त्ये सप्तातिग्राह्य-ग्रहणात्
**प्रजानां** शिरसि **सप्त प्राणान् दधाति** स्थापयति
अत एव शिरसि सप्त प्राणाः ॥

## उत्तर-पक्ष-ग्रहाः⑥

## विश्वकर्मणो ग्रहः⑥

▼ ***मूल-प्रस्तुतिः***

इन्द्रो॑ वृ॒त्रँ ह॒त्वाऽसु॑रान् परा॒भाव्य॒ स इ॒माल्ँ लो॒कान् अ॒भ्य॑जयत् ।

▼ ***भट्टभास्कर-टीका***

4 इन्द्रो वृत्रं हत्वेत्यादि ॥ गतम् । पराभाव्य पराभूतान् जितान् कृत्वा ।

▼ ***मूल-प्रस्तुतिः***

तस्या॒सौ लो॒को ऽन॑भिजित आसीत् ।
तवँ् वि॒श्वक॑र्मा भू॒त्वा ऽभ्य॑जयत् ।

▼ ***भट्टभास्कर-टीका***

असौ लोको द्युलोकः ।

▼ *मूल-प्रस्तुतिः*

यद् वैँश्वकर्म॒णो गृ॒ह्यतेँ सुव॒र्गस्यं लो॒कस्या॒भिजिंत्यै ।

▼ *भट्टभास्कर-टीका*

अस्मिन्नह्नि वैश्वकर्मणस्य ग्रहणं स्वर्गस्याभिजित्यै भवति ॥

## आदित्य-ग्रहः⑥

▼ *मूल-प्रस्तुतिः*

प्र वा ए॒तेँ ऽस्माल् लो॒काच् च्यंवन्ते॒ ये वैँश्वकर्म॒णङ् गृ॒ह्णतेँ ।
आ॒दि॒त्यश् श्वो गृंह्यते ।

▼ *मूल-प्रस्तुतिः*

इ॒यवँ् वा अदिंतिर् - अ॒स्याम् ए॒व प्रतिंतिष्ठन्ति ।

▼ *भट्टभास्कर-टीका*

5 प्रवा इत्यादि ॥ अस्माल्लोकात् भूलोकात् । उत्तरेद्युरदितिदेवत्यस्य ग्रहणात् पुनरस्यां प्रतिष्ठा भवति ।

## ग्रहणक्रमः⑥

▼ *मूल-प्रस्तुतिः*

अ॒न्योंऽन्यो *(=पृथक्)* गृह्येते ।
विश्वा॑न्य् ए॒वान्येन॒ कर्मा॑णि कुर्वा॒णा यंन्ति ।

▼ *भट्टभास्कर-टीका*

अन्योन्य इत्यादि । अन्यो वा कदाचिद्वैश्वकर्मणादित्यौ पृथक् गृह्येते न सह ।
तत्र अन्येन वैश्वकर्मणेन विश्वानि कर्माणि स्वर्गाद्यभिजयसाधनानि कुर्वाणा यन्ति कर्मसमाप्तिं गच्छन्ति ।

▼ *मूल-प्रस्तुतिः*

*(आदित्यग्रहेण)* अ॒स्याम् अ॒न्येन॒ प्रतिं-तिष्ठन्ति ।

▼ *भट्टभास्कर-टीका*

अन्येन आदित्येन अस्यां प्रतितिष्ठन्ति । 'क्रियासमभिहारे सर्वनाम्नो द्वे भवतस्समासवच्च बहुलम्'इति द्विर्वचनं समासश्च । 'अनुदत्तं च'इति द्वितीयं निहन्यते ॥

▼ *मूल-प्रस्तुतिः*

ताव् आऽपंरा॒र्धात् सवँ॑वत्स॒रस्य *(प्रत्यहं)*
+अ॒न्योंन्यो गृह्येते ।
ताव् उ॒भौ स॒ह मंहा-व्र॒ते गृंह्येते ।

▼ *भट्टभास्कर-टीका*

6 ताविरयादि ॥ **तौ** वैश्वकर्मणादित्यौ संवत्सरस्य आपरार्धात्
आ अपरपक्षसमाप्तेः प्रत्यहं अन्योन्यः एकैको गृह्यते । अथ महाव्रते उपांत्येऽह्नि तौ सह गृह्येते ।

▼ *मूल-प्रस्तुतिः*

य॒ज्ञस्य+ ए॒वान्तंङ् गत्वो॒भयोंर् लो॒कयो॒ꣳ प्रतिं-तिष्ठन्ति ।

▼ *भट्टभास्कर-टीका*

अन्तं गत्वेति । समाप्तप्रायत्वात् । उभयोरिति । उत्तरयोर्वैश्वकर्मणादित्ययोः सहग्रहणात् ।

## उक्थ्यम्⑥

▼ *मूल-प्रस्तुतिः*

अ॒र्क्यम् उ॒क्थम् भंवत्य्
अ॒न्नाद्य॒स्याव॑रुध्यै *('अर्को वै देवानाम् अन्नम्' इति हेतुना)*॥ 36॥

▼ *भट्टभास्कर-टीका*

अर्क्यम् इति शस्त्रविशेषः ।
अन्नाद्यस्येति ।
'अर्को वै देवानाम् अन्नम्' इति तद्धेतुत्वाच्च ॥

इति द्वितीये तृतीयोऽनुवाकः ॥

# काठके (नाचिकेताग्नि-ध्यानम्)②

काठके (नाचिकेतानि ध्यानम्) (२ - ७, ८, ९)

▼ *मूल-प्रस्तुतिः*

अ॒यवँ॒ वाव यः पव॑ते *(वायुः)*,
सों॑ऽग्निर्ना॑चिके॒तः ।

स यत् प्राङ् पव॑ते,
तद् अ॑स्य॒ शिरः॑ ।

अथ॒ यद् द॑क्षि॒णा,
स दक्षि॑णः प॒क्षः ।

अथ॒ यत्प्र॒त्यक्, तत्पुच्छ॑म् ।

यद् उदङ्ङ्, स उत्त॑रः प॒क्षः ॥ 37 ॥

▼ *भट्टभास्कर-टीका*

1 अथ नाचिकेतं ब्राह्मणं त्रयोऽनुवाकाः - अयं वावेत्यादि ॥
वायुत्वेन नाचिकेतस् स्तूयते ।
**योऽयं पवते** पवमानो वायुर् विश्वस्य पावयिता शोधयिता
स एव नाचिकेतोऽग्निः विश्वस्थितिहेतुत्वात् ।
तस्य **प्राक्**-पवनादीनि शिरः-प्रभृतिस्थानीयानि ।

▼ *मूल-प्रस्तुतिः*

अथ॒ यत् सवँ॒ वाति॑,
तद् अ॑स्य *(कल्पित-शरीरस्य)* स॒मञ्च॑नञ्*(→सङ्कोचः)* च प्र॒सार॑णञ् च ।
अथो॑ स॒म्पद् ए॒वास्य॒ सा ।

▼ *भट्टभास्कर-टीका*

**संवानं** संगतं वानं, समं वानं वा दिगन्तरविशिष्टं,
तदस्याग्नेश् शरीरस्य **समञ्चनं** संकोचः **प्रसारणं** विस्तारश्च ।
शरीरगता या चेष्टा अवयव-संकोच-विस्तारात्मिका
तत्स्थानीयं संवानमिति । अपिचास्याग्नि-शरीरस्य **सा संपत्** वृद्धिः जीवनवत्त्वं यदन्तर्वानं,
यद्वा - अस्य अग्नेः **सा संपत्** माहात्म्यं यत्पवमानवत् सर्वगामित्वम् ॥

▼ *मूल-प्रस्तुतिः*

सँ ह॒ वा अ॑स्मै॒ सकाम॑ः पद्यते,
यत्का॑मो॒ यज॑ते,
यो॑ऽग्निन्ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनम् ए॒वव॑ँ वेद॑।

▼ *भट्टभास्कर-टीका*

**सँ ह वा** इत्यादिर् यष्टुर् विदुषश् च प्रशंसा ॥ यं कामयत इति **यत्कामः** । 'शीलिकामि'
इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च ।

▼ *मूल-प्रस्तुतिः*

यो ह॒ वा अ॒ग्नेर् ना॑चिके॒तस्या॒यत॑नं प्रति॒ष्ठाव॑ँ वेद॑,
आ॒यत॑नवान्भवति ।
गच्छ॑ति प्रति॒ष्ठाम् ॥ 38 ॥

हिर॑ण्यव॒ँ वा अ॒ग्नेर् ना॑चिके॒तस्या॒त॑नं प्रति॒ष्ठा ।
य ए॒वव॑ँ वेद॑,
आ॒यतन॑वान्भवति ।
गच्छ॑ति प्रति॒ष्ठाम् ।

▼ *भट्टभास्कर-टीका*

यो ह वा इत्यादि । **आयतनं** स्थानं **प्रतिष्ठा** स्थितिहेतुः।
**हिरण्यं** तदुभयं, हिरण्येष्टकाभिर् उपधानात् ।
विदित्वा यष्टुः प्रथमं फलं, द्वितीयं वेदितुः ।

▼ *मूल-प्रस्तुतिः*

यो ह॒ वा अ॒ग्नेर् ना॑चिके॒तस्य॒ शरी॑रव॒ँ वेद॑,
सश॑रीर ए॒व स्व॒र्गल॑ँ लो॒कम् ए॑ति ।

हिर॑ण्यवँ॒ वा अ॒ग्नेर् ना॑चिके॒तस्य॒ शरी॑रम् ।
य ए॒ववँ॒ वेद॑,
सश॑रीर ए॒व स्व॒र्गलँ॒ लो॒कमे॑ति ।

▼ *भट्टभास्कर-टीका*

हिरण्यं नाचिकेतस्य शरीरं हिरण्यात्मकत्वात्तस्य ॥

▼ *मूल-प्रस्तुतिः*

अथो॒ यथा॑ रु॒क्म*(=स्वर्णम्)* उत्त॑प्तो भा॒य्यात् ॥ 39 ॥,
ए॒वम् ए॒व स तेज॑सा॒ यश॑सा,
अ॒स्मिँश्च॑ लो॒केंऽमुष्मिँ॑श्च भाति ।

▼ *भट्टभास्कर-टीका*

3 अथो यथेति ॥ अपिच उत्तप्तं स्वर्णं यथा भाय्यात् भायात् । छान्दसो द्वितीययकारोपजनः, यकारान्तं वा धात्वन्तरं द्रष्टव्यं, स्वार्थिकण्यन्तो वा भातिर्द्रष्टव्यः । एवमेव स नाचिकेतयाजी तद्वेदी च तेजसा यशसा च अस्मिँश्च लोकेऽमुष्मिँश्च भाति ॥

▼ *मूल-प्रस्तुतिः*

उ॒रवो॑ ह॒ वै नाम॒ैते लो॒काः,
ये ऽव॑रेणादि॒त्यम् ।
अथ॑ ह॒ैते वरी॑याँसो लो॒काः,
ये परे॑णादि॒त्यम् ।

▼ *भट्टभास्कर-टीका*

4 उरवो ह वा इत्यादि ॥ द्वये लोकाः उरवो महान्तश्च वरीयांस उरुतराश्च । 'प्रियस्थिर' इत्यादिना वरादेशः । तत्रादित्यस्याधस्तादुरव उपरि वरीयांसः ।

▼ *मूल-प्रस्तुतिः*

अन्त॑वन्तँ ह॒ वा ए॒ष क्ष॒य्यलँ॒ लो॒कञ्ज॑यति ,
योऽव॑रेणादि॒त्यम् ।
अथ॑ ह॒ैषो॑ऽन॒न्तम॑पा॒रम॑क्ष॒य्यलँ॒ लो॒कञ्ज॑यति ,
यः परे॑णादि॒त्यम् ॥ 40 ॥

▼ *भट्टभास्कर-टीका*

तत्रैष यजमानः कश्चिदन्तवन्तं क्षय्यं क्षपितुं शक्यं लोकं जयति योऽवरेणादित्यं वर्तते, अथ कश्चिद्यजमानः अनन्तं अविनाशं अपारं अपर्यवसानभोगं अक्षय्यं क्षपयितुमशक्यं च लोकं जयति यः परेणादित्यं वर्तते । 'ततोऽन्यत्रापि दृश्यते' इति द्वितीया ।

▼ *मूल-प्रस्तुतिः*

अ॒न॒न्तँ ह॒ वा अ॑पा॒रम॑क्ष॒य्यल॑ँ लो॒कञ्ज॑यति,
यो॑ऽग्निन्ना॑चिके॒तञ्चि॑नु॒ते,
य उ॑ चैनमे॒वव॑ँ वेद॑ ।

▼ *भट्टभास्कर-टीका*

तत्र कोऽनन्तमपारमक्षय्यं लोकं जयतीति चेत्, ब्रूम इत्याह - अनन्तं हेत्यादि । नाचिकेतयाजी नाचिकेतवेदी च तादृशस्य लोकस्य जेतेति वेदितव्यमिति ॥

▼ *मूल-प्रस्तुतिः*

अथो॒ यथा॒ रथे॒ तिष्ठ॒न्
*(अधो वर्तमाने)* पक्ष॑सी *(→चक्रे)* पर्या॒वर्त॑माने प्र॒त्यपे॑क्षते,
ए॒वम् अ॑होरा॒त्रे प्र॒त्यपे॑क्षते ।

*(आदित्याद् अध एव वर्तमानत्वान्)*
नास्या॑होरा॒त्रे लो॒कम् आ॑प्नुतः,
यो॑ऽग्निन् ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनमे॒वव॑ँ वेद॑ ॥ 41 ॥

▼ *भट्टभास्कर-टीका*

**अथो यथे**ति ॥
अपिच **यथा** रथस्योत्सङ्गे उपरि तिष्ठन्
अधस्तात् **पर्यावर्तमाने पक्षसी** पुनःपुनः परिवर्तमाने चक्रे
**प्रत्यपेक्षते** तद्विषयिणी अपेक्षा प्रत्यपेक्षणम् ।
एवम् अहोरात्रे आदित्य-वशेनाधस्तात् प्रवर्तमाने अयं प्रत्यपेक्षते,
न ह्यस्य लोकं स्थानं आदित्याद् उपरि स्थितं अहोरात्रे प्राप्नुतः,
तस्मात् कालतो ऽनवच्छिन्नत्वाद् अनन्तत्वम् इति ।
योऽग्निमिति । गतम् ॥

[[152]]

# नाचिकेतोपाख्यानम्②

नाचिकेतोपाख्यानम्

▼ *मूल-प्रस्तुतिः*

उ॒शन्ह॒ वै वा॑जश्रव॒सस्स॑र्व-वेद॒सन्*(=धनं)* द॑दौ ।

▼ *भट्टभास्कर-टीका*

1 उशन्नित्यादि ॥ उशन्नाम याजश्रवसोऽपत्यं सर्ववेदसं सर्वस्वं ददौ । सर्वं वेदो धनं सर्ववेदसम् । 'अनसन्नन्तान्नपुंसकाच्छन्दसि' इत्यच् समासान्तः ।

▼ *मूल-प्रस्तुतिः*

तस्य॑ ह॒ नचि॑केता॒ नाम॑ पु॒त्र आ॑स ।
तँ ह॑ कुमा॒रँ सन्त॒ं
दक्षि॑णासु नी॒यमा॑नासु श्र॒द्धा वि॑वेश ।

▼ *भट्टभास्कर-टीका*

तस्य नचिकेता नाम पुत्रो बभूव । छान्दसो भूभावाभावः । न चिकेत न जज्ञौ पितुर्भावमिति नचिकेता इति केचित् । पृषोदरादिः ।
अथ **तं** पुत्रं **कुमारम्** एव बालम् एव **सन्तं**
**दक्षिणासु नीयमानासु** दक्षिणानयनकाले पितुः **श्रद्धा** दानाभिनिवेशो विवेश प्राप,
श्रद्धातिशयेन पुत्रम् अपि दक्षिणात्वेन देयम् अमन्यत ।

▼ *मूल-प्रस्तुतिः*

स हो॑वाच -
"तत॒ कस्मै॒ मान्दा॑स्य॒सी"ति॑,
द्वि॒तीय॑न्, तृ॒तीय॑म् ।

▼ *भट्टभास्कर-टीका*

अथ विदिताभिप्रायः पुत्र उवाच पितरं - हे तात! कस्मै मां दास्यसि? इति ।
एवं द्वितीयं तृतीयं च पुनःपुनः पप्रच्छ ।

▼ *मूल-प्रस्तुतिः*

तँ ह॒ परी॑त उवाच -
"मृ॒त्यवे॑ त्वा दद॒मी"ति॑ ।

▼ *भट्टभास्कर-टीका*

अथ एवं पुत्रेण **परीतः** पर्याक्रान्तः पुनःपुनर्निर्बन्धितः पिता क्रुद्ध इव पुत्रमुवाच - मृत्यवे त्वा ददामीति ।

▼ *मूल-प्रस्तुतिः*

तँ ह॒ स्मोत्थि॑तव॒ँ वाग॒भिव॑दति ॥ 42 ॥
"गौत॑म! कुमा॒रम्?" इति॑ ।

▼ *भट्टभास्कर-टीका*

अथ पितृवचनानन्तरं मृत्युसकाशं गन्तुम् **उत्थितं** सहसोच्चलितं पुत्रम् अभिलक्ष्याकाशे काचिद् **वाग् अभिवदति स्म** उत्तस्थौ ।
कीदृशी? आह -
हे गौतम! किं **कुमारम्** इति किमेवं बालं मृत्यवे ददासि?
किमिदं गौतमगोत्रस्य तव युज्यते? इति दर्शयितुं गौतमग्रहणम् ।

▼ *मूल-प्रस्तुतिः*

स हो॑वाच -
परे॑हि मृ॒त्योर् गृ॒हान् । *(यतो)* मृ॒त्यवे॒ वै त्वां॑ऽदा॒मिति॑ ।

▼ *भट्टभास्कर-टीका*

अथ पितोवाच - परेहि मृत्योर् गृहान्
यथाऽहं पापो न स्यां,
**मृत्यवे** खलु **त्वाम् अदां** दत्तवान् अहं
नेदानीं दत्तं निवर्तयितुम् उत्सहे
न तद् अन्यथा भाति,
तस्मात् पुत्र परेहि मृत्योर् गहान् यास्यसीति ।

▼ *मूल-प्रस्तुतिः*

"तव॒ँ वै प्र॒वस॑न्तङ् ग॒न्ताऽसी"ति॑ होवाच -

> तस्य॑ स्म ति॒स्रो रात्री॒रना॑श्वान्गृ॒हे व॑सतात् ।
> स यदि॑ त्वा पृ॒च्छेत् -
> "कुमा॑र॒ कति॒ रात्री॑र् अवात्सी॒र्" इति॑,
> "ति॒स्र" इति॒ प्रति॑ ब्रूतात् ।

*(स यदिं त्वा पृच्छेत् -)*
"किं प्रंथमाँ रात्रिंम् आश्ना" इतिं ॥ 43 ॥
"प्रजां त" इतिं *(प्रतिं ब्रूतात्)*।

*(स यदिं त्वा पृच्छेत् -)*
"किन् द्वितीयाम्" इतिं ।
"पशूँस् त" इतिं *(प्रतिं ब्रूतात्)*।

*(स यदिं त्वा पृच्छेत् -)*
किन्तृतीयाम् इतिं -
साधुकृत्यां त इतिं *(प्रतिं ब्रूतात्)*।

▼ ***भट्टभास्कर-टीका***

अथ पिता पुत्रमुवाच - तं मृत्युं प्रवसन्तं गृहे असंनिहितं गन्तासि, असन्निहिते तस्मिन् मृत्यौ तस्य गृहा गन्तव्यास्त्वयेति यावत् । इत्थं च कर्तव्यमित्याह - तस्य गृहे तिस्रो रात्रीरनाश्वान् अनश्नन्नेव वसतात् वस । अथ स आगतो यदि त्वां पृच्छेत् हे कुमार! कति रात्रीर्मम गृहे अवात्सीः उषितवानसि इति, तिस्रो रात्रीरिति प्रतिब्रूतात् प्रतिब्रूहि । अथ स यदि पुनः पृच्छेत् प्रथमां रात्रिं किमाश्नाः अशितवानसि इति, तदैवं प्रतिब्रूयाः प्रजां आश्नामिति ।

अथ पुनरपि यदि पृच्छेत् द्वितीयां रात्रिं किमाश्ना इति, तदाऽपीत्थं ब्रूयाः पशूंस्ते आश्नामिति ।

यदि भूयोपि पृच्छेत् तृतीयां रात्रिं किमाश्ना इति, तदा चेत्थं प्रतिब्रूहि साधुकृत्यां सुकृतं त्वदीयमाश्नामिति ।

▼ ***मूल-प्रस्तुतिः***

तवँ वै प्रवसंन्तञ् जगाम ।
तस्यं ह तिस्रो रात्रीरनांश्वान्गृह उंवास ।

▼ ***भट्टभास्कर-टीका***

एवं पित्रोक्ते पुत्रोऽपि तथैव कृतवानित्याह - तं वा इत्यादि । गतम् । परोक्षे लिट् ॥

▼ ***मूल-प्रस्तुतिः***

तमागत्यं पप्रच्छ ।
कुमांर कति रात्रींरवात्सीरितिं ।
तिस्र इति प्रत्युंवाच ॥ 44 ॥

किं प्र॑थ॒माँ रात्रि॑माश्ना॒ इति॑ ।
प्र॒जान्त॒ इति॑ ।

किन्द्वि॒तीया॒मिति॑ ।
प॒शूँस्त॒ इति॑ ।

किन्तृ॒तीया॒मिति॑ ।
सा॒धु॒कृ॒त्यान्त॒ इति॑ ।

▼ *मूल-प्रस्तुतिः*

"नम॑स्ते अस्तु भगव॒" इति॑ होवाच -
"वरव्ँ॑ वृणी॒ष्वे"ति॑ ।

▼ *भट्टभास्कर-टीका*

2 अथ मृत्युरुवाच - हे भगवः! नमस्ते अस्तु प्रसीदेति । पुनरप्याह स्म - वरं वृणीष्वेति ।

▼ *मूल-प्रस्तुतिः*

पि॒तर॑मे॒व जीव॑न्न् अया॒नीति॑ ।

▼ *भट्टभास्कर-टीका*

अथ नचिकेता ब्रवीति स्म - पितरमहं जीवन्नेव अयानि गच्छानीति ।

▼ *मूल-प्रस्तुतिः*

द्वि॒तीयव्ँ॑ वृणी॒ष्वेति॑ ॥ 4
"इ॒ष्टा॒पू॒र्तयो॒र्मेऽक्षि॑तिं ब्रू॒ही"ति॑ होवाच ।
तस्मै॑ है॒तम् अ॒ग्निन् ना॑चिके॒तम् उ॑वाच ।
तता॒ वै तस्ये॑ष्टापू॒र्ते नाक्षी॑येते ।

▼ *भट्टभास्कर-टीका*

अथ तत्तथाऽस्तु, द्वितीयमपि वृणीष्वेति तेनोक्ते
नचिकेता वदति स्म -
इष्टापूर्तयोः **क्षितिं** स्थानं मे ब्रूहीति *(←स्वरकलने देषः)* ।
तत् तस्मै एतं नाचिकेतम् अग्निमुवाच । ततस्तस्येष्टापूर्ते नाक्षीयेताम् । छान्दसं ङेरेत्वम् ।

▼ *मूल-प्रस्तुतिः*

नास्येष्टापूर्ते क्षीयेते - योऽग्निन्नाचिकेतञ्चिनुते । य उचैनमेवव् वेद ।

▼ *भट्टभास्कर-टीका*

नास्येत्यादि विदुषस्स्तुतिः ।

▼ *मूल-प्रस्तुतिः*

"तृतीयव् वृणीष्वे"ति ।
"पुनर्मृत्योर्मेऽपजितिं ब्रूही"ति होवाच ।
तस्मै हैतमग्निन्नाचिकेतम् उवाच ।
ततो वै सोऽप पुनर्मृत्युम् अजयत् ॥ । 46 ॥

▼ *भट्टभास्कर-टीका*

ततस्तृतीयं वरं वृणीष्वेति तेनोक्तो नचिकेता ब्रूते स्म - पुनर्मृत्योरपजितिं मे ब्रूहीति । पुनः पुनर्मृतिः पुनर्मृत्युः तस्यापजयोऽमृतत्वम् । तस्मै हेत्यादि । गतम् ॥

▼ *मूल-प्रस्तुतिः*

अप पुनर्मृत्युञ्जयति -
योऽग्निन् नाचिकेतञ् चिनुते,
य उ चैनम् एवव् वेद ।

# नाचिकेताग्नि-प्रयोगविधिः②

नाचिकेताग्निप्रयोगः

▼ *मूल-प्रस्तुतिः*

तँ हैतमेके पशुबन्ध एवोत्तरवेद्याञ् चिन्वते -
*(सावित्रवद् उत्तर-वेदि-देशे चितत्वात्)* "उत्तरवेदि-सम्मित एषो ऽग्निर्" इति वदन्तः ।

▼ *भट्टभास्कर-टीका*

1 तँ हैतमित्यादि ॥ **तमेतं** नाचिकेतमग्निं केचित् **पशुबन्ध** एवोत्तरवेद्यां **चिन्वते** ।
**उत्तरवेदि-संमित** उत्तरवेदि-स्थानीय एषो ऽग्निः
सावित्रवद् उत्तर-वेदि-देशे चितत्वात् । उत्तरवेदिमतां प्रथमः पशुबन्धः, तस्मात्तत्रैव चेतव्यो नान्यत्रेति वदन्तः पशुबन्ध एव चिन्वते ।

▼ *मूल-प्रस्तुतिः*

तन्न तथा॑ कु॒र्यात् ।
ए॒तम् अ॒ग्निङ् *(भूयिष्ठाहुति-)*कामे॑न॒ व्य॑र्द्धयेत्*(=वियोजयेत्)* ।
स ए॑न॒ङ् कामे॑न॒ व्यृ॑द्धः, *(यजमानम् अपि)* कामे॑न॒ व्य॑र्द्धयेत् ।

▼ *भट्टभास्कर-टीका*

**तत् तथा न कुर्यात्,**
तथा ऽकुर्वन्न्
एतम् अग्निं हि **कामेन** भूयिष्ठाहुतिलाभाभिलाषेण **व्यर्धयेत्** वियोजयेत्,
ततोऽसौ **वृद्धिकामो** यजमानम् अपि तदीयेन कामेन व्यर्धयेत् ।

▼ *मूल-प्रस्तुतिः*

सौ॒म्ये वावैनं॑म् अध्व॒रे चिं॑न्वी॒त ।
यत्रं॑ वा॒ भूयिं॑ष्ठा॒ आहुं॑तयो हू॒येरं॑न् ।

▼ *भट्टभास्कर-टीका*

तस्मात्सौम्येऽध्वरे चेतव्यः । यत्र वा चातुर्मास्यादौ भूयिष्ठा बहुतरा आहुतयो हूयेरन् तत्र चेतव्यः ।

▼ *मूल-प्रस्तुतिः*

ए॒तम् अ॒ग्निङ् कामे॑न॒ सम॑र्द्धयति ।
स ए॑न॒ङ् कामे॑न॒ समृ॑द्धः कामे॑न॒ सम॑र्द्धयति ।

▼ *भट्टभास्कर-टीका*

एतमग्निमित्यादि । गतम् ॥

▼ *मूल-प्रस्तुतिः*

अथ॑ हैनं पु॒रर्षं॑य उत्तरवे॒द्याम् ए॒व स॒त्रियं॑म् *(नाचिकेताग्निम्)* अचिन्वत ।
तत॒ो वै तेऽविं॑न्दन्त प्र॒जाम् ।
अ॒भि स्व॒र्गलँ॑ लो॒कमं॑जयन् ।

▼ *भट्टभास्कर-टीका*

2 अथ हैनमित्यादि ॥ सत्रीयं सत्रे भवम् । गतमन्यत् ॥

▼ *मूल-प्रस्तुतिः*

वि॒न्दत॑ ए॒व प्र॒जाम्, अ॒भि स्व॒र्गल्ँ लो॒कञ्ज॑यति,
यो॑ऽग्निन्ना॑चिके॒तञ्चि॑नु॒ते ।
य उ॑ चैनम् ए॒वव्ँ वेद॑ ।

▼ *मूल-प्रस्तुतिः*

अथ॑ हैनव्ँ वा॒युर् ऋद्धि॑कामो
यथान्यु॒प्तम्*(=यथापातम्)* ए॒वोप॑दधे *(चिताव् इष्टिकाः)* ।
तता॒ वै स ए॒ताम् ऋद्धि॑माध्नोत्
याम् इ॒दव्ँ वा॒युर् ऋ॒द्धः ।

▼ *भट्टभास्कर-टीका*

3 अथ हैनमिति ॥
**यथान्युप्तं** यथा-निपतितेष्टकम्
अञ्जलिना गृहीत्वा वेद्यां चेतिता इष्टका
यथा पतितास् तथैवोपहितवान् ।

ततो वायुर् **एताम् ऋद्धिम् आर्ध्नोत्**। याम् ऋद्धिम् ऋद्धो वायुर् इदानीम् अस्माभिर् गृह्यते ।
**इदम्** इति क्रिया-विशेषणम् ।

▼ *मूल-प्रस्तुतिः*

ए॒ताम् ऋद्धि॑म् ऋध्नोति -
याम् इ॒दव्ँ वा॒युर् ऋ॒द्धः,
यो॑ऽग्निन् ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑चैनम् ए॒वव्ँ वेद॑ ।

▼ *भट्टभास्कर-टीका*

एताम् इत्य्-आदि फल-स्तुतिः ॥

▼ *मूल-प्रस्तुतिः*

अथ॑ हैनङ्गोबलो वार्ष्णः॑ प॒शु-का॑मः ।
पाङ्क्त॑म् ए॒व चि॑क्ये -
पञ्च॑ पु॒रस्ता॑त्,
पञ्च॑ दक्षिण॒तः,
पञ्च॑ प॒श्चात्,
पञ् चो॑त्तर॒त,
एका॒ं मध्ये॑ ।

▼ ***भट्टभास्कर-टीका***

4 अथ हेति ॥ गोवलो नाम वृष्णेरपत्यं पाङ्क्तं **चिक्ये** चितवान् चतसृषु दिक्षु पक्ष पञ्च, एकां मध्ये । एवं पञ्चत्वान्वयात् पाङ्कत्वम् ।

▼ ***मूल-प्रस्तुतिः***

तत॒ो वै स स॒हस्रं॑ प॒शून् प्राप्नो॑त् ।
प्र स॒हस्रं॑ प॒शून् आ॑प्नोति॒,
यो॑ऽग्निन् ना॑चिके॒तञ् चिं॑नु॒ते,
य उं॑ चैनम् ए॒वव॒ँ वेदं॑ ।

▼ ***भट्टभास्कर-टीका***

पाङ्क्तस्य चेता वेदिता च सहस्रं पशून् प्राप्नोति ॥

▼ ***मूल-प्रस्तुतिः***

अथ॑ हैनं प्र॒जाप॑ति॒र् ज्यैष्ठ्य॑-काम॒ो यश॑स्-कामः प्र॒जन॑न-कामः -
*(संख्या-त्रयान्वितं)* त्रि॒-वृत॑म् ए॒व चिं॑क्ये - स॒प्त पु॒रस्ता॑त् ,
ति॒स्रो द॑क्षिण॒तः ,
स॒प्त प॒श्चात् ,
ति॒स्र उ॑त्तर॒तः ,
एका॒ं मध्ये॑ ।

▼ ***भट्टभास्कर-टीका***

5 अथेति ॥ **ज्यैष्ठ्यं** प्राधान्यं, **यशः** ख्यातिः, **प्रजननं** प्रजासमृद्धिः ।
'शीलिकामि' इति नप्रत्ययः,
पूर्व-पद-प्रकृति-स्वरत्वं च ।
**त्रिवृतं** संख्या-त्रयान्वितम् ।
पुरस्तात्पश्चाच्च सप्त सप्त,
दक्षिणत उत्तरतश्च तिस्रस्तिस्रः,
एकां मध्य इति ।

▼ ***मूल-प्रस्तुतिः***

तत॒ो वै स प्र यश॒ो ज्यैष्ठ्य॑म् आप्नोत् ।
ए॒तां प्र॒जा॑ति॒ं *(शक्तिं)* प्राजा॑यत *(=प्राजनयत्)*,
याम् *(अवलम्ब्य)* इ॒दं प्र॒जाः प्र॒जाय॑न्ते ।

▼ ***भट्टभास्कर-टीका***

**एतां प्रजातिम्** इति ।
**एतां प्रजातिं** प्रजनन-सामर्थ्यं प्राप्नोत्
**यां प्रजा इदं प्रजायन्ते** ।

▼ ***मूल-प्रस्तुतिः***

त्रि॒वृद् वै ज्यैष्ठ्यं॑म् -
*(यथा लोके-)* मा॒ता पि॒ता पु॒त्रः ॥

▼ ***भट्टभास्कर-टीका***

त्रिवृद्वा इत्यादि ।
त्र्यवयवं **ज्यैष्ठ्यं** -
मात्रादयस् त्रयस् संयुक्ताः
प्रशस्यतमा लोके भवन्तीति ।

▼ ***मूल-प्रस्तुतिः***

त्रि॒वृत् प्र॒जनं॑नम् -
उ॒पस्थो॒ योनिं॑र् मध्य॒मा *(→शण्डाः)* ।

▼ ***भट्टभास्कर-टीका***

**प्रजननं** च त्र्यवयवम् उपस्थादित्रयस्य प्रजनन-हेतुत्वात् । योनिमध्यस्थितं गर्भस्थानं मध्यगा ।
केचिदाहुः - उपस्थः पुमान्, योनिः स्त्री, मध्यमा गतिः नपुंसकमिति,
सर्वप्रजननावृत्त्यभावादसमीचीनम् ।

▼ ***मूल-प्रस्तुतिः***

प्र यशो॒ ज्यैष्ठ्यं॑म् आप्नोति, ए॒तां प्रजा॑ति॒ं प्रजा॑यते *(=प्रजनयति)* -
याम् *(अवलम्ब्य)* इ॒दं प्र॒जाः प्र॒जाय॑न्ते,
योऽग्निन् ना॑चिके॒तञ् चिं॑नु॒ते,
य उं॑ चैनम् ए॒वव्ँ वेदं॑ ।

▼ ***भट्टभास्कर-टीका***

प्रयश इत्यादि फलस्तुतिः ॥

▼ ***मूल-प्रस्तुतिः***

अथ॑ है॒न॒म् इन्द्रो॒ ज्यैष्ठ्य॑-कामः -
ऊ॒र्ध्वा ए॒वोप॑दधे ।

▼ *भट्टभास्कर-टीका*

6 अथ हेति ॥
**ऊर्ध्वाः** मध्याद् आरभ्य ऊर्ध्व-रीतिकाः
आ स्वयम् आतृण्णायाः प्राचीर् इत्य् अर्थः,
तस्याश् शिरस्-स्थानीयत्वाद् **ऊर्ध्वा** इत्य् उक्तम् ॥

▼ *मूल-प्रस्तुतिः*

तो॒ वै स ज्यैष्ठ्य॑म् अगच्छत् ॥ ज्यैष्ठ्य॑ङ् गच्छति॒,
यो॑ऽग्निन् ना॑चिके॒तञ् चि॑नु॒ते,
य उ॑ चैनमे॒वव्ँ वेद॑ ।

▼ *मूल-प्रस्तुतिः*

अथ॑ हैनमु॒सावा॑दि॒त्यस्स्व॒र्गका॑मः॒ प्राची॑र् ए॒वोप॑दधे ।

▼ *भट्टभास्कर-टीका*

7 अथ हेति ॥ प्राचीः पश्चिमस्वयम्-आतृण्णाम् आरभ्य आहवनीयाद् उत्सर्पेद् इति केचित् ।

▼ *मूल-प्रस्तुतिः*

तो॒ वै सो॑ऽभि स्व॒र्गल्ँ लो॒कम॑जयत् ।
अ॒भि स्व॒र्गल्ँ लो॒कञ्ज॑यति॒,
यो॑ऽग्निन्ना॑चिके॒तञ्चि॑नु॒ते,
य उ॑ चैनमे॒वव्ँ वेद॑ ।

▼ *मूल-प्रस्तुतिः*

स यदी॒च्छेत् -
"ते॒ज॒स्वी य॑श॒स्वी ब्र॑ह्मवर्च॒सी स्या॒म्" इति॒
प्राङ् आ होतु॒र्धिष्ण्या॒द् उत्स॑र्पे॒त् -
"येयं प्राग॒ाद् यश॑स्वती॒, सा मा॒ प्रोर्णो॑तु॒ तेज॑सा॒ यश॑सा ब्रह्मवर्च॒सेने"ति॑ ।

▼ *भट्टभास्कर-टीका*

मन्त्रार्थस्तु - **येयं** वेदिः **प्रागात्** प्राची एति गच्छति । छान्दसो लुङ् ।
**यशस्वती** अन्नवती हविषामाधारत्वात् ।

**सा** तादृशीं हविर्भिर् आसादितैश् छादिता
माम् अपि तेजःप्रभृतिभिः **प्रोर्णोतु** प्रच्छादयत्विति ॥

▼ *मूल-प्रस्तुतिः*

तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति ।

▼ *मूल-प्रस्तुतिः*

अथ यदीच्छेत् -
"भूयिष्ठं मे श्रद्दधीरन् । भूयिष्ठा दक्षिणा नयेयुर्" इति -
दक्षिणासु नीयमानासु

> प्राच्येहि प्राच्येहीति *(प्रेर्यमाणा)*,
> प्राचीं जुषाणा,
> वेत्व् आज्यस्य स्वाहा

+इति स्रुवेणोपहत्याहवनीये जुहुयात् ॥

▼ *मूल-प्रस्तुतिः*

भूयिष्ठम् एवास्मै श्रद्दधते,
भूयिष्ठा दक्षिणा नयन्ति ।

▼ *मूल-प्रस्तुतिः*

पुरीषम् उपधाय,
*('चित्तिमचित्तिम्' इत्य्-आदिभिश् )* चितिक्लृप्तिभिर् अभिमृश्य,
अग्निं प्रणीयोपसमाधाय,
चतस्र एता आहुतीर् जुहोति -

"त्वमग्ने रुद्र" इति शतरुद्रीयस्य रूपम्,
"अग्नाविष्णू" इति वसोर्धाराया *(रूपम्)*,
"अन्नपत" इत्य् अन्नहोमः,
"सप्त ते अग्ने समिधस्सप्त जिह्वा" इति विश्वप्रीः ॥

▼ *भट्टभास्कर-टीका*

9 पुरीषमुपधायेत्यादि ॥
चात्वालात् **पुरीषम्** आहृत्य **चिताव्** उपधाय
'चित्तिमचित्तिम्' इत्य्-आदिभिश् **चिति-क्लृप्तिभिर्** अभिमृश्याग्निं **प्रणीयोपसमाधाय**

उपसमिध्य
चतुर्गृहीतेन **चतस्र** आहुतीर् जुहोति
'त्वमग्ने रुद्रः' इत्य्-आदिभिर् एतत्-प्रपाठकाम्नातैश् चतुर्भिर् अनुवाकैः ।
तत्र 'नमस्ते रुद्र' इति शतरुद्रीयस्य रूपं
तत्स्थानीयं "त्वमग्ने रुद्र" इति प्रथमोऽनुवाकः ।
शतं रुद्रा देवता अस्य शतरुद्रीयम् । 'छ च' इति छः ।

वसोर्धाराया रूपं द्वितीयोऽनुवाकः,
तृतीयोऽनुवाको ऽन्नहोमाख्यः अन्नसिद्धि-हेतुः,
चतुर्थोऽनुवाको विश्वप्रीर् नाम विश्वदेवताप्रीतिहेतुत्वात् ।
विश्वान् देवान् प्रीणातीति विश्वप्रीः ॥ इति द्वितीये काठके नवमोऽनुवाकः ॥

[[154]]

[[155]]

# त्रिसुपर्णमन्त्राः②

त्रिसुपर्णमन्त्राः

## 48⑥

▼ ***मूल-प्रस्तुतिः - यजुः***

ब्रह्म॑मेतु॒ माम् । मधु॑मेतु॒ माम् । ब्रह्म॑मे॒व मधु॑मेतु॒ माम् ।

▼ ***मूल-प्रस्तुतिः - यजुः***

यास्ते॑ सोम प्र॒जाव॒त्सोभि॒ सो अ॒हम् । दुस्व॑प्न॒हन्दु॑रुष्व॒हा ।
यास्ते॑ सोम प्रा॒णाँस्ताञ्जु॑होमि ।

▼ ***मूल-प्रस्तुतिः - यजुः***

त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् ।
ब्र॒ह्म॒ह॒त्यावँ॑ वा ए॒ते घ्न॑न्ति ।

ये ब्रा॑ह्म॒णास्त्रि॑सुप॒र्णं पठ॑न्ति ।
ते सोम॒ं प्राप्नु॑वन्ति ।
आ॒स॒ह॒स्रात्प॒ङ्क्तिं पुन॑न्ति । ओम् । (63)

## 49⑥

▼ *मूल-प्रस्तुतिः - यजुः*

ब्रह्म॑ मे॒धया॑ । मधु॑ मे॒धया॑ । ब्रह्म॑मे॒व मधु॑ मे॒धया॑ ।

अद्या" नो देव सवितः
प्रजा"वत् **सावीः** सौ"भगम् ।
प"रा दुष्-ष्व"प्न्यं **सुव** ॥

▼ *अधिमन्त्रम् - sa*

- देवता - सविता
- ऋषिः - श्यावाश्व आत्रेयः
- छन्दः - गायत्री

▼ *Thomson & Solcum*

अद्या" नो देव सवितः
प्रजा"वत् सावीः सउ"भगम्
प"रा दुष्व"प्नियं सुव

▼ *Vedaweb annotation*

### Strata
Archaic

### Pāda-label
genre M
genre M
genre M

**Morph**

adyá ← adyá (invariable)
{}

deva ← devá- (nominal stem)
{case:VOC, gender:M, number:SG}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

savitar ← savitár- (nominal stem)
{case:VOC, gender:M, number:SG}

prajā́vat ← prajā́vant- (nominal stem)
{case:NOM, gender:N, number:SG}

saúbhagam ← saúbhaga- (nominal stem)
{case:NOM, gender:N, number:SG}

sāvīḥ ← √sū- 1 (root)
{number:SG, person:2, mood:INJ, tense:AOR, voice:ACT}

duṣvápnyam ← duṣvápnya- (nominal stem)
{case:NOM, gender:N, number:SG}

párā ← párā (invariable)
{}

suva ← √sū- 1 (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

▼ ***पद-पाठः***

अ॒द्य । नः॒ । दे॒व॒ । स॒वि॒त॒रिति॑ । प्र॒जाऽव॑त् । सा॒वीः॒ । सौभ॑गम् ।
परा॑ । दुः॒ऽस्वप्न्य॑म् । सु॒व॒ ॥

▼ ***Hellwig Grammar***

- *adyā ← adya*

- [adverb]
- “now; today; then; nowadays; adya [word].”

---

- *no* ← *naḥ* ← *mad*
- [noun], dative, plural
- “I; mine.”

---

- *deva*
- [noun], vocative, singular, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

---

- *savitaḥ* ← *savitar* ← *savitṛ*
- [noun], vocative, singular, masculine
- “Savitar; sun; Surya; Savitṛ.”

---

- *prajāvat*
- [noun], accusative, singular, neuter
- “prolific.”

---

- *sāvīḥ* ← *sū*
- [verb], singular, Aorist inj. (proh.)
- “give birth; urge; bestow; cause.”

---

- *saubhagam* ← *saubhaga*
- [noun], accusative, singular, neuter
- “well-being.”

---

- *parā*
- [adverb]
- “away.”

- *duṣṣvapnyaṃ ← duṣṣvapnyam ← duḥṣvapnya*
- [noun], accusative, singular, neuter
- “nightmare.”

- *suva ← sū*
- [verb], singular, Present imperative
- “give birth; urge; bestow; cause.”

▼ *रङ्गनाथः*

अद्य- इदानीम्। देव- द्योतक। सवितः- प्रेरक सूर्यात्मन्। प्रजावत्- धर्मसन्ततिवत्। सौभगम्- सौभाग्यम्। नः- अस्मभ्यम्। सावीः- प्रेरय। दुःष्वप्न्यम्- दुस्स्वप्नम्। परा सुव- दूरे प्रेरय॥४॥

▼ *सायण-भाष्यम्*

हे **सवितः देव नः** अस्मभ्यम् **अद्य** अस्मिन् यागदिने **प्रजावत्** पुत्राद्युपेतं **सौभगं** धनं **सावीः** प्रेरय । **दुःष्वप्न्यं** दुःस्वप्नं दुःस्वप्नवद्दुःखकरं दारिद्र्यं **परा सुव** दूरे प्रेरय ॥

8अथाष्टमीमाह - हे सवितर्देव! अद्यास्मिन्कर्मणि नोऽस्माकं प्रजावत् पुत्रपौत्राद्युपेतं सौभगं सौभाग्यं सावीः अनुजानीहि । दुष्ष्वप्नियं दुस्स्वप्ननिमित्तं दोषं परासुव विनाश्य ॥

▼ *Wilson*

## English translation:

“Grant us today, divine **Savitā** affluence with progeny, and drive away evil dreams.”

## Commentary by Sāyaṇa: Ṛgveda-bhāṣya

**Para** duhṣvapnyam **suva**: duhṣvapnyam = dāridryam, poverty

▼ *Jamison Brereton*

Today, god Savitar, you have impelled to us a good portion consisting of offspring.
Impel away the bad dream.

▼ *Griffith*

Send us this day, God Savitar, prosperity with progeny.
Drive thou the evil dream away.

▼ *Geldner*

Mögest du, Gott Savitri, uns heute kinderreiches Glück zuweisen.
Weise üblen Traum ab!

▼ *Grassmann*

O schaffe heut, Gott Savitar, uns kinderreichen Segen her; Fort schaffe böses Traumgesicht.

▼ *Elizarenkova*

Сегодня, о бог Савитар, вызови к жизни
Для нас удачу, заключающуюся в потомстве!
Прочь отзови дурной сон!

▼ *अधिमन्त्रम् (VC)*

- सविता
- श्यावाश्व आत्रेयः
- निचृद्गायत्री
- षड्जः

▼ *दयानन्द-सरस्वती (हि) - विषयः*

फिर उसी विषय को कहते हैं ॥

▼ *दयानन्द-सरस्वती (हि) - पदार्थः*

पदार्थान्वयभाषाः - हे (सवितः) सम्पूर्ण ऐश्वर्य्य के देनेवाले स्वामिन् (देव) शोभित ! आप कृपा से (नः) हम लोगों के लिये वा हम लोगों के (अद्या) आज (प्रजावत्) बहुत प्रजायें विद्यमान

जिसके उस (सौभगम्) सुन्दर ऐश्वर्य के भाग को (सावीः) उत्पन्न कीजिये और (दुःष्वप्न्यम्) दुष्ट स्वप्नों में उत्पन्न दुःख को (परा, सुव) दूर कीजिये ॥४॥

▼ *दयानन्द-सरस्वती (हि) - भावार्थः*

भावार्थभाषाः - जो परमेश्वर की प्रार्थना करके धर्म्मयुक्त पुरुषार्थ करते हैं, वे बहुत ऐश्वर्य्यवाले होकर दुःख और दारिद्र्य से रहित होते हैं ॥४॥

▼ *दयानन्द-सरस्वती (हि) - अन्वयः*

अन्वय: हे सवितर्देव ! त्वं कृपया नोऽद्या प्रजावत्सौभगं सावीर्दुःष्वप्न्यं परा सुव दूरं गमय ॥४॥

▼ *दयानन्द-सरस्वती (हि) - विषयः*

पुनस्तमेव विषयमाह ॥

▼ *दयानन्द-सरस्वती (हि) - पदार्थः*

पदार्थान्वयभाषाः - (अद्या) अद्य। अत्र निपातस्य चेति दीर्घः। (नः) अस्मभ्यमस्माकं वा (देव) प्रकाशमान (सवितः) सर्वैश्वर्य्यप्रदेश्वर (प्रजावत्) बह्व्यः प्रजा विद्यन्ते यस्य तत् (सावीः) जनय (सौभगम्) शौभनैश्वर्य्यस्य भागम् (परा) (दुःष्वप्न्यम्) दुष्टेषु स्वप्नेषु भवं दुःखम् (सुव) प्रेरय ॥ ४॥

▼ *दयानन्द-सरस्वती (हि) - भावार्थः*

भावार्थभाषाः - ये परमेश्वरं प्रार्थयित्वा धर्म्यं पुरुषार्थं कुर्वन्ति ते महदैश्वर्या भूत्वा दुःखदारिद्र्यविरहा जायन्ते ॥४॥

▼ *सविता जोशी ← दयानन्द-सरस्वती (म) - भावार्थः*

भावार्थभाषाः - जे परमेश्वराची प्रार्थना करून धर्मयुक्त पुरुषार्थ करतात. ते अत्यंत ऐश्वर्यवान होऊन दुःख व दारिद्र्यरहित होतात. ॥ ४ ॥

वि॑श्वानि देव सवितर्
दुरिता॑नि प॑रा सुव
य॑द् भद्रं॑ त॑न् न आ॑ सुव

▼ *अधिमन्त्रम् - sa*

- देवता - सविता
- ऋषिः - श्यावाश्व आत्रेयः

- छन्दः - गायत्री

▾ *Thomson & Solcum*

वि॑श्वानि देव सवितर्
दुरिता॑नि प॑रा सुव
य॑द् भद्रं॑ त॑न् न आ॑ सुव

▾ *Vedaweb annotation*

**Strata**
Archaic

**Pāda-label**
genre M
genre M
genre M

**Morph**
deva ← devá- (nominal stem)
{case:VOC, gender:M, number:SG}

savitar ← savitár- (nominal stem)
{case:VOC, gender:M, number:SG}

víśvāni ← víśva- (nominal stem)
{case:NOM, gender:N, number:PL}

duritā́ni ← duritá- (nominal stem)
{case:NOM, gender:N, number:PL}

párā ← párā (invariable)
{}

suva ← √sū- 1 (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

ā́ ← ā́ (invariable)
{}

bhadrám ← bhadrá- (nominal stem)
{case:NOM, gender:N, number:SG}

naḥ ← ahám (pronoun)
{case:ACC, number:PL}

suva ← √sū- 1 (root)
{number:SG, person:2, mood:IMP, tense:PRS, voice:ACT}

tát ← sá- ~ tá- (pronoun)
{case:NOM, gender:N, number:SG}

yát ← yá- (pronoun)
{case:NOM, gender:N, number:SG}

▼ ***पद-पाठः***

विश्वा॑नि । दे॒व॒ । स॒वि॒तः॒ । दुः॒ऽइ॒तानि॑ । परा॑ । सु॒व॒ ।
यत् । भ॒द्रम् । तत् । नः॒ । आ । सु॒व॒ ॥

▼ ***Hellwig Grammar***

- *viśvāni* ← *viśva*
- [noun], accusative, plural, neuter
- “all(a); whole; complete; each(a); viśva [word]; completely; wholly.”

---

- *deva*
- [noun], vocative, singular, masculine
- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

---

- *savitar* ← *savitṛ*
- [noun], vocative, singular, masculine

- “Savitar; sun; Surya; Savitṛ.”

---

- *duritāni* ← *durita*
- [noun], accusative, plural, neuter
- “danger; sin; difficulty; difficulty; evil.”

---

- *parā*
- [adverb]
- “away.”

---

- *suva* ← *sū*
- [verb], singular, Present imperative
- “give birth; urge; bestow; cause.”

---

- *yad* ← *yat* ← *yad*
- [noun], nominative, singular, neuter
- “who; which; yat [pronoun].”

---

- *bhadraṃ* ← *bhadram* ← *bhadra*
- [noun], nominative, singular, neuter
- “auspicious; lovely; good; happy; bhadra [word]; lucky; fine-looking; beautiful.”

---

- *tan* ← *tat* ← *tad*
- [noun], nominative, singular, neuter
- “this; he,she,it (pers. pron.); respective(a); that; nominative; then; particular(a); genitive; instrumental; accusative; there; tad [word]; dative; once; same.”

---

- *na* ← *naḥ* ← *mad*
- [noun], dative, plural

- “I; mine.”

---

- *ā*
- [adverb]
- “towards; ākāra; until; ā; since; according to; ā [suffix].”

---

- *suva* ← *sū*
- [verb], singular, Present imperative
- “give birth; urge; bestow; cause.”

---

▼ *रङ्गनाथः*

देव सवितः। विश्वा- सर्वाणि। दुरितानि- अघानि। परा सुव- दूरे प्रेरय। यत्। भद्रम्- कल्याणम्। तत्। नः- अस्मभ्यम्। आ सुव- आभिमुख्येन प्रेरय॥५॥

▼ *सायण-भाष्यम्*

हे सवितः **देव** त्वं विश्वानि दुरितानि परा सुव । यद्भद्रं प्रजापशुगृहादिकं तत् **नः** अस्मभ्यम् “ **सुव** अस्मदभिमुखं प्रेरय। ‘प्रजा वै भद्रं पशवो भद्रं गृहं भद्रम् ' इति हि श्रुतिः ॥ ॥ २५ ॥

---

9अथ नवमीमाह - हे सवितर्देव विश्वानि दुरितानि परासुव विनाशय । यद्भद्रं कल्याणमस्ति तन्मे मम आसुव सर्वतोऽनुजानीहि ।

▼ *Wilson*

---

## English translation:

“Remove from us, divine **Savitā**, all misfortunes; bestow upon us that which is good,”

---

## Commentary by Sāyaṇa: Ṛgveda-bhāṣya

Bhadram = progeny, cattle, dwelling, **prajā** vai bhadram, **pasa**'vo bhadram, gṛham bhadram iti

▼ *Jamison Brereton*

All difficulties impel away, god Savitar.
What is beneficial, that impel here to us.

▼ *Griffith*

Savitar, God, send far away all sorrows and calamities,
And send us only what is good.

▼ *Geldner*

Weise alle Gefahren ab, Gott Savitri. Was Glück bringt, das weise uns zu!

▼ *Grassmann*

O schaffe alles Ungemach von uns hinweg, Gott Savitar; Was heilsam ist, das schaff uns her.

▼ *Elizarenkova*

Все, о бог Савитар,
Бедствия прочь отзови,
Что благого – то к жизни вызови для нас!

▼ *अधिमन्त्रम् (VC)*

- सविता
- श्यावाश्व आत्रेयः
- गायत्री
- षड्जः

▼ *दयानन्द-सरस्वती (हि) - विषयः*

मनुष्य किसलिये ईश्वर की प्रार्थना करें, इस विषय को कहते हैं ॥

▼ *दयानन्द-सरस्वती (हि) - पदार्थः*

पदार्थान्वयभाषाः - हे (सवितः) संपूर्ण संसार के उत्पन्न करनेवाले (देव) और संपूर्ण संसार को प्रकाशित करनेवाले जगदीश्वर ! (विश्वानि) संपूर्ण (दुरितानि) दुष्ट आचरणों को आप (परा, सुव) दूर कीजिये और (यत्) जो (भद्रम्) कल्याणकारक है (तत्) उसको (नः) हम लोगों के लिये (आ, सुव) सब प्रकार से प्राप्त कीजिये ॥५॥

▼ *दयानन्द-सरस्वती (हि) - भावार्थः*

भावार्थभाषाः - हे परमेश्वर ! आप कृपा से जितने हम लोगों में दुष्ट आचरण हैं, उनको अलग करके धर्म्मयुक्त गुण, कर्म्म और स्वभावों को स्थापित कीजिये ॥५॥

▼ *दयानन्द-सरस्वती (हि) - अन्वयः*

अन्वय: हे सवितर्देव जगदीश्वर ! विश्वानि दुरितानि त्वं परा सुव यद्भद्रं तन्न आ सुव ॥५॥

▼ *दयानन्द-सरस्वती (हि) - विषयः*

मनुष्यैः किमर्थमीश्वरः प्रार्थनीय इत्याह ॥

▼ *दयानन्द-सरस्वती (हि) - पदार्थः*

पदार्थान्वयभाषाः - (विश्वानि) सर्वाणि (देव) सकलजगत्प्रकाशक (सवितः) सर्वविश्वोत्पादक (दुरितानि) दुष्टाचरणानि (परा) (सुव) दूरे प्रक्षिप (यत्) (भद्रम्) कल्याणकरम् (तत्) (नः) अस्मभ्यम् (आ) (सुव) समन्तात् प्रापय ॥५॥

▼ *दयानन्द-सरस्वती (हि) - भावार्थः*

भावार्थभाषाः - हे परमेश्वर ! भवान् कृपया यावन्त्यस्मासु दुष्टाचरणानि सन्ति तावन्ति पृथक्कृत्य धर्म्यगुणकर्मस्वभावान् स्थापयतु ॥५॥

▼ *सविता जोशी ← दयानन्द-सरस्वती (म) - भावार्थः*

भावार्थभाषाः - हे परमेश्वरा! आमचे जेवढे दुष्ट आचरण आहे ते तुझ्या कृपेने नाहीसे होऊन धर्मयुक्त गुण, कर्म, स्वभाव बनू दे. ॥ ५ ॥

मधु॒ नक्त॑म् उ॒तोष॑सि॒
मधु॑म॒त् पार्थि॑वँ॒ रजः॑ ।
मधु॒ द्यौर॑स्तु नः पि॒ता ॥

मधु॑मान् नो॒ वन॒स्पति॒र्
मधु॑माँ अस्तु॒ सूर्यः॑ ।
माद्ध्वी॒र् गावो॑ भवन्तु नः ॥

▼ *मूल-प्रस्तुतिः - यजुः*

य इ॒मन्त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् ।
भ्रू॒ण॒ह॒त्यावँ॒ वा ए॒ते घ्नं॑न्ति ।

ये ब्रा॑ह्म॒णास्त्रिसु॑पर्णं॒ पठ॑न्ति ।
ते सोम॒ं प्राप्नु॑वन्ति ।
आ॒स॒ह॒स्रात्प॒ङ्क्तिं पुन॑न्ति । ओम् । (63)

## 50⑥

▼ *मूल-प्रस्तुतिः - यजुः*

ब्रह्म॑ मे॒धवा॑ । मधु॑ मे॒धवा॑ । ब्रह्म॑मे॒व मधु॑ मे॒धवा॑ ।

ब्रह्मा॑ देवा॑नां, पदवीः॑ *(=पद्धति-कृत्)* कवीना॑म्
ऋ॑षिर्वि॑प्राणां महिषो॑ मृगा॑णाम् ।
श्येनो॑ गृ॑ध्राणां स्व॑धितिर् *(=परशुः/ वज्रः)* व॑नानां *(=हिंसकानां)*

*(ब्रह्मा, कवयः, ऋषयः इति चारु क्रमः। महिषः, श्योनः, वना इत्यपि। वज्रो वै स्वधितिः इति श्रुतौ दृश्यते।)*

सो॑मः पवि॑त्रम॑त्येति रे॑भन् *(=शब्दायमानः)* ६

▼ *अधिमन्त्रम् - sa*

- देवता - पवमानः सोमः
- ऋषिः - दैवोदासिः प्रतर्दनः
- छन्दः - त्रिष्टुप्

▼ *Thomson & Solcum*

ब्रह्मा॑ देवा॑नाम् पदवीः॑ कवीना॑म्
ऋ॑षिर् वि॑प्राणाम् महिषो॑ मृगा॑णाम्
श्येनो॑ गृ॑ध्राणां स्व॑धितिर् व॑नानां
सो॑मः पवि॑त्रम् अ॑ति एति रे॑भन्

▼ *Vedaweb annotation*

**Strata**
Normal

---

**Pāda-label**
genre M
genre M
genre M
genre M

---

**Morph**
brahmā́ ← brahmán- (nominal stem)
{case:NOM, gender:M, number:SG}

devā́nām ← devá- (nominal stem)
{case:GEN, gender:M, number:PL}

kavīnā́m ← kaví- (nominal stem)
{case:GEN, gender:M, number:PL}

padavī́ḥ ← padavī́- (nominal stem)
{case:NOM, gender:M, number:SG}

mahiṣáḥ ← mahiṣá- (nominal stem)
{case:NOM, gender:M, number:SG}

mr̥gā́ṇām ← mr̥gá- (nominal stem)
{case:GEN, gender:M, number:PL}

ŕ̥ṣiḥ ← ŕ̥ṣi- (nominal stem)
{case:NOM, gender:M, number:SG}

víprāṇām ← vípra- (nominal stem)
{case:GEN, gender:M, number:PL}

gŕ̥dhrāṇām ← gŕ̥dhra- (nominal stem)
{case:GEN, gender:M, number:PL}

svádhitiḥ ← svádhiti- (nominal stem)
{case:NOM, gender:F, number:SG}

śyenáḥ ← śyená- (nominal stem)
{case:NOM, gender:M, number:SG}

vánānām ← vána- (nominal stem)
{case:GEN, gender:N, number:PL}

áti ← áti (invariable)
{}

eti ← √i- 1 (root)
{number:SG, person:3, mood:IND, tense:PRS, voice:ACT}

pavítram ← pavítra- (nominal stem)
{case:NOM, gender:N, number:SG}

rébhan ← √ribh- (root)
{case:NOM, gender:M, number:SG, tense:PRS, voice:ACT}

sómaḥ ← sóma- (nominal stem)
{case:NOM, gender:M, number:SG}

▼ ***पद-पाठः***

ब्र॒ह्मा । दे॒वानां॑म् । प॒द॒ऽवीः । क॒वी॒नाम् । ऋषिः॑ । विप्रा॑णाम् । म॒हि॒षः । मृ॒गाणा॑म् ।
श्ये॒नः । गृध्रा॑णाम् । स्वऽधि॑तिः । वना॑नाम् । सोमः॑ । प॒वित्र॑म् । अति॑ । ए॒ति॒ । रेभ॑न् ॥

▼ ***Hellwig Grammar***

- *brahmā ← brahman*
- [noun], nominative, singular, masculine
- “Brahma; Brahmin; dhak; Brahman; brahman [word]; Brahman; Brahmin; Brahmapurāṇa; Vishnu; Brihaspati.”

---

- *devānām ← deva*
- [noun], genitive, plural, masculine

- “Deva; Hindu deity; king; deity; Indra; deva [word]; God; Jina; Viśvedevās; mercury; natural phenomenon; gambling.”

---

- *padavīḥ* ← *padavī*
- [noun], nominative, singular, feminine
- “path; padavī [word].”

---

- *kavīnām* ← *kavi*
- [noun], genitive, plural, masculine
- “poet; wise man; bard; Venus; Uśanas; kavi [word]; Kavi; prophet; guru; Brahma.”

---

- *ṛṣir* ← *ṛṣiḥ* ← *ṛṣi*
- [noun], nominative, singular, masculine
- “Ṛṣi; spiritual teacher; ascetic; Mantra.”

---

- *viprāṇām* ← *vipra*
- [noun], genitive, plural, masculine
- “Brahmin; poet; singer; priest; guru; Vipra.”

---

- *mahiṣo* ← *mahiṣaḥ* ← *mahiṣa*
- [noun], nominative, singular, masculine
- “Old World buffalo; Mahiṣa; Mahiṣa.”

---

- *mṛgāṇām* ← *mṛga*
- [noun], genitive, plural, masculine
- “game; deer; animal; antelope; mṛga [word]; Mṛgaśiras.”

---

- *śyeno* ← *śyenaḥ* ← *śyena*
- [noun], nominative, singular, masculine

- “hawk; bird of prey; falcon; Śyena; eagle; śyena [word]; Śyena.”

---

- *gṛdhrāṇāṃ* ← *gṛdhrāṇām* ← *gṛdhra*
- [noun], genitive, plural, masculine
- “vulture.”

---

- *svadhitir* ← *svadhitiḥ* ← *svadhiti*
- [noun], nominative, singular, masculine
- “ax; knife.”

---

- *vanānāṃ* ← *vanānām* ← *vana*
- [noun], genitive, plural, neuter
- “forest; wood; tree; grove; vana [word]; forest; brush.”

---

- *somaḥ* ← *soma*
- [noun], nominative, singular, masculine
- “Soma; moon; soma [word]; Candra.”

---

- *pavitram* ← *pavitra*
- [noun], accusative, singular, neuter
- “strainer.”

---

- *aty* ← *ati*
- [adverb]
- “very; excessively; beyond; excessively.”

---

- *eti* ← *i*
- [verb], singular, Present indikative
- “go; travel; enter (a state); return; walk; continue; reach; ask.”

- *rebhan* ← *ribh*
- [verb noun], nominative, singular
- “moo; murmur; praise.”

▼ ***रङ्गनाथः***

३ देवानाम्- देवतानाम्। ब्रह्मा- हिरण्यगर्भः। कवीनाम्- क्रान्तदर्शिनाम्। पदवीः- उत्तमपदगन्ता। विप्राणाम्- मेधाविनाम्। ऋषिः- सूक्ष्मद्रष्टा। मृगाणाम्- पशूनाम्। महिषः- महान् सिंहः। गृध्राणाम्- द्विजानाम्। श्येनः। वनानाम्- वननीयानाम्। स्वधितिः- स्वधारणा। सोमः- रसः। पवित्रम्- शोधकं प्रतीकम्। रेभन्- मन्त्रान् शब्दयन्। अत्येति- अतिक्रम्य सरति। सर्वेषां सारभूतः सोम इति भावः॥६॥

▼ ***सायण-भाष्यम्***

सोम एवं-रूपो भवति।

**देवानां** स्तोत्रकारिणाम् ऋत्विजां **ब्रह्मा** ब्रह्माख्यर्त्विक् स्थानी यो भवति,
यद् वा **देवानां** द्योतमानानाम् इन्द्रादीनां **ब्रह्मा** राजाभवति ।

तथा **कवीनां** क्रान्तप्रज्ञानां **पदवीः** स्खलन्ति पदानि साधुत्वेन यो योजयति सपदवीः ।
वीगत्यादिष्व् इत्येतस्मात् क्विपि रूपम् ।

तथा **विप्राणां** मेधाविनाम्मध्ये ऋषिर्भवति । यः परोक्षम्पश्यति सऋषिः । ऋषिर्दर्श- नादिति । मृगाणां महिषोभवति महिषाख्योबलवान् राजाभवति । तथा गृध्राणां पक्षि- विशेषाणां श्येनः शंसनीयः पक्षिराजोभवति । वनानां वनतिर्हिंसाकर्मा । हिंसकानां छेदका- नाम्मध्ये स्वधितिः एतन्नामकः छेदकोसि । एवम्प्रभावः सोमः रेभन् शब्दायमानःसन् पवि त्रमूर्णास्तुकेन कृतमत्येति अतिगच्छति ॥ ६ ॥

▼ ***Wilson***

## English translation:

“The **Brahmā** of the gods, the guide of the sages, the ṛṣi of the pious, the buffalo of wild animals, the falcon of the vultures, the hatchet of deadly weapons, the **Soma** passes through the filter with a roar.”

**Commentary by Sāyaṇa: Ṛgveda-bhāṣya**

The Brahmā of the gods: i.e., the king of the gods; or, it may mean the **brāhmaṇa** of the priests; the ṛṣi: yaḥ **parokṣam** paśyati sa ṛṣiḥ, ṛsirdarśanāt (**Nirukta** 2.11)

▼ *Jamison Brereton*

Formulator for the gods, trail-blazer for the sage poets, seer for the inspired poets, buffalo of the wild beasts,
falcon of the birds of prey, axe of the trees—Soma goes rasping through the filter.

▼ *Jamison Brereton Notes*

Though the syntax is kept absolutely constant - nom. sg. + gen. pl. - there is a shifting functional relationship between the head noun and its genitive in the seven phrases here: the first two are roles Soma performs for the group identified by the gen., the next three a particular, and superior, individual token from the group (though the third pairing, “seer for/of the inspired poets,” is ambiguous between the first type and the second), and the last is sort of a negative version of the role he plays for the group.

▼ *Griffith*

Brahman of Gods, the Leader of the poets, Rsi of sages, Bull of savage creatures,
Falcon amid the vultures, Axe of forests, over the cleansing sieve goes Soma singing.

▼ *Geldner*

Der Hohepriester der Götter, der Pfadfinder der Seher, der Rishi unter den Beredten, der Büffel unter den wilden Tieren, der Adler unter den Geiern, die Axt für die Bäume, geht Soma laut redend durch die Seihe.

▼ *Grassmann*

Der Götter Beter und der Priester Führer, der Sänger Dichter und der Stier der Thiere, Der Geier Adler und die Axt der Wälder, der Soma wandert singend durch die Seihe.

▼ *Elizarenkova*

Брахман богов, пролагатель пути поэтов,
Риши среди вдохновенных, буйвол среди диких животных,
Орел среди хищных птиц, топор для деревьев,
Сома проходит сквозь цедилку, распевая.

▼ *अधिमन्त्रम् (VC)*

- पवमानः सोमः
- प्रतर्दनो दैवोदासिः
- निचृत्त्रिष्टुप्
- धैवतः

*(अहं)* ह॒ँसश् शु॑चि॒-षद्, वसु॑र् अन्तरिक्ष॒-सद्,
+होता॑ वेदि॒-षद्, अति॑थिर् दुरोण॒-सत् ।
नृ॒-षद्, व॑र॒-सद्, ऋ॑त॒-सद् व्यो॑म॒-सद्,
अ॒ब्-जा, गो॒-जा, ऋ॑त॒-जा, अ॑द्रि॒-जा, ऋ॒तं बृ॒हत् ॥

▼ *Keith*

I The gander seated in purity, the bright one seated in the atmosphere,
The Hotr seated at the altar, the guest seated in the house,
Seated among men, seated in the highest, seated in holy order, seated in the firmament, Born of the waters, born of the cows, born of holy order, born of the mountain, the great holy order.

▼ *भट्टभास्कर-टीका*

अध्यात्ममधिदैवमधियज्ञं चाधिकृत्य त्रेधेमं मन्त्रं व्याचक्षते । तत्र प्रकरणानुरूपोर्थविशेषो गृहीतव्यः । अध्यात्मे तावत् - हंसः आत्मा । शुचिषु स्थानेषु सीदतीति शुचिषत् । वासयिता

वसुः वरिष्ठो वा । अन्तरिक्षे हृदयाकाशादिषु सीदतीति अन्तरिक्षसत् । होता आह्वाता देवानामादाता वा । वेद्यां यागार्थं सीदतीति वेदिषत् । अतिथिस्सततगतिः, तिथिकृतविशेषरहितो वा । दुःखरक्षणेषु गृहादिषु सीदतीति दुरोणसत् । नृषु प्राणिशरीरेषु तद्भावेन सीदतीति नृषत् । वरेषु फलेषु भोक्तृत्वेन सीदतीति वरसत् । ऋते यज्ञे सत्ये वा सीदतीति ऋतसत् । विविधे रक्षणे तृप्तौ वा सीदतीति व्योमसत् । अद्भ्यो जातः अब्जाः शरीराभिप्रायं, शुक्क्लाज्जातत्वात् । यथा 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति । अपां वा यागद्वारेण जनयिता । अन्तर्भावितण्यर्थात् 'जनसनखन' इति विट्, 'विड्वनोः' इत्यात्वम् । गोषु पशुषु अनुग्राहकतया जातः गोजाः । ऋते यज्ञे ऋतार्थं वा जातः प्रादुर्भूतः ऋतजाः । अद्रिजाः पर्वतादिष्वपि प्रादुर्भूतः । ऋतं सत्यरूपं बृहद्ब्रह्म । अथाधिदैवे - हंस आदित्यः । शुचिनि मण्डले सीदतीति शुचिषत् । होता अपामादाता । वेद्यामाराध्यतया सीदतीति वेदिषत् । अतिथिस्सततगतिः । दुरोणेषु गृहेषु मेषादिषु सीदतीति दुरोणसत् । वराणां दातृत्वेन तेषु सीदतीति वरसत् । अपो जनयतीत्यब्जाः । गोजाः रश्मिसमूहवर्ती । ऋते सत्ये जात ऋतजाः । अद्रिजाः उदयाचलात्प्रादुर्भूतः । समानमन्यत् ।

अथाधियज्ञे - हंसो रथः हन्ति पृथिवीमिति । शुचौ देवयजने रथवाहने च सीदतीति शुचिषत् । शुचिर्यजमानः सीदत्यस्मिन्निति वा शुचिषत् । होतेव वेद्यां सीदतीति वेदिषत् । अतिथिस्सर्वत्राप्रतिहतगतिः । नृषत् मनुष्यार्थं शूरार्थं वा सीदतीति नृषु वा उपकारार्थं सीदतीति नृषत् । ऋतार्थं सत्यार्थं यज्ञार्थं वा सीदतीति ऋतसत् । अब्जाः उदकाज्जातः । गोजाः गोविकारचर्मादिग्रथितत्वात् ततो जात इत्युच्यते । अद्रिभिर्दारुभिरुत्पादितत्वात्ततो जात इत्युच्यते अद्रिजाः । गतमन्यत् ॥

इत्यष्टमे पञ्चदशोनुवाकः ॥

▼ ***मूल-प्रस्तुतिः - यजुः***

य इ॒मन्त्रि॑सु॒प॑र्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् ।
वी॒र॒ह॒त्यावँ॒ वा ए॒ते घ्नं॑न्ति ।

ये ब्रा॑ह्म॒णास्त्रि॑सु॒प॑र्ण॒ं पठ॑न्ति ।
ते सोम॒ं प्राप्नु॑वन्ति ।
आ॒स॒ह॒स्रात्प॒ङ्क्तिं पुन॑न्ति । ओम् । (63)

# २१. अन्नसूक्तम्②

▼ ***सायणोक्त-विनियोगः***

1सप्तमे सौर्यादिपशूनां सूक्तान्यभिहितानि । अष्टमे वेहदादिपशूनां सूक्तान्युच्यन्ते । ते च पशवः शाखान्तरे समाम्नाताः । तत्र सूत्रकारणोदाहृतम् - 'सान्नाय्ये वेहतभालभेत' इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह - बह्वृचा आरण्यकाण्डे त्रिविधमन्नमामनन्ति - 'त्रेधा

विहितं वा इदमन्नमशनं पानं खादः' इति । तस्याशनादेस्त्रिविधस्यान्नस्याभिमानिनी या देवता तदीयानि वचनान्यस्मिन्सूक्ते प्रतिपाद्यन्ते ।

अ॒हम् **अ॑स्मि** प्रथम॒जा *(=प्रथमजनयिता)* ऋ॒तस्य॑ *(=यज्ञस्य)* । पूर्वं॑ दे॒वेभ्यो॑ अ॒मृत॑स्य॒ नाभिः॑ । यो मा॒ **ददा॑ति॒**, स इद् ए॒व मा *(अन्नरूपं)* **ऽऽवाः॑** *(=आवृणोति [पश्चात्])*। अ॒हम् *(दात्रे)* अन्न॒म्, *(अदत्वा)* अन्न॑म् अ॒दन्त॑म् **अद्मि**।

▼ ***सायण-टीका***

अहं अन्नस्वामी देवः ऋतस्य यज्ञस्य प्रथमजाः प्रथमं जनयिताऽस्मि । यज्ञस्य हविर्जन्यत्वाद्धविषोऽन्न रूपत्वात् ।

तादृशोऽहमन्नस्वामी पूर्वं पुरा देवभ्यः देवार्थं अमृतस्य नाभिः बन्धकोऽस्मि । नह्यति बध्नात्यमृतमिति नाभिः । देवा ह्यमृतमुपजीवन्ति । अमृतं चान्नविशेषः, तस्मादहमेवामृतस्य संपादकः ।

यः श्रद्धालुः पुमान् मा मामन्नरूपं ददाति ब्राह्मणादिभ्यः प्रयच्छति स हदेव स दाता स्वयमेव मा मामन्नदेवं **आवाः** आवृणोति स्वीकरोतीत्यर्थः । द्वौ हि लोके पुरुषौ दाता चादाता च । तत्राऽद्यः कालान्तरे भोक्तुं मां संगृह्णाति । यावद् अन्नम् इदानीं दीयते तावदेव कालान्तरे शतधा सहस्रधा वर्धते । तस्माद् दातैव मां संगृह्णाति ।

यस् त्व् अन्तिमो माम् अदत्त्वा स्वयम् एवात्ति
अहम् एवान्नम् अद्मीत्य् अभिमन्यते
तम् अन्नम् अदत्ताभिमानिनम् अन्न-देवो ऽहम् **अद्मि**
तं विनाशयामि ।
अदातुः कालान्तरेऽन्नाभावात् ॥

▼ ***सायणोक्त-विनियोगः***

2अथ वपाया याज्यामाह -

पूर्व॑म् *(मरण/नरक-)*अ॒ग्नेर् अपि॑ **दह॒त्य्** अन्न॑म् *(अदातारम्)*। य॒त्तौ *(→ऽदाता, दाता च)* हा॑ **ऽऽसते**, अहम्-उत्त॒रेषु॑ । व्यात्त॑म् अस्य *(=अन्न-देवस्य)* प॒शव॑स् *(=ये ऽदातारस् तान्प्रति)* सु॒जम्भ॑म् । **पश्य॑न्ति॒** धीरा॒ *(→दातारः)*, **प्रच॑रन्ति॒** पाकाः॑ *(=मूढा [अदातारः])* ।

▼ ***सायण-टीका***

यद् इदम् अन्नम् **अग्नेर् अपि पूर्वम्**
अदातृभिर् भुज्यते
तद् इदम् अन्नं तं भोक्तारं **दहति** ।

अथ भुक्तम् अन्नम् उदराग्निर्
दिन-मात्रेण **दहति** पाचयति ।

आदाता तु भोक्ता भुज्यमानेनान्नेन तदानीम् एव दह्यते
नरकहेतोः प्रत्यवायस्य तदैवोत्पन्नत्वात् ।
अत एवाहुः - 'अदाता विषमश्नुते' इति ।

**यत्तौ हा** प्रयत्नवन्ताव् एव **आसाते** दाता चादाता चेत्युभौ तिष्ठतः । दाता हि दानार्थं प्रयत्नं करोति, इतरस्तु भोजनार्थम् । तयोर्मध्ये ये पुरुषा दातुः पक्षे वर्तन्ते त एवोत्तराः श्रेष्ठाः । **तेषूत्तरेषु** दातृषु कालान्तरेष्व् **अहम्** अक्षीणो वसामि ।

ये **पशवो** मूढा अदातारः तान्प्रति अस्य अन्नदेवस्य मुखं व्यात्तं विवृत्तं **सुजम्भं** तीक्ष्णदन्तोपेतं वर्तते खादयाम्य् अदातॄनिति सर्वदोद्युङ्क्त इत्यर्थः । एतमन्नदेवस्याभिप्रायं दातारो **धीराः** बुद्धिमन्तः पश्यन्ति जानन्ति । अत एवाददतः **पाकाः** बाला मूढाः **प्रचरन्ति** प्रकर्षेण भक्षयन्त्येव न तु किंचिदपि ददति ॥

▼ ***सायणोक्त-विनियोगः***

3अथ पुरोडाशस्य पुरोनुवाक्यामाह - अन्नदेवोऽहमन्नमदातारं जहामि परित्यजामि ।

**जहा॑म्य्** अ॒न्यन्, **न ज॑हाम्य्** अ॒न्यम् । अ॒हम् अन्नं॒, *(उक्त-नियम-)*व॒श॒म् इच् **च॑रामि** । *(दात्रदात्रोः)* स॒मा॒नम् अर्थं॒ *(→नियमं)* **पर्ये॑मि** *(केवलम्)* - "भु॒ञ्जत् *(=पालयन्)* । को माम् अन्नं॑ मनु॒ष्यो॑ **दयेत**?"।

▼ ***सायण-टीका***

अन्यं तु दातारं न जहामि । **अहमन्नं** अन्नदेवरूपोऽहं **वशम् इत्** स्ववशमेव यथा भवति तथा **चरामि** ।
अदातुः परित्यागो दातृस्वीकारश्चेत्य् एतत् स्ववशत्वम् ।
यः पुमान् भोगदानयोः **समानः** सन् धनमर्थयते तं **समानं** अर्थयितारं **भुञ्जन्** पालयन्नहं **पर्येमि** परितः प्राप्नोमि ।
यातु भोगमात्रलम्पटस्तं न पालयामि नापि तं पर्येमीत्यभिप्रायः ।
एवम् अदातृ-परित्यागेन दातृ-पक्षपातेन च वर्तमानं मां **को** मनुष्यो **दयेत** रक्षेन् निवारयेत् ।
न कोपि मां निवारयितुं शक्त इत्यथः ॥

▼ ***सायणोक्त-विनियोगः***

4अस्य पुरोडाशस्य याज्यामाह -

परा॑के॒ *(→लोके)* अन्नं॒ **निहि॑तं** लो॒क ए॒तत् । विश्वै॑र् दे॒वैः पि॒तृभि॑र् **गु॒प्तम्** अन्नं॑म् । यद् **अ॒द्यते॑ लु॒प्यते॒**, यत् **प॑रो॒प्यते॑** *(=बहिस्त्यज्यते) (अस्मिलँ् लोके)* । श॒त॒त॒मी *(=.०१)*, **सा

त॒नूर्** में बभूव *(पर-लोके)* ।

▼ *सायण-टीका*

प्रूर्वस्मिन् मन्त्रे वशम् इच्चरामि मां को दयेतेति यत् स्वातन्त्र्यम् उक्तं
तदुपपादयितुं स्वमाहात्म्यमत्र वर्ण्यते ।
द्विविधो ह्यन्नस्य व्यवहारः पारलौकिक ऐहिकश्चेति ।
तत्र **पराके** परलोके दूरस्थे पित्रादिलोके एतद् अन्नं निहितम् । दाता हि देवलोके पितृलोके वा ममेदं भूयादित्यभिप्रेत्यैव ब्राह्मणेभ्यो ददाति । अतो दत्तमन्नं दूरस्थे लोके निहितं भवति । तच्चान्नं तत्तल्लोके विश्वैः सर्वैः देवैः पितृभिश्च स्वार्थं गुप्तं रक्षितं भवति । यदग्नौ हुतं यच्च ब्राह्मणेभ्यो दत्तं तदेवोपजीव्य देवाः पितरश्च वर्तन्ते । एवं पारलौकिकोऽन्नव्यवहार उक्तः । ऐहिकोऽपि व्यवहार उच्यते - यदन्नमद्यते प्राणिभिर्भक्ष्यते, यच्च विदग्धं सत् भाण्डे अपि भवति पर्युषितत्वेन वा पूतीभवति तादृशं लुप्यते नष्टं भवति । यच्च परोप्यते स्वकीयैश्वर्यप्रकटनाय बहिः परित्यज्यते सा सर्वाप्यैहिकामुष्मिकान्नरूपा मे अन्नस्वामिनो देवस्य शततमी शतसंख्यापूरणी तनूः । स च सर्वोऽपि लेश एवेत्यर्थः । ईदृशं मदीयं माहात्म्यम् ॥

▼ *सायणोक्त-विनियोगः*

5अथ हविषः पुरोनुवाक्यामाह -

म॒हान्तौ॑ च॒रू *(=कुम्भौ)* स॑कृद् दु॒ग्धेन॑ **पप्रौ**(←पूरणे) । दिवं॑ च **पृश्नि** *(=स्वल्पम् [अपि])* पृथि॒वीं च॑ सा॒कम् । तत् **सं॒पिब॑न्तो॒ न मि॑नन्ति** *(=हिंसन्ति आत्मनः)* वे॒धसः॑ । नैतद् भू॒यो **भव॑ति॒**, नो कनी॑यः *(अपि च पर्याप्तः)* ।

▼ *सायण-टीका*

पुनरपि माहात्म्यमेव प्रपञ्च्यते ।
तत्रायं दृष्टान्तः -
यथा लोके बहुक्षीर-प्रदाया गोः सकृद् दुग्धेन
**महान्तौ चरू** प्रौढौ कुम्भौ पूरयति एवमत्रापि **पृश्नि** स्वल्पमपि दत्तमन्नं दिवं च पृथिवीं च साकं लोकद्वयमपि सह पूरयति । अग्नौ ब्राह्मणेषु वा दत्तमन्नं मन्त्रपूतं सत्सहस्रधा फलति । अत एवान्यत्राम्नायते - 'यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथते' इति । तदन्नं संपिबन्तः सम्यग्भक्षयन्तः वेधसः बुद्धिमन्तः न मिनन्ति न हिंसन्ति स्वात्मानमन्नं वा न विनाशयन्ति । दानपूर्वकं भक्षणं सम्यग्भक्षणं तत्कुर्वन्तः पुरुषा अन्नं न हिंसन्ति, दत्तस्यान्नस्य च वर्धमानत्वात् । स्वात्मानमपि न हिंसन्ति, प्रवृद्धस्यान्नस्य च चिरभोक्तृत्वात् । अपि चैतद्भोजनार्थमन्नं न भूयो नापि कनीयः, भूयस्त्वे स्यादजीर्तिः कनीयस्त्वे नास्ति क्षुन्निवृत्तिः । एतदेवाभिप्रेत्य स्मर्यते - 'नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः' इति । एवं दानपुरस्सरं युक्तेन प्रमाणेन भुञ्जानान्पुरुषान् लोकद्वये पालयतीत्यर्थः ॥

▼ *सायणोक्त-विनियोगः*

6अथ हविषो याज्यामाह -

अन्नं॑ प्रा॒णम्, अन्न॑म् अपा॒नम् **आ॑हुः** । अन्नं॑ मृ॒त्युं तम् उ॑ जी॒वातु॑म् *(=जीवनौषधिम्)* **आहुः** । अन्न॑म् ब्र॒ह्माणो॑ ज॒रसँ॑ **वदन्ति** । अन्न॑म् **आहु॒** प्र॒जन॑नम् प्र॒जाना॑म् ।

▼ ***सायण-टीका***

सर्वव्यवहारकारणत्वादस्यान्नस्य माहात्म्यमविवादम् । तत्कथमिति तदुच्यते - योयं प्राणवायुरूर्ध्वं संचरति यश्चापानवायुरधः संचरति तावुभावन्नजन्यबलादेव संचरतः । अतस्तयोरन्नात्मकत्वमाहुः । रसवैषम्येण व्याधिद्वारा मारकत्वादन्नं मृत्युमाहुः । तमेवान्नदेवं जीवातुं जीवनौषधमाहुः । तच्च लोके प्रसिद्धम् । ब्रह्माणः आयुर्वेदशास्त्राभिज्ञा ब्राह्मणाः अन्नमेव जरसं वदन्ति जराहेतुमाहुः । केनचिदाहारविशेषण सहसा अतिपलितत्वप्राप्तिरित्यायुर्वेदप्रसिद्धिः । अन्नमेवेन्द्रियवृद्धिद्वारा प्रजानां प्रजननं उत्पादकमाहुः ॥

▼ ***सायणोक्त-विनियोगः***

7अथ हविष एव विकल्पितामन्यां पुरोनुवाक्यामाह -

मोघ॒म् अन्नँ॑ **विन्दते॒** अ-प्र॑-चेताः *(अदातृत्वेन लक्षितः)* । स॒त्यम् **ब्र॑वीमि** व॒ध इत्स तस्य॑ । नार्य॒मण॒म् **पुष्य॑ति॒** नो सखा॑यम् । केव॑लाघो **भवति** केवला॒दी ।

▼ ***सायण-टीका***

योऽयमदाता सोऽयं **अप्रचेताः** प्रकृष्टज्ञानरहितः मोघं व्यर्थमेव अन्नं **विन्दते** लभते । तदेतत्सत्यं ब्रवीमि न केवलं वैयर्थ्यं किंतु सः अयमदत्तोऽन्नपदार्थः तस्य दानरहितस्य पुरुषस्य वध इत् वध एव वधवद्बाधकमेवेत्यर्थः । तत्र वैयर्थ्यं तावत्स्पष्टीक्रियते - योऽयमदाता सोऽयमन्नेनार्यमादिकं देवं न पुष्यति अग्नावाहुत्यभावात् । सखायं अतिथ्यादिरूपं मनुष्यं न पुष्यति दानाभावात् । अतः परलोके अनुपयोगेन वैयर्थ्यम् । वधहेतुत्वं स्पष्टीक्रियते - केवलादी केवलं भुङ्क्ते न तु ददाति सोऽयं केवलाधो भवति पापमेव संपादयति न तु किञ्चिदपि पुण्यम् सोऽयं वध एव, नरकहेतुत्वात् ॥

▼ ***सायणोक्त-विनियोगः***

8अथ हविषो विकल्पिता याज्यामाह -

अ॒हम् मे॒घस् स्त॒नय॒न् **वर्ष॑न्न् अस्मि** । माम् **अ॑दन्त्य्**, अ॒हम् **अ॑द्म्य्** अ॒न्यान् ॥ 61 ॥ अ॒हँ सद् अ॒मृतो॑ **भवामि** । मद् आ॑दि॒त्या अधि॒ सर्वे॑ **तपन्ति** ।

▼ ***सायण-टीका***

योऽयं मेघः स्तनयन् गर्जन् वर्षश्च वर्तते सोऽयं मेधोऽपि अहमन्नदेवः अस्मि । अग्नौ हुतस्यान्नस्य मेघरूपेण परिणतत्वात् । अत एव स्मर्यते - 'अग्नौ प्रास्ताऽऽहुतिस्सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः' इति । दातारो ये सन्ति ते मामदन्ति सुखेन भक्षयन्ति । अन्यांस्तु दानरहितानहमेवाद्मि विनाशयामि । अहमेव दातॄणां पथ्यं सत् अमृतो भवामि अमरणहेतुर्भवामि देवत्वं प्रापयामीत्यर्थः । सर्वेऽप्यादित्या मत् अन्ननिमित्तत्वादधिकत्वेन तपन्ति । अन्नाभावे ते स्वयमेव न जीवेयुः कुतस्तपेयुरित्यर्थः ॥

[[156]]

---

1. https://vishvAsa.github.io/vedAH_yajuH/taittirIyam/sArasvata-vibhAgaH/saMhitA/sarva-prastutiH/4/4/12_ashva-medha-dasha-haviShkeShTi-yAjyA-puronuvAkyA/

2. https://archive.org/stream/Anandashram_Samskrita_Granthavali_Anandashram_Sanskrit_Series/ASS_042_Krishna_Yajurvediya_Taittiriya_Samhita_Part_1_-_Kasinath_Sastri_Agase_1940#page/n325/mode/2up

3. https://archive.org/stream/RgVedaWithSayanasCommentaryPart2/rv_sayanabhasya_part2#page/n573/mode/2up

4. https://archive.org/stream/Anandashram_Samskrita_Granthavali_Anandashram_Sanskrit_Series/ASS_042_Krishna_Yajurvediya_Taittiriya_Samhita_Part_1_-_Kasinath_Sastri_Agase_1940#page/n327/mode/2up

# ०९ निमन्त्रितैर् जपाः①

## १. दोग्ध्री जपः -②

▼ *भास्करोक्त-विनियोगः*

1अथ ब्रह्मवर्चसं उपजुहोति - आ ब्रह्मन्नित्यादि ॥

▼ *मूल-प्रस्तुतिः*

आ ब्रह्म॑न् *(जातौ)* ब्राह्म॒णो ब्र॑ह्म-वर्च॒सी जा॑यताम् ।
आऽस्मिन् रा॒ष्ट्रे रा॑ज॒न्य॑ इष॒व्य॑श् शूरो॑ महार॒थो जा॑यताम् ।
दोग्ध्री॑ धे॒नुर् , वोढा॑ऽन॒ड्वान् , आ॒शुस् सप्ति॒ः , पुर॑न्धि॒र् योषा॑ , जि॒ष्णू र॑थे॒ष्ठास् ,
स॒भेयो॒ युवा , अस्य यज॑मानस्य वी॒रो जा॑यताम् ।
नि॒का॒मेनि॑कामे नः प॒र्जन्यो॑ वर्षतु ।

▼ *भट्टभास्कर-टीका*

**ब्रह्मन्** ब्रह्मणि ब्राह्मणजातौ अस्य यजमानस्य सम्बन्धी सर्वो ब्राह्मणो ब्रह्मवर्चसी आजायताम् । अस्मिन्राष्ट्रे यजमानस्य सम्बन्धी राजन्यः सर्वोपि क्षत्रः इषव्यः इष्वादिषु साधुः शूरः महावीरः महारथः रथचर्यायां प्रकृष्टश्च आजायताम् । 'राजश्वशुराद्यत्' 'राज्ञोपत्ये जातिग्रहणम्' ।

▼ *मूल-प्रस्तुतिः*

दोग्ध्री॑ धे॒नुर् , वोढा॑ऽन॒ड्वान् , आ॒शुस् सप्ति॒ः , *(सुन्दर-)*पुर॑न्*(=कायं)*-धि॒र् योषा॑ , जि॒ष्णू र॑थे॒ष्ठास् ,
स॒भेयो॒ युवा , अस्य यज॑मानस्य वी॒रो जा॑यताम् ।

▼ *भट्टभास्कर-टीका*

**दोग्ध्री** बहुक्षीरा सुदोहा च धेनुराजायतां अस्य यजमानस्य । साधुकारिणि तृन् । वोढा साधुवाही अनड्वानाजायताम् । आशुश्शीघ्रगतिः सप्तिराजायताम् । **पुरन्धिः** रूपवती पुरं शरीरं धीयतेऽस्यामिति । 'कर्मण्यधिकरणे च' इति किः । पूर्वपदस्याम्भावश्छान्दसः । दासीभारादिः । पुरुभिर्वा ध्यातव्या पुरन्धिः । पृषोदरादिः । ईदृशी योषा योषित् अस्य यजमानस्य आजायताम् । जिष्णुः जयशीलः रथेष्ठाः रथे स्थातुं शक्तः । रथे तिष्ठति सङ्ग्रामेष्विति 'सुपि स्थः' इति कः, 'तत्पुरुषे कृति बहुलम्' इत्यलुक्, वचनव्यत्ययः । सभेयः सभायां साधुः रूपवत्तया, 'डश्छन्दासि; इति डः । युवा तरुणः । वीरः विक्रान्तः । एवं जिष्ण्वित्यादिगुणयुकः पुरुषोस्य यजमानस्य आजायताम् ।

▼ *मूल-प्रस्तुतिः*

नि॒का॒मेनिंकामे न॒ प॒र्जन्यों वर्षतु ।

▼ *भट्टभास्कर-टीका*

**निकामेनिकामे** इच्छायां नः अस्माकं पर्जन्यो वर्षतु ।

▼ *मूल-प्रस्तुतिः*

फ॒लिन्यों न॒ ओषंधय॒ पच्यन्ताम् ।

▼ *भट्टभास्कर-टीका*

फलिन्यः बहुफला ओषधयः अस्माकं राष्ट्रे पच्यन्ताम् । कर्मकर्तरि यत् ।

▼ *मूल-प्रस्तुतिः*

यो॒ग॒क्षे॒मो नं॑ कल्पताम् ॥ [44]

▼ *भट्टभास्कर-टीका*

योगसहितः क्षेमः योगक्षेमः । शाकपार्थिवादित्वादुत्तरपदलोपी समासः । इतरेतरयोगद्वन्द्वे वा वचनव्यत्ययः । समाहारद्वन्द्वे वा लिङ्गव्यत्ययः ।

योगश्च क्षेमश्चास्मिन् राष्ट्रे प्रजानां कल्पतां सम्पद्यताम् । अलब्धलाभो योगः । लब्धस्य परिपालनं क्षेमः ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये सप्तमे काण्डे पञ्चमे प्रश्ने अष्टादशोनुवाकः ॥

# २. नियोगानन्तरं निषङ्गिणी②

नियोगानन्तरं २. निषङ्गिणी

[[105]]

▼ *विश्वास-टिप्पनी*

निषङ्गिणी।

▼ *सायण-टीका*

द्वितीयानुवाक उभयतोनमस्काराणि कानिचिद्यजूंष्य् उक्तानि ।
अथावरणि तथाविधान्येव तृतीयेऽस्पष्टार्थानि द्वादश यजूंष्य् उच्यन्ते ।

▼ *मूल-प्रस्तुतिः*

नम॒: सह॑मानाय निव्या॒धिने॑
आव्या॒धिनी॑ना॒ं पत॑ये॒ नम॑:

▼ *भट्टभास्कर-टीका*

तत्र प्रथमं यजुराह- नमः सहमानायेति । सहमानो विरोधिनोऽभिभवन् । नितरां विरोधिनो विध्यतीति **निव्याधी**, तादृशाय रुद्राय नमः ।
आ समन्ताद्विष्यन्तीत्य् **आव्याधिन्यः** शूराः सेनास्तासां पालकाय नमः ।

▼ *मूल-प्रस्तुतिः*

नम॑: ककु॒भाय॑*(=महते)* निष॒ङ्गिणे॑
स्ते॒नाना॒ं पत॑ये॒ नम॑:

▼ *सायण-टीका*

अथ द्वितीयं यजुराह- नमः ककृभायेति।
**ककुभाय** ककुभ-सदृशाय प्रधानभूतायेत्यर्थः।
**निषङ्गी** खड्गहस्तस्तस्मै नमः।
स्तेना गुप्तचोरास्तेषां पालकाय नमः।
रुद्रो हि लीलया नट इव तत्तद्वेषं धत्ते।
यद्वा तस्य सर्वजगदात्मकत्वाद्ये यत्र यथा वर्तन्ते तत्र तथारूपेण रुद्रो वर्तत इति रुद्रस्य सार्वात्म्यमनुसंधातुं मन्त्रेरेवमुच्यते।
स्तेनादिशरीरेषु रुद्रो द्वेधा वर्तते जीवरूपेणेश्वररूपेण च।
तत्र च यज्जीवरूपं तत्स्तेनादिशब्दानां वाच्योऽर्थः।
स एव शास्त्रेषु निन्द्यः।
यत्त्वीश्वररूपं तत्स्ते नादिशब्दैरुपलक्ष्यते।
तदनुसंधानं तु पापक्षय-हेतुत्वेन परमपुरुषार्थ इति लक्ष्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुज्यन्त इति द्रष्टव्बम्।
उपलक्षकवाच्यार्थद्वारेण लक्ष्यार्थो मुग्धैरपि सहसा सम्यग्बोद्धुं शक्यते।
यथा शाखाग्रे चन्द्र इत्यत्र।
तस्माल्लक्ष्यार्थस्यैव विवक्षायामपि सुखावबोधद्वारत्वेन मुख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः

▼ *मूल-प्रस्तुतिः*

नमो॑ निष॒ङ्गिणं॑ इषुधि॒मते॒
तस्क॑राणा॒ं पत॑ये॒ नमः॑

▼ *सायण-टीका*

अथ तृतीयं यजुराह— नमो निषङ्गिण इति।
धनुषि संधातुं हस्ते घृतो बाणो निषङ्गः।
पृष्ठे वद्धो बाणाधार इषुधिः तदुभययुक्ताय नमः।
तस्काराः प्रकटचोरास्तेषां पालकाय नमः।

[[2119]]

▼ *मूल-प्रस्तुतिः*

नमो॑ वञ्च॑ते परि॒वञ्च॑ते
स्तायू॒नां*(←स्तै वेष्टने)* पत॑ये॒ नमः॑

▼ *भट्टभास्कर-टीका*

अथ चतुर्थं यजुराह— नमो वञ्चत इति।
स्वामिन आप्तो भूत्वा तदीय-क्रय-विक्रयादि-व्यवहारेषु
यत्र क्वापि यत्-किंचित्-तद्द्रव्यापह्नवो **वञ्चनम्**।
सर्वेष्वपि व्यवहरिष्वपह्नवः **परिवञ्चनं**, तदुभयरूपाय नमः।
गुप्तचोरा द्विविधाः-
दूराद् आगत्य रात्राव् अज्ञाताः सन्तः
कपाटोद्घाटनेन ये द्रव्यापहर्तारस्ते **स्तेनाः**।
स्वकीया एव भूत्वा
रात्राव् अह्नि वाऽन्यैर् अज्ञाताः सन्तो
ऽपहर्तारो ये ते **स्तायव**।
तेषां स्तायूनां पालकाय नमः।

▼ *मूल-प्रस्तुतिः*

नमो॑ निचे॒रवे॑*(←चर्)* परिचु॒रायार॑ण्याना॒ं पतये॒ नमः॑

▼ *सायण-टीका*

अथ पञ्चमं यजुराह— नमो निचेरव इति।
स्वामिगृह एव कदाऽपहरिष्यामीत्यनया बुद्ध्या
सावधानो निरन्तरं चरणशीलो

**निचेरुः** परित आपणवीथिप्रवाटिकादावपहारबुद्ध्या चरणशीलः परिचरस्तदुभयरूपाय नमः।
मार्गे गन्तुर्द्रव्यापहारेण बाधितृ निरन्तरमरण्ये वर्तमानाश्चोरा अरण्यास्तेषां पालकायनमः।

▼ *मूल-प्रस्तुतिः*

नम॑ सृका॒विभ्यो॒*(←सृक=बाणः)* जिघाँ॑सद्भ्यो
मुष्ण॒तां पत॑ये॒ नमः॑

▼ *सायण-टीका*

अथ षष्ठं यजुराह— २१२१
नमः सृकाविभ्य इति।
**सृक**शब्दो वज्रवाची।
तेन स्वशररिमवन्ति रक्षन्तीति सृकाविनः, प्राणिनो हन्तुमिच्छन्तश्चोरा जिघांसन्तस्तदुभयरूपाय नमः।
कृषिकाः सन्तः स्वामिघान्यानामपहर्तारो मुष्णन्तस्तेषां पालकाय नमः।

▼ *मूल-प्रस्तुतिः*

नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒ चर॑द्भ्यः
प्रकृ॒न्ताना॒ं पत॑ये॒ नमः॑

▼ *सायण-टीका*

अथ सप्तमं यजुराह— नमोऽसिमद्भ्य इति।
असिमन्तः खड्गधारिणश्चोराः।
ये रात्रौ चरन्तो वीथ्यां निर्गतान्प्राणिनो वाधमानाश्चोरास्ते नक्तं चरन्तः।
तदुभयरूपाय नमः।
हत्वैवापहरन्तः प्रकृन्तास्तेषां पालकाय नमः।

▼ *मूल-प्रस्तुतिः*

नम॑ उष्णी॒षिणे॑ गिरिच॒राय॑
कु-लु॒ञ्चाना॒ं पत॑ये॒ नमः॑

▼ *सायण-टीका*

अथाष्टमं यजुराह— नम उष्णीषिण इति।
शिरोवेष्टनवानुष्णीषी।
ग्राम्यजनवदुष्णीषेण शिरो वेष्टयित्वा तन्मध्ये प्रविश्य वर्तमानश्चोर उष्णीषी, गिरौ

काष्ठादिसंपादकानां वस्त्रादिकम-पहर्तुं चरतीति गिरिचरस्तदुभयरूपाय नमः।
**कुं** भूमिं गृहक्षेत्रादिरूषां लुञ्चन्त्य् अपहरन्तीति **कुलुञ्चास्** तेषां पालकाय नमः।

▼ ***मूल-प्रस्तुतिः***

नम॒ इषु॑मद्भ्यो
धन्वा॒विभ्य॑श् च वो॒ नमः॑

▼ ***सायण-टीका***

अथ नवमं यजुराह– नम इषुमद्भ्य इति।
भीषयितुं हस्ते बाणधारिण इषुमन्तः।
तथा भीषयितुं हस्ते धनुर्धारिणो धन्वाविनः।
तदुभयरूपा हे रुद्रा वो युष्मभ्यं नम इति विशेषणद्वयेन वाक्यं भेत्तुं द्विर्नमस्कारः।

▼ ***मूल-प्रस्तुतिः***

नम॑ आतन्वा॒नेभ्यः॑
प्रति॒दधा॑नेभ्यश्च नमः॑

▼ ***सायण-टीका***

अथ दशमं यजुराह— नम आतन्वानेभ्य इति।
धनुषि ज्यामारोपयन्त आतन्वानास्तद्रूपेभ्यो युष्मभ्यं रुद्रेभ्यो नमः।
धनुषि बाणं संदधानाः प्रतिदधानास्तद्रूपेभ्यो बुष्मभ्यं नमः।

▼ ***मूल-प्रस्तुतिः***

नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमः॑

▼ ***सायण-टीका***

अथैकादशं यजुराह— नम आयच्छद्भ्य इति।
ज्याकर्षणं कुर्वन्त आयच्छन्तो वाणं मुञ्चन्तो विसृजन्तः।
शेषं पूर्वद्व्याख्येयम्।

▼ ***मूल-प्रस्तुतिः***

नमोऽस्य॑द्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नमः॑

▼ ***सायण-टीका***

अथ द्वादशं यजुराह— नमोऽस्यद्भ्य इति।
मुक्तस्य बाणस्य लक्ष्यपर्यन्तं नमनमसनं तरय कर्ता-रोऽस्यन्तः।
लक्ष्यसमीपं गतस्य बाणस्य लक्ष्ये प्रवेशो वेधस्तस्य कर्तारो विध्यन्तः।

▼ *मूल-प्रस्तुतिः*

नम॒ आसीने॑भ्यः॒ शया॑नेभ्यश्च वो॒ नमः॑

▼ *सायण-टीका*

अथ त्रयोदशयजुरारभ्य सप्तदशयजुःपर्यन्तानि स्पष्टार्थानि यजूंष्याह-नम आसीनेभ्य इति।

▼ *मूल-प्रस्तुतिः*

नमः॒ स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमः॑

▼ *मूल-प्रस्तुतिः*

नम॒स् तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमः॑

▼ *मूल-प्रस्तुतिः*

नमः॑ स॒भाभ्यः॑ स॒भाप॑तिभ्यश्च वो॒ नमः॑

▼ *मूल-प्रस्तुतिः*

नमो॒ अश्वे॒भ्योऽश्वपतिभ्यश्च वो॒ नमः॑ [ २ ] ।।

▼ *विस्तारः (द्रष्टुं नोद्यम्)*

अग्निर्ऋषिः

▼ *सायण-टीका*

(अथ चतुर्थाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः)।
षष्ठेऽनुवाकि यान्य् अन्यतरतोनमस्काराणि यजूंष्युक्तानि
तेभ्योऽन्यानि कानिचिद् यजूंषि सप्तमेऽभिधीयन्ते।
तत्र विद्यमानानि षोडश यजूंष्याह— नमो दुन्दुभ्यायेति।

▼ *मूल-प्रस्तुतिः*

नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य *(शब्दाय)* च ।

▼ *सायण-टीका*

दुन्दुभौ भेर्यां भवः शब्दो दुन्दुभ्यः।
आहन्यते ताड्यतेऽनेत्याहननं दुन्दुभ्याघातार्थो दण्डस्तत्र ताडनरूपेणोत्पन्न आहनन्यः।

▼ *मूल-प्रस्तुतिः*

नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च ।

▼ *सायण-टीका*

घृष्णुर्युद्धे पलायनरहितः।

प्रमृशः परसैन्यवृत्तान्तपरामर्षकः।

▼ *मूल-प्रस्तुतिः*

नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च ।

▼ *सायण-टीका*

दूतस्तद्वृत्तान्तज्ञापनकुशलः।

प्रहितः स्वामिना प्रेषितः पुरुषः।

▼ *मूल-प्रस्तुतिः*

नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च ।

▼ *सायण-टीका*

निषङ्गी खड्गयुक्तः।

इषुधि मान्बाणाधारयुक्तः।

▼ *मूल-प्रस्तुतिः*

नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च ।

▼ *सायण-टीका*

तीक्ष्णा इषवो यस्यासौ तीक्ष्णेषुः।

बहून्यायुधानि यस्य सन्तीत्यायुधी।

▼ *मूल-प्रस्तुतिः*

नम॑स्स्वायु॒धाय॑ च सु॒धन्व॑ने च

▼ *सायण-टीका*

शोभनमायुधं त्रिशूलरूपं यस्यासौ स्वायुधः।

शोभनं धन्वपिनाकरूपं यस्यासौ सुधन्वा।

▼ *मूल-प्रस्तुतिः*

नम॒स्स्रुत्या॑य च॒ पथ्या॑य च ।

▼ *सायण-टीका*

स्रुतिः पादसंचारमात्रयोग्यः क्षुद्रमार्गस्तमर्हतीति स्रुत्यः।

पन्या रथाश्वादिसंचारक्षमः प्रौढो मार्गस्तमर्हतीति पथ्यः।

▼ *मूल-प्रस्तुतिः*

नम॑× का॒ऽट्या॑य च नी॒प्या॑य *(←नीपः = जलपातस्थलम्)* च ।

▼ *सायण-टीका*

कुत्सितम् अटति जलमत्रेति काटोऽल्पप्रवाहयोग्यः कुल्याप्रदेशस्तत्र जलरूपेण भवः काट्यः।

यस्मिंन्प्रदेशे पर्वताग्राज् जलं न्यग्भावेन पतति स प्रदेशो नीपस्तत्र जलरूपेणावस्थितो नीप्यः

▼ *मूल-प्रस्तुतिः*

नम॒स् सूद्या॑य *(←सूदः=कर्दम-प्रदेशः)* च सर॒स्या॑य च *(जलाय)* ।

▼ *सायण-टीका*

सूदः कर्दमप्रदेशस्तत्रत्यजलरूपः सूद्यः।

सरः प्रसिद्धं, तत्रत्य जलरूपः सरस्यः।

▼ *मूल-प्रस्तुतिः*

नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ *(←अल्पसरो वेशन्तः)* च *(जलाय)*

▼ *सायण-टीका*

नदीगतजलरूपो नाद्यः।

अल्पसरो वेशन्तस् तत्रत्यजलरूपो वैशन्तः।

▼ *मूल-प्रस्तुतिः*

नम॒× कूप्या॑य चाव॒ट्या॑य च ।

▼ *सायण-टीका*

कूपस्थजलरूपः कूप्यः।

अवटस्थजलरूपोऽवट्यः।

▼ *मूल-प्रस्तुतिः*

नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च ।

▼ *सायण-टीका*

वर्षजलरूपो वर्ष्यः।

वर्षनिरपेक्षजलरूपोऽवर्ष्यः।

▼ *मूल-प्रस्तुतिः*

नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च ।

▼ *सायण-टीका*

मेघेषु स्थितो मेघ्यः ।

विद्युता सह चरतीति विद्युत्यः।

▼ *मूल-प्रस्तुतिः*

नम॑ ई॒ध्रिया॑य*(←इध्)* चात॒प्या॑य च ।

▼ *सायण-टीका*

ईध्रं निर्मलत्वेन दीप्यमानं शरदभ्रं तत्र भव ईध्रियः।

आतपेन सह दृष्ट आतप्यः।

▼ *मूल-प्रस्तुतिः*

नमो॒ वात्या॑य च॒ रेष्मि॑याय*(←रिष्)* च

▼ *सायण-टीका*

वातेन सह वृष्टो वात्यः।

रिष्यन्ति विनश्यन्ति भूतान्यत्रेति **रेष्मः** प्रलयकालस्तत्र भवः शर्करापाषाणादिसहितो वृष्टिजलविशेषो रेष्मियः।

▼ *मूल-प्रस्तुतिः*

नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च ।

▼ *सायण-टीका*

वस्तु धनं(न)गवाश्वदिपदार्थरूपं तत्र तत्कार्यरूपेण वा स्थितो वास्तव्यः।

गृहनिर्माणार्था भूमिर्वास्तु तत्पालको वास्तुपः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः॥ ७ ॥

# ३. परिवेषणकाले ब्रह्मोद्यम्②

(परिवेषणकाले) 1 3. ब्रह्मोद्यम्

▼ *विस्तारः (द्रष्टुं नोद्यम्)*

१-४ अनुष्टुप् ५-६ त्रिष्टुप् विश्वेदेवा ऋषयः

▼ *विश्वास-टिप्पनी*

अथ होतुः प्रश्नाः ब्रह्मणः प्रतिवचानानि।
मुक्तसमये तत्त्वज्ञानं खलु विमृशेयुर् यागेष्व् इति शिष्टाः।

## द्यव्य् अश्वावी⑥

▼ *मूल-प्रस्तुतिः*

किँ स्विंद् आसीत् पूर्व-चिंत्ति॒ः *(=ज्ञानम्)*,
किँ स्विंद् आसीद् बृ॒हद् वयः॑ *(=पक्षी)* ।
किँ स्विंद् आसीत् पिशङ्गि॒ला *(=नानावर्णा)* ,
किँ स्विंद् आसीत् पिलिप्पि॒ला *(=प्रीणयित्री)* ।

▼ *भट्टभास्कर-टीका*

1अथ होतुः प्रश्नाः ब्रह्मणः प्रतिवचानानि - किं स्विदासीदित्यादीनि आनुष्टुभस्सर्वोनुवाकः । पृच्छामीति द्वे त्रिष्टुभौ । तत्र प्रथमा 'किं स्वित्' इति प्रश्नः । किमिति सामान्यविवक्षया नपुंसकत्वम् । स्विदिति वितर्के । किन्नु पूर्वचित्तिरासीत् पूर्वा प्रथमा चित्तिः ज्ञानमस्याः किन्नु इदमेव श्रेष्ठमिति प्रथमं चिन्त्यत इत्यर्थः । उत्तरापेक्षया स्त्रीलिङ्गता । यद्वा - पूर्वे देवाः त एव चित्तयश्चेतयितारो यस्याः । कर्मणि क्तिन्, कर्तरि बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । तत्रा न्तोदात्तत्वं छान्दसम् । किन्नु खलु बृहत् महत् वयः अन्नमयमासीत् । यदन्नं लब्ध्वा पुनरन्यदन्नं न मृग्यं भवति तन्महत् ।

किं वा नु खलु पिशङ्गिलाऽऽसीत् । पिश अवयवे रौधादिकः । इगुपधलक्षणः कः । पिशशव्देन रूपादीन्युच्यन्ते । तानि गिरति छादयतीति छान्दसः कः, करणं वा 'घञर्थे कविधानं' इति कः । पचाद्यचि वा 'बहुलं छन्दसि' इति कित्वम, 'अचि विभाषा' इति लत्वं पर्वूपदस्याम्भावः । यद्वा - पिशङ्गो नानावर्णः तेन तद्वती पिशङ्गिला तुन्दादिलक्षणा इलच् । केन रूपादिकं छाद्यते केन वा प्रकाश्यते इत्यहोरात्राभिप्रायेण प्रश्नः । नानावर्णता चाहर्मिश्रत्वात् । किं वा स्वित् पिलिप्पिला आसीत् अत्यर्थं प्रीणयित्री पिलिप्पिला । पृ प्रीतौ, यङ्लुगन्तात्परिपर्तेः पचाद्यचि गुणे उपधाया इत्वं उभयत्र लत्वं पकारोपजनः, अभ्यासस्य चेत्वं छान्दसम् । पिलिप्पिलेति धात्वन्तरमौज्ज्वल्यवाचीति केचित् । ततः पचाद्यच् । का स्वित् उज्ज्वलयित्री प्रजानामिति ॥

## परिहाराः⑥

▼ *मूल-प्रस्तुतिः*

द्यौर् आसीत् पूर्व-चिंत्ति॒र् ,
अश्व॑ *(=दधिक्रावा प्रोषपदासु)* आसीद् बृ॒हद् वयः॑ *(=सूर्यः)* ।
रात्रिंर् आसीत् पिशङ्गि॒ला,
ऽविंर् *(=मेषराशिः)* आसीत् पिलिप्पि॒ला ।

▼ *विश्वास-टिप्पनी*

- सूर्योऽश्वः, बृहद् वयोऽपि। अवतीत्य् अविः। आदित्यप्रभवा श्रीर्वा सा। 'श्रीर्वै पिलिप्पिला' इति च ब्राह्मणम्।
- If the horse (दधिक्रावा - say pegasus) was the big bird (sun), it might make nearby aviH (meSha) "pilappila" at sandhyA.

▼ *भट्टभास्कर-टीका*

2अथ उत्तराणि - द्यौरित्यादीनि ॥ द्यौः पूर्वचित्तिः चित्यानां मुख्यत्वात् देवैर्ज्ञातव्यत्वाच्च । तस्य च साधनं अश्वो बृहद्वयः । तेन हि सकृदिष्ट्वा वरामुच्छ्रितिं प्राप्य पुनरन्यत्स्थानं भोगार्थमिच्छतीति तस्य निमित्तकारणम् । रात्रिः पिशङ्गिला सा हि रूपाणां छादयित्री स्वयं च प्रकाशाप्रकाशव्यामिश्ररूपा, तारकाभिरन्धकारेण च समन्वितत्वात्, अहर्मिश्रत्वाद्वा । अथ तस्याप्यभिवृद्धिकारणं अविः पिलिप्पिला अवति विश्वमित्यविः वृष्टिः । आदित्यप्रभवा श्रीर्वा । सा हि जगत् भृशं प्रीणयति ज्वलयति च 'श्रीर्वै पिलिप्पिला' इति च ब्राह्मणम् ॥

## सूर्यचन्द्राग्नि-भूमयः⑥

▼ *मूल-प्रस्तुतिः*

कस् स्विंद् एका॒की चंरति॒ ,
क उं स्विज् जायते॒ पुनः॑ ।
किँ स्विंद् हि॒मस्यं भेष॒जङ् ,
किँ स्विंद् आ॒वपंनम् म॒हत् ।

▼ *भट्टभास्कर-टीका*

3'किं स्विदासीत्' इत्यादयः प्रश्नाः उक्तान्य् आदित्य-व्यापार-जानि प्रश्न-प्रतिवचनानि ।
इदनीम् आदित्यम् आरभ्य प्रश्नाः क्रियन्ते -
को नु खलु एकाकी असहायश् चरति;
सामर्थ्यात् सर्वदेति गम्यते ।
सर्वो हि कदाचिद् एकाकी चरति । प्रकृतत्वाच्च वृष्टेः प्रवर्तयिता एकाकी चरतीति । क एव खलु पुनर्जायते अत्रापि सामर्थ्यात् पुनःपुनरिति गम्यते । सर्वोपि हि मृत्वा पुनर्जायते । प्रकृतत्वाच्चादित्यवशात् पुनःपुनर्जायत इति । किं नु खलु हिमस्य शैत्यस्य भेषनं निवर्तकं प्रकृतत्वाच्च चन्द्रमसोत्पादितस्य । किन्नु खलु महदावपनं आवापस्थानं उप्यन्ते अस्मिन्नित्यावपनम्॥

▼ *मूल-प्रस्तुतिः*

सूर्य॑ एका॒की च॑रति ,
च॒न्द्रमा॑ जायते॒ पुनः॑ ।
अ॒ग्निर् हि॒मस्य॑ भेष॒जम् ,
भूमि॑र् *(ओषध्यादीनां)* आ॒वप॑नम् म॒हत् ।

▼ *भट्टभास्कर-टीका*

4अथोत्तराणि - सूर्य इत्यादीनि ॥ सूर्योऽसहायः सर्वदा दिवि चरति । सेनान्यादीनामनुपलम्भात् असहायत्वं मन्यन्ते । चन्द्रमाः पुनःपुनरादित्याज्जायते । तदुत्पादितस्य हिमस्याग्निर्भेषजम् । तत्सृष्टानामोषध्यादीनां भूमिरावपनमिति ॥

▼ *मूल-प्रस्तुतिः*

पृ॒च्छामि॑ त्वा॒ प॒रम् अन्त॑म् पृथि॒व्याः॒ ,
पृ॒च्छामि॑ त्वा॒ भुव॑नस्य॒ नाभि॑म् ।
पृ॒च्छामि॑ त्वा॒ वृष्णो॒ अश्व॑स्य॒ रेतः॑ ,
पृ॒च्छामि॑ वा॒चः॒ प॑र॒मव्ँ॒ व्यो॑म ।

▼ *भट्टभास्कर-टीका*

5एवं भूम्यन्तानि प्रश्नप्रतिवचनानि । अधुना भूमेर् आरभ्य प्रश्नाः क्रियन्ते - पृच्छामीत्याद्याः ॥
हे ब्रह्म त्वां **पृच्छामि पृथिव्याः परमन्तं** यत्र सर्वा पृथिवी समाप्ता । अथ तत्र प्रतिष्ठितां भुवनस्य नाभिं पृच्छामि यत्र प्रतिबद्धं सर्वं जीवति स नाभिः 'नहोभश्च' इतीङ्प्रत्ययः । हेतुं च पृच्छामि तस्य वृष्णो वर्षितुरश्वस्य व्यापकस्य किं रेतः यतस्सर्वं जायते । अथ तच्च पृच्छामि वाचो वेदात्मिकायाः ऋगादेः तस्य रेतसो विधात्र्याः किं परमं व्योम प्रकृष्टं रक्षास्थानं सर्गप्रतिसर्गनिबन्धनं व्योमेति । विपूर्वादवतेः मन्प्रत्ययः, 'ज्वरत्वरस्रिव्यविमवाम्' इत्यादिना ऊठि गुणः ॥

▼ *मूल-प्रस्तुतिः*

वेदि॑म् आहुः॒ प॒रम् अन्त॑म् पृथि॒व्या ,
य॒ज्ञम् आ॑हु॒र् भुव॑नस्य॒ नाभि॑म् ।
सोम॑म् आहु॒र् वृष्णो॒ अश्व॑स्य॒ रेतो॒ ,
ब्र॒ह्मैव वा॒चः॒ प॑र॒मव्ँ॒ व्यो॑म ॥ [46]*(5)*

▼ *भट्टभास्कर-टीका*

6अथोत्तराणि वेदिमित्यादीनि ॥
**पृथिव्याः परमन्तं वेदिमाहुः** ब्रह्मवादिनः
'सा वा इयं सर्वैव वेदिः' इति च स्तूयते ।
तत्र निवर्त्यं **यज्ञमाहुः भुवनस्य** सर्वस्य भूतजातस्य **नाभिः** ।
तस्य **वृष्णः अश्वस्य** यज्ञस्य **रेतः सोममाहुः** सर्वस्य बीजं यागद्वारेण वृष्ट्याद्युत्पत्तिहेतुत्वात् ।
अश्वस्यैव वा वर्षितुः सोमो रेतः सर्वलोकजीवनोदकहेतुभूतसोमसाधनत्वात् ।
तत्फलं वाचः परमं व्योम ब्रह्मैव परमात्मैव प्राप्यत इति ॥

इति सप्तमे चतुर्थे अष्टादशोनुवाकः ॥

---

1. हुतशिष्टान्नातिरिक्तवस्तुपरिवेषणे इत्यर्थः

# Appendix - +Dyugangā द्युगङ्गा①

## Goals ध्येयानि②

Dyugangā (https://rebrand.ly/dyuganga) is a work group dedicated to the promotion of ever-victorious Hindu ideals and arts. It's current focus is in presenting important texts for easy study. Long term goal (https://rebrand.ly/dg-archive) is to save texts to last for millennia into the coming post-electronic/ industrial age.

The texts may be presented as

- audio files (eg: MahAbhArata audio book project),
- as web pages (eg. Apastamba-gRhya-sUtra, Apastamba-dharma-sUtra, EkAgnikANDa commentary, manu-smRti, raghuvaMsha, more kalpa-texts, tattva-texts, universal subhAShita DB),
- as dictionaries (eg: stardict)
- ebooks distributed on various platforms - (eg: vishvasa.github.io/book-pub, amazon, google play - SVK SVT का). Formats include md, pdf (A4, A5), epub, azw3, html, etc.

We distribute these for free, and under a CC BY 4.0 license. (Platforms may levy their fees.) You may subscribe to mail-streams for past and future announcements (dg, hv, san).

The choice of material heavily depends on the special interests of its current lead (vedas, kalpa, purANa-s).

## संस्कृतानुवादः③

द्युगङ्गा नाम कार्यसंस्था - अजेयानां भारतीयपुरुषार्थपरिकल्पनानाञ्च, हिन्दुककलानाञ्च प्रसारणाय वर्तते।
तदीयस् स्थूलोद्देशोऽधुना प्रमुखग्रन्थानाम् अध्ययनसौकर्याय प्रस्तुतिः। ततो ग्रन्थ-सङ्कलन-

केन्द्रम् इति वक्तुम् अलम्। दूरोद्देशस् तु (https://rebrand.ly/dg-archive) आधुनिक-शिला-तैल-युगात् परम् अपि सहस्राधिक-वर्षाणि यावद् ग्रन्थ-रक्षा।

ग्रन्थानाम् प्रस्तुतिर् ध्वनिसञ्चिकाभिस् स्यात् (यथा महाभारतपारायणप्रसारणे), जाल-क्षेत्र-पृष्ठैर् वा (यथा विश्वासस्य मन्त्रटिप्पनीषु, एकाग्निकाण्डटीका), शब्द-कोशैर् वाऽपि (stardict)। इमेऽस्मत्-पक्षतो मुक्त-रीत्या प्रसार्यन्ते।

सद्यश्च ग्रन्थाः संस्थाग्रण्या रुचिविशेषम् अनुसृत्य चिताः - वेदाः, इतिहास-पुराणानि, कल्प-वेदाङ्ग-ग्रन्थाश् चेति।

## Contribution दानम्③

Donations and sponsorship are welcome (use contact page on our website) - they help offset operating costs (eg. worker payments mainly ~1L/mo, book distribution) and plan further projects. Project-specific sponsorship opportunities are occasionally advertised on our social media accounts and on certain mailing lists.